जयद्रथयामलम्

प्रथम षट्कम्

Sampath_eBooks

वनानि यानि हृद्यानि तेजसः स्वानि शङ्करः।

ब्रूहि मेधंकररक्ताम्बुधौतानन शिखायुध॥ १॥

श्रीभैरव उवाच।

तिलाः सर्वार्थकृत्प्रोक्ता यवाः पुण्यप्रसाधकाः ।श्यामाका कंगु

णीवारास्तयोर्लक्ष्मीप्रदायकाः ॥ २॥

श्यालयोरन्यजावाप्तिरन्योन्यैश्वर्यदानि तु।

तेजःसौभाग्यभोग्यानि सिद्धार्थलवणानि च॥ ३॥

हविष्यान्नवसौ बलें स्यादहविष्याच्च संपदः।

अमृतामृततां याति क्षीराद् दीप्तवपुर्भवेत्॥ ४॥

दध्न पुष्टिमवाप्नोति भवेत्शांतिस्त्रियोगतः ।

मधुसर्पिर्वृद्धिकृत् स्यात् त्रिस्वादाद् गजवर्धनम्॥ ५॥

त्यक्ताश्चापि गवां वृद्धिः शोकश्चोपशमं व्रजेत्।

श्रेयोवृद्धिकरो होमः कुंडादौ तु प्रजायते॥ ६॥

राज्यं कोकनदेभ्यश्च बिल्वेभ्यो ज्ञानमैश्वरम्।

कान्तिः स्याद् बीजपूरेभ्यो नारङ्गेभ्यो रतेन्दिरा॥ ७॥कर्कन्धुचरजं वीर

फलेभ्योऽरिविनाशकृत्।न्यग्रोधोदुम्बरो चन्द्रः पिप्पली

पापिनोद्भवः॥८॥फलेभ्यो यौवनस्थैर्यं कुर्याद्धोमाच्चिरेण तु।समिधः

खादिरा ज्ञेयाः काश्मर्योऽर्थप्रसाधने ॥ ९॥

Sampath_eBooks

आयुषो वृद्धस्य शस्ताःपलाशाश्चान्धसम्भवाः ।क्षीरिणो वाथ

समिधस्ताः सर्वसुखकारिकाः ॥ १० ॥

अपामार्गोद्भवाः शौर्ये बिल्वजाश्च रसायने ।सौभाग्ये शोकजापुष्टौ

मालतिलोचनोद्भवाः ॥ ११ ॥

कान्ताचम्पकपुन्नागनागकेसरसम्भवाः ।

साप्तपर्ण्यश्च दिव्यस्त्रीसाधनाय प्रशंसिताः ॥ १२ ॥

जंधां प्रवेतसानाञ्च जलपातकरा मताः ।

महोग्रा मोदिनो वृक्षा स्वादहीनाश्च कर्मणि ॥ १३ ॥

प्रशस्तेन प्रशंसन्ति सूरयोऽग्निक्रियाविदः ।

स्वादितेऽपि न दुष्यंति क्षीरिणो येऽर्कवृक्षकम् ॥ १४ ॥

मनःस्त्रग्व्योमसंपर्काद्धविः कामफलावहः ।

जलस्थलरुहानां वा सर्वेषां हि सुगन्धिनाम् ॥ १५ ॥व्याकोशानां

महाराज्यं कन्यावाप्तिञ्च साधयेत् ।

मृगाननातिलानान्तु सस्यानां प्रसृतिर्मता ॥ १६ ॥

तिलवल्लवणं कर्म सिद्धार्थञ्च हितावहम् ।

हविष्यान्यप्यखण्डानि ग्रासगानीतराणि च ॥ १७ ॥

स्रुवस्रुक्पुष्करस्थापि जुहुयाद् यत्र बन्धनम् ।

सुमनोऽनुजानि सर्वाणि सुमनांसि च सैन्धव ॥ १८ ॥

जुहुयाद्रूपसंस्थानि जल स्थल रुहाणि च ।

कीटकेशदलाम्नालिदूषितानि विवर्जयेत् ॥ १९ ॥

गृह्णीयाच्चाप्यदुष्टानि प्रत्यग्रान्यक्षमाणि च ।

नीचमध्यममुख्यानां सिद्धीनां साधनाय तु ॥ २० ॥

दशद्वादशदष्टाख्यैरङ्गुलैः समिधः शुभाः ।

सर्वमुक्तविपर्यस्तं साधयेदाभिचारिकम् ॥ २१ ॥

नेपथ्याभावजातीनां क्रूरारंभनियोगतः ।

दशपञ्चतद्युग्मैर्वा कुतपैर्विष्टरा मताः ॥ २२ ॥

इध्मानि पक्षशब्दानां अङ्गुलैः सुखदानि तु ।

परिव्यादोर्लतामानाः प्रणीता द्वादशांगुलाः ॥ २३ ॥

प्रशस्ताः देशिकेन्द्राणामग्निकर्मणि कीर्तिता ।

सप्तत्रिंशाङ्गुले क्षेत्रे धूर्यष्टाङ्गुलिविस्तरे ॥ २४ ॥

जीवरेखासमोपेते चतुष्कोणस्वरूपिणी ।

तुर्य विंशाङ्गुलं दण्डमवच्चिद्य ततो ग्रहः ॥ २५ ॥

तिर्यग्रेखा तस्तु कर्तव्यो ह्यष्टपञ्चगः ।

एवं वेदीद्वयं कृत्वा पूर्ववेद्यन्तरंगुलम् ॥ २६ ॥

Sampath_eBooks

दिक्षु सर्वासु संत्यज्य वृत्तं भ्राम्यं षडङ्गुलम्।

वेदी वृत्तान्तरे कार्या रचना जम्बुकादिकाः॥ २७॥

तदग्रं प्रविभज्यादौ युग्मवेदीमुखं ततः।

सूत्रमास्फालयेत् पश्चाज्जीवमास्यांककर्णयोः॥ २८॥

जीवसूत्रान्तरे सूत्रे मूले वेद्यांकसङ्गमात्।

आस्फाल्य करयोर्मध्ये पुनरन्यं तथैव च॥ २९॥

समुल्लेख्यं ततोऽधस्तात् कर्णयोरङ्गुलद्वयम्।

वेदीमूले च दण्डोर्ध्वं समुल्लेखाद् गलाकृतिम्॥ ३०॥

निर्वर्त्य तदधोल्लेखाद् दण्डबाह्ये तु तेन वै।

कुम्भाकृतिकृते काये दण्डमूले ततः पुनः॥ ३१॥

बहिर्दण्डदलोख्याश्वं दण्डार्द्धघण्टिका भवेत्।

तन्मध्ये स्फोटकः कार्यो दण्डाधोऽर्धेन मानवः॥ ३२॥

कर्तव्यो दण्डविस्तारः क्षेत्रषोडशभाजिते।

मध्यस्थभागषट्केन समन्तात् समविस्तरे॥ ३३॥

एषा स्रुची समाख्याता त्र्यङ्गुलोत्खातगर्त्तिका।

षडङ्गुलपरीणाहा सर्पिषः पलतूलभृत्॥ ३४॥

खदिराशोकपुन्नागवैकंकतसमुद्भवा।

श्रीपर्णीशुक्लमन्दारदेवदारुभवाथवा॥ ३५॥

श्रीखण्डशिंशपानन्दीस्पंदचन्दनचूतजा।

भ्रमियन्त्रकृता रम्या शिल्पिना तु क्रियावता ॥ ३६ ॥

निर्मिता कस्य नो लक्ष्मीः स्रुक् प्रसाधयतेऽमला ।

सल्लक्षणः प्रकर्तव्यः शुभोऽप्युक्तद्रुमोद्भवः ॥ ३७ ॥

त्रिरङ्गुलमितं सूत्रं रुद्रभागविभाजितम् ।

शतभागे चतुष्कोणं कृत्वा पूर्वविधानतः ॥ ३८ ॥

तुर्यांशं तदधो भाज्यं मध्यभागद्वयेन तु ।

दण्डविस्तरिता कार्या स्रुग्वत् कण्ठविवर्तनम् ॥ ३९ ॥

खट्वाधो दण्डखण्डेन घण्टिकायाः सुविस्तरः ।

विस्तारस्य चतुर्थांशबहिमानाश्च दीर्घता ॥ ४० ॥

वृत्तकुण्डविभागेन भ्रमात् पुष्करसाधनम् ।

सनासं पुष्करं कार्यं षट्कगोष्पदरूपधृक् ॥ ४१ ॥

मनाचिखा ललाटे स्याद् घण्टिकापि यथास्रुचम् स्रुचः ।

ज्येष्ठपंक्तिसमागर्ता सापि षट्करिषालया ॥ ४२ ॥

स्रुव एष समाख्यातः कल्याणमणिवारिधिः ।

नित्यनैमित्तिके काम्ये होमकर्मणि कीर्त्तितः ॥ ४३ ॥

यदर्थमग्निकार्यन्तु क्रियते साधकेश्वरैः ।तद्वामलक्षणो हन्ति

स्रुक्स्रुवोर्बन्धने बहिः ॥ ४४ ॥

बहिरङ्गा निकायस्य ज्ञातः सल्लक्षणो गिरिः ।

जातिदानविवेक्ता च कामार्थान्ताश्रुतेनृप ॥ ४५ ॥

Sampath_eBooks

त्रिकर्मणि सदा शस्ता जयापाणेर्नमस्कृतिः ।

स्वाहा चैवाग्निकार्यर्थे वषडाप्यायने हितः ॥ ४६ ॥

सत्पुष्टौ क्षुट्तृषोर्हानौ जपे होमे च सैन्धव ।

पूर्णाहुतिसमे ग्लाना वन्याब्धेऽपि चान्तकः ॥ ४७ ॥

वौषड् साधनमायाति शुभे स्वाहा नमोऽथवा ।

समर्थागतसंज्ञा तु मन्त्रकोटिप्रतिष्ठिता ॥ ४८ ॥

भीस्त्रासकृत्प्रकोपाख्यफडंते मारणात्मके ।

जीवसर्गे फलं विद्धि गोदानफलकारकः ॥ ४९ ॥

स्तम्भे जम्भे वधे बन्धे ह्रीं शस्तो वश्यकर्षकृत् ।

वशतुल्याधमा प्रोक्ता सर्वार्थावस्त्र कामदा ॥ ५० ॥

यो गन्तव्याभिधातारी व गन्तव्यभि लोलास्तु प्रददाहदा ।

शेफौ मृते मयाधारे षष्ठोदस्थोऽथमूककृत् ॥ ५१ ॥

किन्तु शक्रसमाकर्षे नामनास्ति निवारणे ।

गो गो गृह्यकरी नित्यं देदेवैटनशीलिनी ॥ ५२ ॥

ने ने नेत्री तथा हे हे तिरस्कर्त्री प्रकीर्तिताः ।

ले ले संग्रहणे शस्तो चे चे चाहरणेऽपि च ॥ ५३ ॥

चे चे संचेदने शस्तो भे भे रोदनपुकरे ।

हा हा विषादकर्तृत्वे खखगैखादनेऽपि च ॥ ५४ ॥

रे रे शत्रुबलध्वंसे हे हे श्रवणकर्मभिः ।

Sampath_eBooks

बिडालवासिने मे मे धे धे त्वंते च धावने ॥ ५५ ॥

जा जा निवारणै- ला ला लालापनयकर्मणि ।

फे फे यनन्तौ क्रूराणां पिशाचग्रहराक्षसाम् ॥ ५६ ॥

ससंबलचिदो हानौक्षं क्षोभं शस्यते ।

आदिमध्यान्तयोगत्वात् साध्यमन्त्रस्य मानव ॥ ५७ ॥

शब्दादर्थक्रियाभावकारिण्योऽनेकजातयः ।

सन्ति तन्त्रे तु भूयस्या मायास्तोकाः प्रकीर्तिताः ॥ ५८ ॥

पदजातिविभागोत्थः क्रूरसौम्यक्रियावहः ।

स चोच्चारविभेदेन बहुभेदः प्रतिष्ठितः ॥ ५९ ॥

ज्ञातव्यः साधकेन्द्रेण कर्मकालविदा सदा ।

आश्चर्य द्रव्यनिष्पत्तिर्मध्यमोत्तमकन्यसे ॥ ६० ॥

सौम्यमेतत् तथा क्रूरं विद्वेषोच्चाटमारणम् ।

स्तंभनं मोहनं चैव मुद्रणं बंधभेदनम् ॥ ६१ ॥

प्रजावर्षंतदाकर्षःशान्तिपुष्टिसुखक्षता ।

चेदनं पाटनं ग्रस्तं नानारुग्दानमेव च ॥ ६२ ॥

एवमाद्यमनिंद्यन्तु कर्म प्रोक्तमनन्तकम् ।

सायं प्रभाते मध्याह्ने क्रूरं मिश्रं शुभं च यत् ॥ ६३ ॥

काले तत्साधितं सर्वं समासन्नफलावहम् ।

वासनामन्त्रकल्पाग्निः सर्वाचर्याविभिन्नता ॥ ६४ ॥

बलापादितयोग्यत्वात् साधनेभ्यः फलप्रदा ।

उक्तमेतदसन्तानमनन्तकविभेदगम् ॥ ६५ ॥

कर्मजातिगुणाकालसंयुतं हविगात्रकम् ।

श्रूयतां च महाकर्णपवनौ गुणसज्जितौ ॥ ६६ ॥ दैशिकेन्द्ररणे वृन्दजिता

नृपतिसत्क्रिया ।

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे

चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यामंग्न्यन्त निगमः

षोडशः पटलः ॥ १६ ॥

सप्तदशः पटलः ॥

श्रीभैरव उवाच ।

अथ ग्रहभयोगानां समायोगाच्छुभेऽहनि ।

सर्वे वा स्वप्रदीप्ते त्रिदोषयुक्तेऽपि शस्यते ॥ १ ॥

नित्ये नैमित्तिके वाथ संक्रान्तिग्रहणादिके ।

योगोऽनुग्रहकृत्स्नानां क्रियमाणो गुरूत्तमैः ॥ २ ॥

स्नानाद्यैः शुद्धकायैस्तु सर्वसंभारसंभृतम् ।

प्रविश्य प्राग्विधानेन मखालयमनातुरः ॥ ३ ॥

ध्यायमानोऽमलां देवीं तदस्त्रं चातिभीषणम् ।

पञ्चवक्रं महाकायं सर्पगोनासभूषणम् ॥ ४ ॥

महाञ्जनचयाभासि पक्वबिम्बरुगीक्षणम् ।

बर्बरेन्दुकलाकारदंष्ट्राटोपमयूखिनम् ॥ ५॥

कपालखट्वागधरं हलशूलगदाधरम्।

फलं प्रत्युपग्रात्युग्रव्याकुलं घोरदर्शनम्॥ ६॥

सितरक्तपीतकृष्णवह्निरुग्घृदयादितः।

कपालशूलखट्वाङ्गहलहस्तं चतुर्मुखम्॥ ७॥

प्रत्याप्यं दृगुद्दिष्टं प्रसन्नं चाङ्गपञ्चकम्।

ध्यानकालेऽपि दातव्यं साधकैस्तत्वदर्शिभिः॥ ८॥

ततः पूर्वोदिते सर्वे स्वासनान्ते सति।

शस्त्रेण शोधयेत् पाणी प्लावयेदमृतत्विषा॥ ९॥

ततः परं तु मिथुने विन्यस्य तलपद्मगम्।

ततस्त्वगुष्ठकादीनि ब्रह्माङ्गानि तु पूर्ववत्॥ १०॥

विन्यस्य देवतान्यासं वामाङ्गुष्ठपुरःसरम्।

सव्याज्ज्येष्ठान्तिकं कृत्वा तलपृष्ठेऽवशिष्टकम्॥ ११॥

वाम स्वस्वामिनीनान्तु दूतीन्यासः प्रकीर्तितः।

वामहस्तकनिष्ठाद्या प्रतिदूतिस्थितिः स्मृता॥ १२॥

फणिबन्धगतं युग्मं कर्तव्यमवशिष्टकम्।

वामप्रदेशप्रथमं सृष्टिन्यायेन पर्वसु॥ १३॥

किङ्कराणां स्मृतो न्यासः सव्ये भूचरवृन्दजः।

शाखाविष्कम्भकस्थायि गणपीठं च मध्यतः॥ १४॥

शिखाङ्गाङ्गिकृते कार्याः प्राणायामाः सधारणाः ।

परे वपुषि सल्लीने सव्यात्मनि समानसे ॥ १५ ॥

चित्तेनापास्तविषयः सृजेन्मन्त्रमयीं तनुम् ।

कृतान्तकरणा प्राग्वद् दिग्वंधे तु कृते सति ॥ १६ ॥

वारामर्घनिधे दीप्तैर्बिन्दुभिर्द्रविणं स्पृशेत् ।

कृतशक्तिकरः कुर्यात् पात्रेष्टिमसमानिकाम् ॥ १७ ॥

अनुरञ्ज्य सुभोग्यैश्च कृतोष्णीशोपपट्टकः ।

योगपट्टकधृङ् मौनी विद्याङ्गार्चितमूर्तिमान् ॥ १८ ॥

वामशक्तिकरः कार्यो जानुकं जलजानि वा ।

मृत्पलाशानि वा कुर्यात् पात्राणि निजसम्भवान् ॥ १९ ॥

दर्भाम्बुमालया कृत्वा सर्पिदध्ने सकृत्पयः ।

सेकश्चापि गवामेतच्चस्यते संभवेऽखिलम् ॥ २० ॥

शैरिमन्तः क्रियाकारि ब्रह्मकूर्चं क्रियावताम् ।

हेतिपिङ्गलकृद्धूलीमूर्ध्वभिः क्रियते क्रमात् ॥ २१ ॥

पञ्चगव्यो घृताघ्र्योऽयं गवां मूत्रावसानकः ।

स्वच्चन्दे युमजेशान वामदेवैः क्रमेण वा ॥ २२ ॥

मालाशतादृते क्षिप्त्वा कुसुमानि सितानि तु ।

दिगङ्गगोपितं कुर्यात् कूर्चपात्रद्वये बुधः ॥ २३ ॥

पवित्रं सर्वपूतेभ्यः शिष्येभ्यो द्रव्यशुद्धये ।

दृष्ट्वामृतप्लुतं स्थाप्य स्वस्थाने तत्पृथक् पृथक् ॥ २४ ॥

निशि ह्युग्रान्तके वाथ पूज्य वास्तु सुराधिपम् ।

उपचारहृदाकूर्चकृतभूमण्डलान्तरे ॥ २५ ॥

खड्गदर्भाभिघातेन लिखितो धूपपूरिते ।

प्राग्वत्ते पात्रतोयेन समीकृत्याभिकुट्टिनः ॥ २६ ॥

मार्जिते ह्युपलिप्ते च दुरालयकृतास्पदे ।

ध्रुवहृन्नामसृष्ट्यन्ते ध्रुवकेन मृगादिभिः ॥ २७ ॥

तत्र पूर्वाग्रदर्भोर्ध्वे वास्तुवीरं प्रपूजयेत् ।

यागान्तः प्रोक्षणं कृत्वा हृदाकूर्चकणोत्कटैः ॥ २८ ॥

अर्घायोभिर्महास्त्रेण मुहुर्वह्निकणत्विषा ।

रजः करणिसूत्रं च तथा शंक्विब्दवान्तरी ॥ २९ ॥

खटिकादन्तकाष्ठानि हृत्प्रजप्तानि मुद्रया ।

पीयूषीकृत्य विकरानस्त्रमन्त्रेण मन्त्रयेत् ॥ ३० ॥

स्थगित्वा सितवासोभिर्मध्ये द्रव्यकदंबकम् ।

ब्रह्मकूर्चकृते वृत्ते हृच्च पारौ कुशान्विते ॥ ३१ ॥

शुभे मण्डलके पूज्यो देवीकुम्भो विपश्चिता ।

समुद्रेन्द्र सवित्र्याय मृण्मयो वासितोज्झितः ॥ ३२ ॥

खटिकापिष्टकाद्यैस्तु सुकर्कः कंठसूत्र धृक् ।

पुन्नागचंपकाशोकमालतीचूतपल्लवैः ॥ ३३ ॥

द्विजद्रुमभवैर्वाथ प्रच्छादितमुखोन्नतः ।
दत्तसर्वान्तिके पीठे दृष्टाम्नायेन सुव्रतः ॥ ३४ ॥
घटोक्तधातुजामेव कर्करिं नरहन्तरि ।
हेतिरूपधरां पीठे ह्यावेशास्त्रेण पूजयेत् ॥ ३५ ॥
कृतसर्वोपचारार्थो ह्यभिमन्त्र्यशतेन तु ।
वासनाद्विकरो ध्यानी वृषोत्थाङ्कावसानकम् ॥ ३६ ॥
भ्रामयेदस्त्रसन्तप्तं तेजः प्राकाररूपिणम् ।
पञ्चगव्ये तु तत्प्रोक्षं सुमनोऽभ्यर्चिते सति ॥ ३७ ॥
दृष्टक्रमेण भंक्तव्या भित्तिर्द्रव्यान्तरस्थिताः ।
सायुधा लोकराजानः स्वमाश्रिताः ॥ ३८ ॥
स्वमुद्रादर्शनाह्लादाः प्रविजृंभितशक्तयः ।
स्वमन्त्रोच्चारसंयुक्तौ प्रभ्रान्तौ वर्धनीघटौ ॥ ३९ ॥
मुहुः साधारगौ पूज्यो ह्यभिनववाससा ।
प्रच्छाद्य भूरिगतौ तु विकिरां संहरेत् ततः ॥ ४० ॥
शस्त्राभिमन्त्रितकुशैः प्रोक्तो रक्षोऽधिपादथ ।
कुम्भमूलं समाहृत्य स्थाप्य ब्रह्मणि मार्जिते ॥ ४१ ॥
कालसङ्कर्षणीमिष्ट्वा रुचिता वरणान्विताम् ।
शतं जप्त्वा नु संधानं वयीयोनवयीयसौ ॥ ४२ ॥
विधायानलसंस्थानमर्घपात्रकरो गतः ।

Sampath_eBooks

प्रागुक्तानान्तु कुण्डानां कृतमेकतमं गुरुः ॥ ४३ ॥

हास्तं नैमित्तिके लिप्तं पुष्पप्रकरशोभितम् ।

संप्रोक्ष्य ताडनं कुर्यादुल्लेख्यो धृतपूरणम् ॥ ४४ ॥

सेचनं कुट्टनं चैव मार्जनं ह्युपलेपनम् ।

वज्रीकृतं च शस्त्रेण कुर्यात् साधारणेन वा ॥ ४५ ॥

प्रोक्षणं खड्गतो येन सम्यगस्त्रेण वाडतम् ।

ज्येष्ठाङ्गुष्ठसमायोगात् कुशाग्रोल्लेखनं स्मृतम् ॥ ४६ ॥

सत्परायुक्तज्येष्ठाभ्यामुत्क्षेपोपशमनं भवेत् ।

पूरणं करयोगेन निषेकोऽम्बुकणोत्करैः ॥ ४७ ॥

दन्तमूलाग्रसंयोगात् कार्ये कुट्टनमार्जने ।

पाण्यवान्मुखसंयोगादुपलिप्ते सुरक्रिया ॥ ४८ ॥

चतसृभिः प्रकर्तव्या रेखाभिः कुण्डमध्यतः ।

आपोमूलेन्दुकुटयस्तिर्यक्कार्या कुशेन तु ॥ ४९ ॥

कालात् सोमान्तिकाच्चैव हृदा शस्त्रेण वा भवेत् ।

निवृत्त्याद्याः कला ह्यासामधिदैवक्रमेण तु ॥ ५० ॥

कुलिशं कल्पयित्वैवं भैरवानुभरक्षमम् ।

ततः पूर्वोत्तराग्रस्थै दर्भैर्मध्ये चतुष्पथम् ॥ ५१ ॥

कृत्वान्यैर्दिक्षु विन्यस्तैः कुर्याद् यवनिकां तथा ।

तद्वच्च मेखलासंस्थैः प्रागुक्तैरुदगग्रगैः ॥ ५२ ॥

हुतभुग्वेष्मनो दर्भैरक्षवाटं प्रकल्पयेत्।

कुण्डमध्ये द्विदर्भाग्रपवित्रकहृदासने ॥ ५३ ॥

विन्यस्य तन्त्रगायत्रीं हृदयेनार्चयेत् ततः।

कीनाशविष्टरस्थायिसुरज्येष्ठप्रपूजिते ॥ ५४ ॥

साधारणपवित्राम्बुभृतां साक्षिस्वरूपिणीम्।

प्रणतामुत्तरे पार्श्वे मेधोधिस्थायिनीं यजेत्॥ ५५ ॥

ततस्तु दर्शितैकेन पात्रेणानीय पावकम्।

लौकिकं चैव गोघ्नानां गृहजे वा महामतिः॥ ५६ ॥

शिवास्त्वभ्युक्षितेनेह हेतिना स्रुक्स्वरूपिणा ।

विष्णुस्तमानन्ददं तममृतीकृतमावृतम्॥ ५७ ॥

पूजयेद् गन्धपुष्पैस्तु मालां मालाङ्गलांचिताम्।

वपुभिर्ब्रह्मभिर्वाथ ख वपुभिब्रह्ममिर्वाथ जुहुयादेकमाहुतिम्॥ ५८ ॥

नोवाहौ सस्यकर्तव्यं प्रक्षेपो मम शुक्रधैः।

भ्राम्य सव्यापसव्यन्तु तेजः शैवं विभाव्य तु ॥ ५९॥

सुलीनः परमे काये मनसा येन सुन्दरि।

निक्षिपेद् योनिं योनौ तु सन्मुखं हृदयेन तु ॥ ६० ॥

ततः संपूज्य प्रज्वाल्य मुद्रां प्रदर्शयेत्।

वह्नेः प्रज्वालनं शस्तं तालवृन्ताद्युपस्करैः॥ ६१ ॥

गर्भाधानेऽथसीमन्ते जातकर्मणि संज्ञिते।

एकास्तिस्त्रोऽथवा पञ्च जुहुयादाहुतीर्हृदा ॥ ६२ ॥

तेनैवार्घं प्रदातव्यं पञ्चानां ब्रह्मपञ्चकम्।

विद्याङ्गपञ्चकं वाथ क्रमाद् योज्यं हृदार्चने ॥ ६३ ॥

सीमन्तोन्नयनस्यान्ते वक्त्राणि परिकल्पयेत्।

वक्त्रैरेव च सन्धानं निष्कृतं नेत्रकल्पनम्॥ ६४ ॥

मध्यप्राग्याम्यसौम्याप्यवक्त्राण्यग्नेः प्रकल्पयेत्।

ऊर्ध्वसव्येन चक्षुषः शस्यते स्थितिः ॥ ६५ ॥

जातस्य शिखिनः कार्या रक्षाकुशविवेष्टनात्।

प्रागग्नेरुदग्नेश्च प्रत्यग्रेरप्यखण्डितैः ॥ ६६ ॥

दर्भैः संस्तरणं कुर्यात् कुण्डस्य परितः स्थितैः।

कुशसंस्थापितो हूतकुशैश्च परिवेष्टितैः ॥ ६७ ॥

कुशापोविन्दुसंस्पृष्टैर्मन्त्रहीनोऽपि सिद्ध्यति।

उदुम्बराञ्च ब्राह्मीं च परिदद्यात् सपल्लवाम्॥ ६८ ॥

ततः पूर्वोत्तराग्राणि विष्टराणि समानि तु।

ऋजूनिबाहुमात्राणि वैन्याकाराणि विन्यसेत्॥ ६९ ॥

अन्तर्गमेखलापृष्ठे परिधीर्मेदिनीतले।

पूर्वोत्तरदिगग्रस्था विष्कम्भा पविभाव्यसौ ॥ ७० ॥

ततो विष्टरपृष्ठस्थां हृदा देवीं प्रपूजयेत्।

मेधः समेधसा बिन्दुराश्यवस्थानसंस्थितौ ॥ ७१ ॥

कालीन्दुकौ महाकालं व्यापीं चाभ्यर्चयेद्धृदा ।

बहिर्हिनि गणैः पूज्यः कर्कशाद् योऽतिकर्कशः ॥ ७२ ॥

व्याधामं शक्तिदण्डञ्च कृपाणसुरगध्वजः ।

कुब्जं वा लकुटीं शूलं रथाङ्गं सुसरोरुहम् ॥ ७३ ॥

ततः प्रोढयाद्य वक्त्राणि नेत्राणि च स्ववर्णभिः ।

लालापनोदनं कार्यं सर्वास्येंऽशुक्रमेण तु ॥ ७४ ॥

प्रादेशसम्मिते ध्याभिराज्योक्ताभिर्निजाननैः ।

ततो वक्त्राभिघारश्च स्वमन्त्रैराहुतित्रयात् ॥

ऊर्ध्वा ह्येकाहुतिर्देया नेत्रकर्मणि धीमता ।

सर्वास्येषु ततः पूर्णा नामकर्मावसानतः ॥ ७६ ॥

हुनेद् गम्भीरचैतन्यः समन्वागतवौषडम् ।

प्रदत्तार्घः क्रियाजालं दर्शयित्वा सितस्रजा ॥ ७७ ॥

अञ्जलिं प्रक्षिपेद् वह्निं सदामण्डलमध्यतः ।

संस्कारपूरणायै था पूर्णाय क्रियते क्रिया ॥ ७८ ॥

सा विशुद्धेन हविषा वक्त्रे वै मध्यमे स्मृताः ।

दिव्याग्निं भैरवाग्निं वा नात्येवंकल्पिते सति ॥ ७९ ॥

तस्योद्धारः प्रकर्तव्यश्चरसंश्रयणं प्रति ।

अथवा प्रागुपाख्याते वह्नौ सर्वविधिर्मतः ॥ ८० ॥

शताभिमन्त्रिते वाथ विद्यावीजां गमागतिम् ।

आनीतोऽभ्युक्षितो वाथ सकृज्जप्तोऽक्षमालया ॥ ८१ ॥

जयत्येकतमेधाम्नि ज्वलत् सर्वक्रियावह ः।

न च व्यासक्रियोक्तानि विष्टरादीनि योजयेत् ॥ ८२ ॥

रक्षात्रास्त्रमयी नोक्ता संक्षेपे विस्तरेऽपि हि।

सर्पिषोऽधिस्मृतस्तस्माद्दुग्धस्योत्प्लवसंप्लवः ॥ ८३ ॥

अवद्योत्येक्षणं चैव नीराजमभिमन्त्रिणम्।

सर्पिर्भोगाभिधारौ च दशैतान्याज्यशुद्धये ॥ ८४ ॥

शिखिनः सहाकलोपेता योऽधिःश्रयणं महत्।

प्रदक्षिणविवर्तांश्च कुण्डनाभिप्रतिष्ठितम् ॥ ८५ ॥

तद् बद्धासनसंप्रोक्तं प्रादेशा वर्ष्मणापि च।

बर्हिषां गुष्ठनामा च श्रितेनोभयहस्तयोः ॥ ८६ ॥

सव्यदक्षिणयोगेन मूलेऽग्नेः पात्रसर्पिषि ।

पराङ्मुखं त्रिधोत्पूयं हृदा वह्नौ विनिक्षिपेत् ॥ ८७ ॥

एतदुत्प्लवनं प्रोक्तं संप्लवः संमुखो भवेत्।

हृज्जप्तक दृशा लोकादेव लोकनमिष्यते ॥ ८८ ॥

कुशकोटिं त्विषा दीप्य घृतमुद्योत्य तेन तु।

तदवद्योतनं नाम नीराजनमथोच्यते ॥ ८९ ॥

हृत्प्रदोपकुशभ्रान्त्या तदाज्योपरि जायते।

विमलाशताभिजापादभिमन्त्रणमिष्यते ॥ ९० ॥

पञ्चाशद्वादशार्द्धं वा सप्तजन्ममथापि वा ।
सर्पिर्भागतः कुर्यात् पात्रान्तं दर्भसंक्रमात् ॥ ९१ ॥
तत्वतन्नाडिविपुलं मध्यसव्यापसव्यतः ।
वस्वंशुमालिदेवान्तःकरणं संस्थितेष्वथ ॥ ९२ ॥
अग्नीषोमप्रयोगेन जुहुयादाहुतित्रयम् ।
सितासितविभागञ्च विज्ञात्वा पक्षयोर्द्वयोः ॥ ९३ ॥
सोमसूर्यप्रयोगोक्तेः पीठः कार्यो विपश्चिता ।
उभाभ्यां चैव संयोगाद्दक्षिणोत्तरमध्यतः ॥ ९४ ॥
स्रुवेनोक्ताहुतौ वह्नेर्नेत्रेषु जुहुयात् क्रमात् ।
स्वान्तमाहुतिमग्नौ तु तद् बिन्दुं हेतिमात्रतः ॥ ९५ ॥
अर्कापांशुवह्नीनां संपातादमृतीभवेत् ।
ततोऽमृतमयाज्यस्य प्रजप्तैर्विंशदैः कणैः ॥ ९६ ॥
भाण्डस्थघृतनिक्षिप्तैः प्रोच्यते ह्यभिघारणम् ।
स्रुग्भाण्डमथ संगृह्य हृदाभ्युक्ष्य प्रजप्य च ॥ ९७ ॥
गन्धसत्कुसुमैर्नाज्यं सूपविष्टोत्थितोऽथवा ।
त्रिराविध्य प्रताप्यादौ ज्वालीयं भ्रामयेत् ततः ॥ ९८ ॥
कुशाग्रेण तु संस्पृश्य तदग्रं तापयेन्मुहुः ।
त्रिराविध्य च दर्भाणां मध्यं मध्येन संस्पृशेत् ॥ ९९ ॥
पुनः प्रताप्य संभ्राम्य कुशमूलेन संस्पृशेत् ।

मूलं सव्यगृहीतेन ह्रुडयेन शिवादिना ॥ १०० ॥

नमोऽन्तेन ततः साध्ये कुशप्रस्तरणोपरि ।

प्रोत्तानावाङ्मुखस्थौ तु स्रुक्स्रुवौ पूजयेदधृदा ॥ १०१ ॥

हविशुद्धेन हविषा घृतशूद्धे विभावसौ ।

सर्पिःपूरःस्रुवं पूर्णां हुनेत् पूर्णमनोरथान् ॥ १०२ ॥

स्रुवामवाङ्मुखां स्थाप्य स्रगूर्ध्वसमवस्थितः ।

स्रुङ्मूलं नाभिदेशे तु स्थाप्य सव्यकराहृतम् ॥ १०३ ॥

कुम्भावर्गितरं कृत्वा स्रुगग्रण्यास्त्रसंप्लुतः ।

एकचित्तो ह्यसौं गूढतत्वध्यानसमायुतः ॥ १०४ ॥

प्रणवादिवौषडन्तां पूर्णां दद्यात् सदा गुरुः ।

दीप्तपिङ्गलकृष्णार्चिर्ज्वालिन्यः किरणाभिधाः ॥ १०५ ॥

सल्लेलिहान जिह्वास्तु भाभिरादीप्तमुज्ज्वलाः ।

वह्निसम्यगभिध्यात्वा सौम्यरूपं कुमारकम् ॥ १०६ ॥

ज्वालास्यं पिङ्गलं नेत्रमुत्तानं पञ्चवक्रकम् ।

ततस्तु जुहुयात् पूर्णां सरवकर्मप्रपूरणीम् ॥ १०७ ॥

सागरीं तत्वकलनां भास्वतश्चैव भावतः ।

तेजोऽमृतसमापूर्णां निष्कम्पा तत्वतल्लया ॥ १०८ ॥

स्वान्ता चलाधरा वाथ या पूर्णा सा प्रपूरणी ।

कर्मणामितरां राजन्नग्निकर्मफलावहा ॥ १०९ ॥

किङ्कणी कांसिका मुखपूर्णापाते महामतिः।
सदसत्स्वरूपधातारीमग्निज्वालानुमानतः ॥ ११० ॥
लक्षयेत् साधनविधौ दीक्षाकाले तथैव च।
वर्णगन्धस्वरावर्तभङ्गास्य रसना शिखा ॥ १११ ॥
वह्नेः संलक्षयेद्रूपचयच्चाया समन्वितम्।
कुन्देन्दुस्फाटिकाञाभो मुक्ताफलसमर्पबह ॥ ११२ ॥
क्षीरोदफेनरुग्वह्निः शान्तिकर्मणि शस्यते।
जपारोचकसच्चायः प्रद्मरागसमप्रभः ॥ ११३ ॥
पाकादचलभिद्गोपनिभो वश्याहुतौ शुभः।
मरुधनुराभासः कुनटीरोचनप्रभः ॥ ११४ ॥
निशाकुङ्कुमबालार्कस्वर्णाभश्चापि पुष्टये ।
इन्दीवरतमालालिकवलाञ्जनरुक् चविः ॥ ११५ ॥
काचनीलगलग्रीवानीलस्पन्दस्त्रगुज्ज्वलः ।
शीघ्रं साधनहुत्प्रोक्तं पिण्डं चत्वारिकर्मणा ॥ ११६ ॥
अपाण्डुधूमकृष्णाग्नि सितो रक्तस्तथासितः।
नानावर्णधरो रूक्षः शस्तोऽनिष्टो न शोभनः ॥ ११७ ॥
सुगन्धद्रव्यसंपृक्तः सुरश्रीफलसर्पिषा।
सुगन्धपुष्पजातीनां तुल्यगन्धः शुभोऽनलः ॥ ११८ ॥
वलाकाकटद्रव्याणां मूत्रोत्सर्गपरिमलः।

विष्करादग्धपक्षाणां गन्धमुक्तोऽपि नेष्यते ॥ ११९ ॥

उदन्वन् वारिधिरववीपञ्चीमुरजध्वनिः ।

दुन्दुभीतरथध्वानः प्रशस्तः सर्वसिद्धये ॥ १२० ॥

चटश्चटमुहुःशब्दो विस्फुलिङ्गगणाकुलः ।

श्रुतेर्विरसघोषश्च प्रोक्तो हविरसिद्धिदः ॥ १२१ ॥

मुखात्प्रदक्षिणावर्त्तौ दीप्तिमान् सुमनोरमः ।

ज्वालाहीनोत्तरावर्त्तसस्फुलिंगश्च निर्मितः ॥ १२२ ॥

संहतोदयकल्लोला मलाभङ्गिशुभावहा ः ।

कुत्सितास्तरसाविष्टा बाह्याधः प्रविसर्पिणः ॥ १२३

पञ्चवक्त्रानलास्यानि पृथक्कर्मफलानि तु ।

मलभिर्वदनं शस्तमेनो दाम्नो विलुम्पयेत् ॥ १२४ ॥

जन्मजन्मनि संस्कारान् जननादीन् मुखान्तरे ।

कुर्यादशेषशुद्ध्यर्थं प्रायश्चित्तं च दक्षिणे ॥ १२५ ॥

मध्यास्ये पातयेत् पूर्णास्तथास्तुतिमलाहुतीः ।

मुखरूपमविज्ञाय जुहुयाद्यन्यतस्तु यः ॥ १२६ ॥

स विनश्यत्यकालेन दृष्टादृष्टफलच्युतः ।

मूर्ध्नि वै ध्वजसंपातो हृदये तु धनक्षयः ॥ १२७ ॥

पार्श्वयोर्वधुनाश स्यान्मूले चैव धनक्षयः ।

तस्मात् सर्वप्रयत्नेन संस्मृत्य मनसा मुखम् ॥ १२८ ॥

Sampath_eBooks

तत्रैव जुहुयात् पूर्णां प्रायश्चित्तकृताधनः ।

कौशिके श कला ह्युग्रतेजोन्तःसंप्रतिष्ठिताः ॥ १२९ ॥

तप्ताःसंलक्षयेज्जिह्वाः शुभाशुभफलप्रदाः ।

आर्कशुल्वाणि राजाश्मशङ्खासृक्सर्ववर्णकम् ॥ १३० ॥

धर्मार्द्धे सेन्दुकालस्ते वृद्धिदस्तु हुताशनः ।

आसामधीश्वरा ः ह्येते क्रमशः संव्यवस्थिताः ॥ १३१ ॥

फलघ्नी धनदा शान्तिः सर्वगोत्रक्षयंकरी ।

कुलवृद्धिप्रदारोग्या सप्तमी सर्वकामदा ॥ १३२ ॥

ग्रहाधिष्ठानभूतेषु द्वे जिह्वे पूर्वपश्चिमे ।

धर्मराड्च्युतदैवत्ये सर्वतो विघ्नकारके ॥ १३३ ॥

ता विहाय शुभास्त्वन्यास्ताभ्यः श्रेष्ठास्तु मध्यमाः ।

धर्मकामार्थसंपत्तिः सिद्धिदा मोक्षदा मताः ॥ १३४ ॥

प्रोदग्रशिखराः स्निग्धाः संहता धूमवर्जिता ः ।

प्रदक्षिणोद् धूतभयाः संहताश्चार्थसिद्धये ॥ १३५ ॥

संहतांतरचिद्रो वा व नास्ति वामावर्त्ता सरञ्जसा ।

धूमावर्त्ति विरालोग्रा चिन्ना भिन्ना ह्यसिद्धिदा ॥ १३६ ॥

शिखिनः शिखा प्रवोध्या वह्निकर्मणि साधकैः ।

वैजयन्त्यब्जचत्रा दृतोरणा रामरूपधृक् ॥ १३७ ॥

तार्क्ष्यहंसमयूरेभकुम्भानां च हितो नलः ।

Sampath_eBooks

निर्मितश्च शृगालार्क्षकरालो नगरूपधृक् ॥ १३८ ॥

शार्दूलमहिषोष्टाणां प्लवङ्गानां च सुव्रत ।

अतिपाकेतिवृद्धेन जुहुयात् पावकेन चित् ॥ १३९ ॥

मध्यमे यौवनस्थे च होतव्यं निश्चितात्मना ।

मताः : प्रज्वलिता शाखा युवा सम्यक्सनिश्चितः ॥ १४० ॥

पञ्चाषीविषशान्तार्चिर्मध्यमोऽसौ हुताशनः ।

भूयोऽङ्गारप्रसन्नार्चिर्निष्प्रभ भूरिभस्मधृत् ॥ १४१ ॥

अवपुर्धा न विध्वस्तः पावकः स्मृतः ।

सम्पिण्डितघनार्चिष्मान् स्निग्धच्चायैकदेशतः ॥ १४२ ॥

भवेत् सोष्मप्रदस्तेजीविपर्यस्तो विलोमदः ।

महद्धोमेन्धना गन्धो रूपत्वात् तत्स्वधर्मतः ॥ १४३ ॥

शब्दो मधुररुक्षो वा नासौ दोषकरः स्मृतः ।

यादृशं फलमागामि शुभं वा यदि वाशुभम् ॥ १४४ ॥

तादृशं दर्शयेद्वह्निरावर्त्तार्चिःशिखादिभिः ।

आवर्ताः मूलभागे तु मध्यभङ्गा : प्रतिष्ठिताः ॥ १४५ ॥

वक्रजिह्वा शिखाश्चैव क्रमेणौर्वोग्रभागगाः ।

वक्रद्वितीयगे भागे जिह्वा सा च शिखानले ॥ १४६ ॥

आननं हृदयं पादौ भागभावेन कल्पयेत् ।

वर्णावर्त्तशिखादीनां विपरीतप्रदर्शनात् ॥ १४७ ॥

Sampath_eBooks

पञ्चाहुतिप्रदानेन मालयास्यास्थभावहम्।
कर्मिणा कर्मसंयोगो पञ्चवक्रानलस्थितिः ॥ १४८ ॥
पाल्योऽयं कुण्डवक्रो वा तेजोमूर्त्तिर्विभावसुः।
चललोलस्वभावस्थो येभ्यस्तेभ्यश्च सर्वदः॥ १४९॥
बिन्दुरूपो हविर्येषां शक्तिवक्रो विकल्पगः।
कर्मणः साधनं तेषां भावः शान्तः प्रशान्तकः॥ १५० ॥
विकल्पाभ्यर्थचित्तानां तथा वै निश्चितात्मनाम्।
न फलायंति कर्माणि कुसुमानीव चक्षुषाम्॥ १५१ ॥
क्वचिदेतैर्विनिर्मुक्तः सिक्तो जप्तस्तथैकदा।
मन्त्ररूपधरो वह्निर्भवेदिच्चाफलप्रदः॥ १५२ ॥
शिवशक्तिसमुच्चारात् तदन्ते स्थिरयोगतः।
तत्तन्मयं भागचिराद् बहिः स्फटिकवद्भवेत्॥ १५३ ॥
यतः सर्वामराधारो विश्वात्मा विश्वतोमुखः।
ज्योतिषामपि तज्ज्योतिः परमात्मा स एव तु ॥ १५४ ॥
परोऽग्निर्योगजः प्रोक्तश्चन्द्राग्निर्देवतात्मकः।
ब्रह्माङ्गानिर्जराग्निश्च ह्येक एव परोऽव्ययः॥ १५५ ॥
यन्मन्त्रदेवतायुक्तस्तद्दैवत्यो भवेद् विभुः।
ज्ञात्वा त्वेवं परिणतिं ततो होमं समारभेत्॥ १५६ ॥
एवमेकतमस्थित्या निजत्वे भैरवानले।

Sampath_eBooks

पूर्णापाते कृते योनिं तर्पयित्वा विसर्जयेत्॥ १५७ ॥

योनिन्यासेन चान्यत्र बहुवह्निं विहाय तु।

दैशिकेन विधातव्यो भैरवागमवेदिना ॥ १५८ ॥

रसवत्यां कृतां वह्निः प्रवृत्तं हरिवेश्मनि।

सूत्रितायां सुलिप्तायां स्थण्डिलस्य मरुत्पतेः॥ १५९॥

प्रत्यग्धर्माननायां वा तत् स्थालीं घटान्वयाम्।

सूत्रितां शस्त्रतो येन क्षालितां कूर्मसाधिताम्॥ १६०॥

पूर्णान्तरस्थायिचक्रालातवत् प्रविलाञ्छिताम्।

गर्भावघोतनां शुद्धां सर्पैर्दिग्धासु निर्व्रणाम्॥ १६१॥

समाध्यापिते पयसि प्रक्षिपेत्तण्डुलास्तथा ।

चालनोद्घाटने कुर्याद्धृदयेन समाहितः॥ १६२॥

त्रिभागास्थितमालोक्य घृतपूर्णस्रुवेण तु।

उष्णाभिघारं जुहुयाद्धृद्ब्रह्माङ्गैरथार्चया ॥ १६३॥

सकुशे स्थंडिले स्थाप्य मार्जितामवतारिताम्।

उष्णधारविधानेन शीतधारे कृते सति॥ १६४॥

कुण्डोपमण्डले स्थाल्यां संपात्याहुतियोगतः।

स्वाहाग्नौ च चरोऽनंतश्चरुपे यूथतां व्रजेत्॥ १६५॥

पञ्चाहुतिगतिं युग्मं संपातः पञ्चविंशगः।

द्रव्यचुम्वकचित्तानां वशाद्बहुलयोगतः ॥ १६६॥

Sampath_eBooks

कर्मणामाहुतिविधौ तन्त्रेऽस्मिन् रावणार्चिते ।

ततो मृतमयं ह्येतत्त्रिविभक्तं समाचरुम् ॥ १६७ ॥

एकैकं दीक्षमानस्य प्रसृतित्रयनिर्मितम् ।

दद्यान्नैवेद्यपूर्णन्तु त्रिचक्रस्यांशयुग्मके ॥ १६८ ॥

पशुस्तोमाय चान्यन्तु सर्वाभाग्यापनुत्तये ।

ततो विभिन्ने भिन्ने वा मन्त्राद्यभ्यर्चने कृते ॥ १६९ ॥

दृष्टाम्नायेन कर्तव्यं मन्त्रसन्तर्पणादिकम् ।

त्रितयं सन्धयित्वा तु नैवेद्योक्तकृतक्रियः ॥ १७० ॥

बलिं दत्वा च वीरेभ्यो योगिनीभ्यो हृदात्मना ।

मातृभ्यो भूतसत्वेभ्यः क्रूरेभ्यः क्षेत्रपाय च ॥ १७१ ॥

भवादिना त्वनुदिनं हृदा कर्माणि कारयेत् ।

एषां मन्त्रा ः मया प्रोक्ताः कालसङ्कर्षणीमते ॥ १७२ ॥

एतत्सर्वगतं प्रोक्तं स्वगुरुः सम्यगुपोषितः ।

तान्त्रिकोऽप्यस्वतन्त्रस्तु तस्य स्वेच्छाविधिर्मतः ॥ १७३ ॥

शिवमन्त्रात्मचैतन्यस्फुटानुभववर्जिते ।

धनं क्रमक्रिया कालो यन्त्रणाभिहिता गुरौ ॥ १७४ ॥

ततः संप्रोक्षितं ताडयस्त्रजासौदामिनीत्विषा ।

शिरस्यताडय मेधावी विमलेनास्त्रभस्मना ॥ १७५ ॥

हृद्युल्लिख्य कुशाग्रेण संलिखेच्च ततोऽप्यधः ।

षडङ्गांगीकृतं पूज्य गन्धाद्यैः कर्मणामुना ॥ १७६ ॥

नादशक्तिसमाक्रान्तं नवधासौ हृताद्दशम् ।

प्रविश्यान्तर्महादेव्या मूर्द्धिर्न पुष्पं क्षिपापयेत् ॥ १७७ ॥

वासोऽपनीय संदर्श्य नामयेत्रिष्वनुक्रमात् ।

चक्रदक्षिणदिग्भागे वर्तुले कुशमालिते ॥ १७८ ॥

न्यस्ता शेषासनायामैस्थाप्य मण्डलके शिशुम् ।

आयामादिशिवेशान्तं कर्मनिर्वर्त्य यत्नतः ॥ १७९ ॥

ततः शिरसि भोगोक्तिं यथादृष्टं समारभेत् ।

मुद्गरी जापयेत्तच्च यथापूर्वं तथा शिशुम् ॥ १८० ॥

एतत्कर्म नवाकर्म भैरवागमवेदिनाम् ।

यतोऽसौ समये जातः शिशुर्देवीप्रदर्शनात् ॥ १८१ ॥

ततोऽधिवासयेच्चिष्यं संपूर्णेन शतेन तु ।

आक्षान्तं शक्तिहस्तेन व्यासान्ते सपवित्रकम् ॥ १८२ ॥

ततो रुचितसंस्थानसंस्थितस्य गुरूत्तमः ।

पाशानां बन्धनं कुर्याच्चिशोर्दीक्षस्य यत्नतः ॥ १८३ ॥

सितसूत्रेण बध्नीयान्मासानग्रेरनूपगे ।

प्रागुत्तराननेवाथ शिष्याङ्कसकलीकृते ॥ १८४ ॥

हृद्गर्भव्याप्यबिंबस्थे प्राङ्मुखो वोदगाननः ।

शिष्यकर्मणि वीरेशःशस्यते ह्युभयात्मके ॥ १८५ ॥

ततः प्रलम्बयेत् सूत्रमुदस्तकरधारितम्।

शिष्येनाङ्गुष्ठकाक्रान्तं सितमालम्भितं हृदा ॥ १८६ ॥

कूर्चभस्मसमालिप्तलाञ्चितं चायुधं नराः।

मालासनाभिजप्ते तु तत्राध्वानं विभावयेत्॥ १८७ ॥

षण्णामेकतमं देवि साधारणमथेतरम्।

न चिता वंर्अणा न्यस्य समभ्यर्च्य सुगन्धिभिः ॥ १८८ ॥

जुहुयात् सन्निधानं तमेकैकस्मिञ्शतं शतम्।

भवनापादनायोगाद्धृदा चैषां क्रिया मता ॥ १८९ ॥

ततस्तु ताडनादीनि कुर्यात् कर्माण्यनुक्रमात् ।

ताडनं चाथ विश्लेषमाकर्षग्रहणानि तु ॥ १९० ॥

द्योतनं वेष्टनं रोधं बन्धनं ह्येतदष्टकम्।

तत्वादिकस्य क्रमशःआद्यं तस्य समाचरेत्॥ १९१ ॥

ताडितं शस्त्रशक्त्या तु विश्लेषः क्षेपमुद्रया।

प्राणपूरणसंयोगाद्धृदाकर्षणमिष्यते ॥ १९२ ॥

अदोग्रहणमिच्चन्ति सदा संहारमुद्रया।

हृत्संपुटसमायोगाद्भव हुं फट् पुटीकृतम्॥ १९३ ॥

योजनं रेचकायामक्रिययोद्‍ भूतयायुतम् ।

हृत्समावेष्टनं कार्यं मालाद्येन निरोधनम्॥ १९४ ॥

नयनाम्वुं संपुटस्थं ध्रुवमूलं फडन्तगम्।

नत्वाघं बन्धयेन्मन्त्री पाशबन्धविधानवित्॥ १९५॥

भुवनानि बध्नीयाच्चाद्ये तु भुवनाध्वनि।

भौवने अध्वनि पुनस्तत्वानां बन्धनं मतम्॥ १९६॥

संक्षेपादथवा कुर्यात् पाशानां कर्मपञ्चकम्।

ताडनं ग्रहणं योगं बन्धनं दीपनं तथा॥ १९७॥

एवमेकतमं बध्वा संहारक्रमयोगतः।

सुलक्षाग्रंथकृत्कृत्वा मूलाग्रे च महामतः॥ १९८॥

पाशसूत्रं शरावस्थमभ्यर्च्य हृदयेन तु।

स्थण्डिलाद्दिशि पूर्वस्यां तद्गुप्तं विनिवेश्य तु॥ १९९॥

ततः प्रदीपयेन्मासानेकैकाहुतियोगतः ।

हुं फट् पुटगतं तत्वं फडन्तं दीपनं मतम्॥ २००

स्वाहान्तं ध्रुवमूलुच्य तर्पणे संप्रयोजयेत्

संपूर्णन्तु शतं हुत्वा प्रायश्चित्तविशुद्धये ॥ २०१॥

पञ्चगव्यमतो दद्याच्छिष्येभ्यः कायशुद्धये।

ततश्च चरुभुक्तेभ्यः सवाचान्तेभ्योऽग्रणे ऋजु ॥ २०२॥

सत्वचं ग्रन्थिनिर्मुक्तमस्थूलमकृशं समम्।

द्वादशाङ्गुलकं दद्यात् सक्षीरं दन्तधावनम्॥ २०३॥

प्रशस्तं साधकाचार्यपुत्रकानामिदं सदा।

समयिनाञ्चैव सर्वेषां दशाङ्गुलसमेन वा॥ २०४॥

Sampath_eBooks

त्रिचतुर्धाङ्गुलं स्त्रीणां प्रशस्तं दन्तधावनम् ।

पञ्चगव्यं चरुं काष्ठं हृदयेनाभिमन्त्रितम् ॥ २०५ ॥

पूर्वामुखस्थितैः प्रार्थ्य वाग्पतेर्दन्तधावनम् ।

भक्षितं क्षालितं भूमौ करवारितसन्मुखम् ॥ २०६ ॥

प्रमुक्तञ्च पुनस्तस्य पातं संलक्षयेद् बुधः ।

सौम्यवारुणपूर्वेण दिक्षुपातः शुभावहः ॥ २०७ ॥

अस्याः त्वरिष्टपातोग्रः शतहोमात् स शाम्यति ।

भृत्यार्घं विधिवद्दत्वा कृते वै नैष्ठिकेऽर्चने ॥ २०८ ॥

प्रणम्याष्टाङ्गविधिना स्तुतिं कृत्वा विसर्जयेत् ।

साधारणान्तरां देवीं स्थण्डिलस्थां महेश्वरीम् ॥ २०९ ॥

बलाहतां धृतिं गर्भे स्त्रक्संहारप्रमुद्रया ।

योजयेद् धाम्नि कुम्भाख्ये स्थानेक्षुद्भवया पुनः ॥ २१० ॥

ततोपलेपिते धाम्नि ब्रह्मकूर्चादिकं स्वयम् ।

संप्राश्याचम्य मन्त्रात्मा क्रिया क्षुणापनुत्तये ॥ २११ ॥

मालयास्त्रेण जुहुयान्निजतोषावसानकम् ।

ततो बद्धशिखाचिष्यान्दग्जक्षेचासमाहितान् ॥ २१२ ॥

भस्मधर्माब्जपत्रेषु शुद्धावासः सुधा प्रिये ।

यागौकसिततस्वाप्या स्वापयेद्विधिवद्गुरुम् ॥ २१३ ॥

ध्यायमानो महादेवीं प्राग्रूपे तु विलक्षिताम् ।

चतुःपाण्यैकवक्त्रां वा मुण्डखट्वाङ्गधारिणीम् ॥ २१४ ॥

धर्ममार्गेण धातारीं महाव्रतप्रतिष्ठिताम् ।

स्वपेद्वीरेश्वरं नाथं स्मरन् देवीस्वरूपगम् ॥ २१५ ॥

गुरुशिष्यसमायुक्तस्तोत्रजल्पकृतादरः ।

इत्ययं विधिरमोघफलोक्तिः प्रोदिता तु युवयोरनवद्यौ ।

वस्तुतः समधिवासनसंज्ञां वच्मि मुख्ययजुषां ह्यपरेद्युः ॥ २१६ ॥

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिशास्त्रे प्रथमषट्के श्रीकालसङ्कर्षण्यामधिवासनाख्यः सप्तदशः

पटलः ॥ १७ ॥

अष्टादशः पटलः ॥

श्री भैरव उवाच ।

अथ शिष्यस्तु विरमेत् सुस्नातः शुद्धवससः ।

प्रणम्य गुरवे स्वप्नं विनिवेद्य शुभाशुभम् ॥ १ ॥

कुञ्जरादिसमारूढः शस्तो शतखरादिके ।

मन्तवो रोदनादिष्टा हास्याद्यारिष्टकाः शुभाः ॥ २ ॥

दृष्ट्यादिनिर्मितामोदाः प्रालेयाः शंसिताः शुभाः ।

असिताद्या विलोमास्तु क्रूरेन्द्रासितशोणिते ॥ ३ ॥

एवमादिवितानास्तु तन्त्रे स्वप्नाः प्रकीर्तिताः ।

सम्यग्विज्ञाय गुरुणा तेऽवधार्याः शुभाशुभाः ॥ ४ ॥

Sampath_eBooks

पुनः स्वप्नाद्यनिष्टानां धारणा ध्यानयोगतः।

शतहोमेन वा शान्तिर्वेदितव्या दुधाणुना॥ ५॥

ततः स्नातो द्विराचान्तः कृतपूर्वक्रियान्वयः।

कृतावश्योभयः शिष्यः प्राक्क्रमेण शिवालयम्॥ ६॥

तस्मिन्न् घटाण्डके पूज्य प्रणम्यावाप्तिसाधकः।

ततः करेण सूत्रन्तु तत् स्थूलमकृशं सितम्॥ ७॥

ग्रन्थिहीनं मृदुर्दीर्घं मन्दिरेण प्रपूज्य च।

घटिकाञ्च ततो मन्त्री सूत्रयेद् गुह्यमण्डलम्॥ ८॥

जयद्रथ उवाच।

नाधिवासो महेशान यागः स्यात् किं शिवागमे।

स्यादुमाव्याप्तदेहार्द्धं ज्ञातुकामा यमेव च॥ ९॥

श्रीभैरव उवाच।

ध्यासाध्यासनियोगानां मनो होमार्चनात्मनाम्।

सर्वेषामेकरूपं स्यात् तत्फलं ह्युभयात्मकम्॥ १०॥

एकद्वित्रिचतुःपञ्चसर्वैर्वा वर्जितो घनैः।

चुम्बकेच्चानियोगेन शिवयागः फलप्रदः॥ ११॥

भैरवक्रमयुक्तानां योगानां काम्यकर्मिणाम्।

सर्पिरग्निसमायोगाशंसिता समयस्थितिः॥ १२॥

वसुहीनेऽपि पुष्पाद्यमवश्यमुपयुज्यते।

Sampath_eBooks

यत् यद्विमानसंकर्म तत् तन्निर्वाणपूजितम् ॥ १३ ॥

मनोरज्जुसमाकृष्टं चैतन्यं स्वगते हृदि ।

निष्कम्यं रेच्य त्रियथाव्योम्ना सा सरसाश्रयम् ॥ १४ ॥

पशवः पतिता यान्ति निश्चितं भाववर्जनात् ।

शिशुं वीक्ष्यापयेत् स्वास्यं तन्मुखं वीक्षयेत् स्वयम् ॥ १५ ॥

तयोः संयोगकाले तु या संवित्तिर्विजायते ।

शिवतत्वमयी सा तु गुरुर्यन्मुक्तिदोण्डषु ॥ १६ ॥

चरतः पौरुषानर्थान्यत्र यत्र क्रिया स्थिरा ।

शिवयोगाववोधे च तत्र तत्र विकल्पतः ॥ १७ ॥

न कस्य पाशविच्चित्तिं कुर्यात् तत्वार्थविद्गुरुः ।

पूजामन्त्रेण पूज्यन्तु होत्र्यं पूजाग्नियोगतः ॥ १८ ॥

वाचिकं मानसं कार्यं त्रिकमप्यमृतपदम् ।

समासव्याससंस्थाने शुद्धेर्भिन्नमनेकधा ॥ १९ ॥

तथाचार्यमताविष्टं साधयेदीप्सितं फलम् ।

पुराधिष्ठानतो मन्त्राः सन्निधानानलात्मनाम् ॥ २० ॥

प्रयान्ति परमामोदं मुदिताश्च फलप्रदाः ।

अन्वगेव क्रियाः कर्तुः सन्ति द्रव्यगुणाश्रयाम् ॥ २१ ॥

तस्मान्न साधनैः साध्यं कार्यमात्महितैषिभिः ।

आत्मा नात्र समाख्यातस्तस्य तुष्टिर्यदा भवेत् ॥ २२ ॥

Sampath_eBooks

कर्तव्य ं गुरुशिष्याभ्यां तत्तदेव हितं स्वतः।

तस्माद्विभवानुरूपाः प्राणिनां क्रतवो मताः॥ २३॥

ते चानियतमार्गस्थाः फलसंसाधकाःमताः।

दुरासन्नप्रकर्तृत्वमेतेषां भेदलक्षणम्॥ २४॥

द्रव्यमण्डलसंयोगात्‌ समग्रात् परिकीर्तिताः।

तद्द्रव्यं कथितं किञ्चित्श्रूयतां पुरलक्षणम्॥ २५॥

अथातः सं प्रवक्ष्यामि मण्डलानां परं विधिम्।

नाम्ना भुवनविजयं वीराभ्युदयहेतुकम्॥ २६॥

पक्ष्यापक्ष्येषु संख्यातैः कोष्ठकैः कुसुमैः शुभैः।

व्यावर्त्तितैः स्वतः कुर्यान्मण्डलाकारवर्तिनाम्॥ २७॥

कोणकोणचतुष्कन्तु कोष्ठकानां विलोपयेत्

ततः पूर्वात् समारभ्य द्वाराणि तु त्रिभिस्त्रिभिः॥ २८

त्रिभिर्निर्वत्य षण्णान्तु सप्तमं मध्यकोष्ठकम्।

विलोप्य कोष्ठमानन्तु कण्ठोद्धारे त्रयं भवेत्॥ २९॥

मध्यमे द्वारकण्ठाभ्यां पार्श्वद्वारै शतान्वितम्।

पक्षेण तु समायुक्तमतो द्वारद्वयं स्मृतम्॥ ३०॥

बहिर्भवनमानन्तु मध्ये गुणमितं समम्।

विंशद्वारं महाद्वारं मण्डलं मण्डलेश्वरम्॥ ३१॥

सर्वसंपत्प्रदं प्रोक्तं तव राजीवलोचने।

कण्ठाच्चादन आरेण कण्ठवाद्याश्च का स्मृता ॥ ३२ ॥

पूराणां मध्यगा ः याश्च ताः सर्वास्तु प्रमार्जयेत् ।

कोष्ठकद्वयमालायां ह्येतत् सर्वं निर्वर्त्य तु ॥ ३३ ॥

तदभ्यन्तरतस्तिस्रः कोष्ठमाला विलोपयेत् ।

सर्वत्र निपुणो मन्त्री मण्डलार्थविशारदः ॥ ३४ ॥

ततः पुंस्तत्वसंख्यातैः कुर्यात् कोकनदं समम् ।

ग्रन्थिभिर्ग्रन्थि वै वीरो योगपीठसमन्वितम् ॥ ३५ ॥

अन्तः कोष्ठार्द्धभागेन योगपीठं विवर्तयेत् ।

ततोऽन्तर्योगपीठस्य पीठांशं वसुलक्षणम् ॥ ३६ ॥

परित्यज्य समं वृत्तं भ्राम्य तन्मध्यविस्तरम् ।

भावयित्वा चतुर्धा तु समवृत्तानि कारयेत् ॥ ३७ ॥

प्रथमं तु दलाग्राणां द्वितीयं सन्धिहेतवे ।

किञ्जल्कानां तृतीयन्तु नाभ्ये कल्पं चतुर्थकम् ॥ ३८ ॥

कोणरेखानिपातेन रेखातुर्ये कृते सति ।

जीवकर्णान्तरे रेखा ः समादेया विपश्चिता ॥ ३९ ॥

आशापाशगताभिस्तु तिसृभिर्मलनिर्णयः ।

रेखाभिर्जायते वत्स समन्ताच्चु कुशेशयम् ॥ ४० ॥

सङ्गमे तु करं स्थाप्य दिग्रेखा सन्धिवृत्तयोः ।

द्वितीयामुपरिरेखां सन्धिसङ्गमसंस्थिताम् ॥ ४१ ॥

Sampath_eBooks

भ्रामयेत् परिधीतुल्यं सुवृत्तं चलकारकम्।
एवं पत्राष्टकं कार्यमर्द्धद्वादशतुर्यकम् ॥ ४२ ॥
प्रोदिताद् द्विगुणैः सूत्रैर्द्विगुणां वाथ कारयेत्।
वर्त्तयेद् द्वादशारं वा भाविलक्षणवर्तनात्॥ ४३ ॥
सुशुभ्रं पङ्कजं रम्यं कालसंकर्षणीप्रियम्।
महेश्वरक्रुधा पाण्डुरक्तपीतास्तु पादकाः ॥ ४४ ॥
योगपीठं सितं कार्यं यथाशोभमथापि वा।
दलसंधयो बभ्रवस्तु तत्पत्रान् पञ्चजानि तु ॥ ४५ ॥
वृत्तपादादिकं कार्यं स्वकीयं ह्यात्मसंपदा ।
सन्ध्यारागनिभं वृन्दं केसराभ्यां नृपान्तिमम् ॥ ४६ ॥
सुरकोटिमितं कार्यं षोडशाराब्जविस्तरम्।
सितं पीतं च कर्तव्यं मूलशृङ्गविपक्षया ॥ ४७ ॥
प्रोक्ता दलेषु युग्मन्तु त्रिकमीशदले भवेत्।
कर्णिकोन्नतविस्तारा जातरूपनिभा समाः ॥ ४८ ॥
तन्मध्ये नवबीजानि हरित्पांशागतानि तु।
मध्येऽवसानिकं कार्यं वीराभ्युदयपङ्कजे ॥ ४९ ॥
एतद् भुवनविजयं पौलस्त्येन प्रपूजितम्।
पार्वतीवल्लभं रम्यं सर्वैश्वर्यप्रकाशकम्॥ ५० ॥
मण्डलं मण्डलानान्तु मण्डलं मण्डलान्तिकम् ।

Sampath_eBooks

वाहयेन् मध्यमं द्वारं दक्षिणस्यां दिशि सदा ॥ ५१ ॥

निधिप्रच्चादनी शोभा वेदीवृत्तावगम्यते ।

वैद्यादीनां पुराणान्तु शोभाः सुवपुषो मता ः ॥ ५२ ॥

स्वेच्चया मानवर्णञ्च चित्रं चापि प्रकल्पयेत् ।

एकहस्तं द्विहस्तं यदेकवर्णं तु कारयेत् ॥ ५३ ॥

त्रिहस्तं तु त्रिभिर्वर्णैः पूर्यविधिविस्तरम् ।

श्रुतिहस्तात् समारभ्य यावदङ्गुलसंख्यगम् ॥ ५४ ॥

चतुर्भिर्वर्णकैश्चाद्यैस्तुर्यरेखाक्रमेण तु ।

सिता रक्ता तथा पीता मेचका ः समलक्षणाः ॥ ५५ ॥

सिता नामसमा कार्या शेषाह्स्वेन्दुह्रासकाः ।

अन्योन्यस्य सदा कार्या असंसक्ता यवार्द्धतः ॥ ५६ ॥

वर्णका वर्णके ग्राह्या विकल्प्य च सितासिताः ।

युतायुतविभागेन रूक्षतैश्च विवेचयेत् ॥ ५७ ॥

यथासंभवसंप्राप्तै रजोभिः पुरपूरणम् ।

भङ्गरेखा विलुप्यन्ते कर्त्तव्यं दैशिकेन तु ॥ ५८ ॥

ईषद्दुत्कृष्य चोत्कृष्य मध्याङ्गुष्ठाङ्गुलित्रयात् ।

प्रकुर्याद्रजसः पातं रजो वै भावयेत् कलाम् ॥ ५९ ॥

तर्जन्यङ्गुष्ठयोगेन दण्डबिम्बप्रयोगतः ।

पुष्ट्या वा सुसमां रेखां शनैरापूरयेद् बुधः ॥ ६० ॥

Sampath_eBooks

पर्यन्तर्सर्पितायाच रेखा मध्यमसन्निधिः।

वर्णक्रमान्यतो यान्तु लोहितायां तथैव च॥ ६१॥

प्रमृज्य पूरिका यान्तु प्रोक्तदोषानवाप्नुयात्।

स्वराष्ट्रस्य भवेत् पीडा दुर्भिक्षव्याधितस्करैः॥ ६२॥

राष्ट्राधिपे महद्दुःखं मानसं जायते ध्रुवम्।

तत्र शान्तिं प्रकुर्वीत मन्त्रैर्घोरप्रशामकैः॥ ६३॥

धारणाध्यानसंयुक्तैः स्तोत्राध्ययनमङ्गलैः।

तत् स्यात् सदा प्रसन्नैकाग्रचेतसा ॥ ६४॥

निरुद्वाग्रैररूक्षैश्च रजसः पातनं शुभम्।

देवतागुरुभक्तैश्च तत्वयुक्तैरमत्सरैः॥ ६५॥

लेख्यं मण्डलराजानं निरुद्विग्नो जितेन्द्रियः ।

न च ग्राम्यकथासक्तैः शक्तियोगविवर्जितैः॥ ६६॥

न कौतुकार्थनिरतैर्भ्रान्तचित्तैरनावृतैः ।

लिङ्गिभिर्वर्णाश्रमिभिः भ्रातृभिः सहपुत्रकैः॥ ६७॥

कर्णिकोत्तुङ्गरूपास्तु कर्णिकायां च केसराः।

केसरेभ्यश्च पत्राणि पत्रेभ्यः प्रतिधारणाः॥ ६८॥

वृत्तं तस्यास्तु तत् पीठं पीठाद्रेखास्तु मण्डलाः।

अन्योन्यापेक्षया सर्वाः क्रमान्न्यूना भवन्ति हि॥ ६९॥

भूयोभिरथवैकेन रजसा पूरिते सति।

धाम्नि मार्गप्रदेशांस्तु मार्जयित्वा महामतिः ॥ ७० ॥

पूर्ववत्कृतनित्योक्तिः सर्वसंभारसंभृतम् ।

सन्दिश्य यागनिलयं मन्दिरेऽर्चावसानतः ॥ ७१ ॥

अर्घपात्रादिकं कृत्वा स्वालङ्कारावसानकम् ।

संपूज्य कर्करीं कुम्भनाम्ना क्रमयोगतः ॥ ७२ ॥

दिक्पालसन्निधिं कृत्वा विरम्य घनमादरात् ।

ततः कुर्यात् कलान्यासं रजसापाङ्वनुक्रमात् ॥ ७३ ॥

पूजयेद् भैरवीमब्जे कर्णिकासनसंस्थिताम् ।

इष्टावरणसंयुक्तामशेषैर्वा समायुताम् ॥ ७४ ॥

रथकेतुविरामन्तु हरेर्देव्या दलस्थिता ।

दलसन्धिगता दूत्यस्तत्प्रेष्याश्च दलाग्रगाः ॥ ७५ ॥

पूजयित्वा क्रमः कार्यः पीठान्ते किङ्करादिषु ।

द्वारेषु द्वारपालाश्च पूजाभाजो भवन्ति हि ॥ ७६ ॥

कंका महार्धः सुमुखो दन्तुरो रोषकाननः ।

अग्निकः पटहाक्षश्च घण्टाकर्णोऽथ खिंखिणः ॥ ७७ ॥

अलात्चक्रीघं घोरो ज्ञेयचामुण्डिकोत्तमः ।

प्रोक्तस्त्रिक्रमसंयोगाद्वरिष्ठां तां प्रपूजयेत् ॥ ७८ ॥

युक्तकोटिनमौलीन्दुं समस्तां मुद्गरायुधाः ।

ततः कर्मणि निर्णीते मण्डले पूजयेद्धविम् ॥ ७९ ॥

मन्त्रमण्डलयोः कार्यं तर्पणं मन्त्रदीपनम्।

अधिष्ठानविहीनन्तु स्वाहान्तं मन्त्रतर्पणम्॥ ८०॥

तपसा साधिके चैव संस्थितं पुरतर्पणम् ।

हुं फडन्तासनध्वस्तभवादीनां प्रदीपनम्॥ ८१॥

संवित्तिं चापि मन्त्राणां कृत्वा शिष्यं प्रवेशयेत्।

ततः प्रक्रमसंयोगात् पुष्पपाते कृते सति॥ ८२॥

शक्त्यन्ते कल्पिते धाम्नि दीक्षारम्भं समारभेत्।

यथोपसन्नरूपेभ्यो वर्णिभ्यस्ताण्डमादरात्॥ ८३॥

सव्यतः स्थापिते शिष्ये षडङ्गाङ्गीकृते शुचिः।

न्यस्तदक्षिणहस्ते तु दर्भाग्रं तु समर्पयेत्॥ ८४॥

दर्भमूलं स्वजङ्घाधश्चान्तरे सन्नियोजयेत्।

पश्चात्मानन्तु संयम्य नाड्यादेकं समाश्रयेत्॥ ८५॥

ततोऽर्घवारिणा शिष्यं प्रोक्ष्य ताड्य बुधः स्रजा।

हृत्संपुटितं तद्गृह्य गुहास्तम्भितमूर्ध्वगम् ॥ ८६॥

संहारिण्या गृहीतं तु योज्य गोद्भवया पुनः।

योनौ संकल्पितायान्तु हृदा शिवतनूपरि ॥ ८७॥

तद्योगगर्भजननमधिकारं गभस्तयः ।

लयञ्च निष्कृतिं चैव वियोगं ह्येतच्चादितः ॥ ८८॥

ऊपवह्नी ं शुचिर्वाथ जुहुयादाहुतीःक्रमात्।

शतेन निष्कृतिः कार्या माला संपुटयोगतः ॥ ८९ ॥

परतत्वार्णकाला तु पदानां यन्निवेशितम् ।

ऊर्ध्वं दद्यात् ससूत्रे तु लम्बिते पाशसन्ततौ ॥ ९० ॥

एकैकाहुतियोगेन दीपितायां शतात् पुनः ।

सन्निधिर्ह्युपनीता या कर्तव्यायुतजप्तया ॥ ९१ ॥

हुं फडन्तास्त्रसंयोगात् पाशच्चेदे कृते सति ।

कर्तव्ये तत्स्थनिक्षेपे कर्मणी चुम्बकेन तु ॥ ९२ ॥

विश्लेषोद्धरणं पूर्वमात्मस्थेनात्ममेव च ।

धूर्मथरप्रयोगेन सन्धातव्यस्तु वस्तुनोः ॥ ९३ ॥

अनुदात्तं भवेच्चुद्धमुदान्तमितरं मतम् ।

निर्णीते चाप्यनिर्णीते विलीनं ज्ञानचक्षुषा ॥ ९४ ॥

दृष्ट्वाधेयाधारगततर्पितानि विसर्जयेत् ।

पाशवच्च शिखा भेद्या शुद्धे शोधनमानगे ॥ ९५ ॥

धुन्वते पाशजालन्तु शरीरप्रक्रियास्थितम् ।

शक्तिगं चाविभावित्वाच्चेद्यः पाशो विपश्चिता ॥ ९६ ॥

त्रिखण्डं पञ्चखण्डं वा नवाष्टादशतद्युगम् ।

रुचितो वापि भेदैस्तु कृत्वा ध्यानं तु खण्डशः ॥ ९७ ॥

आदिना शिवतत्वेन पदेनाद्येन मालया ।

पुरेण भैरवाख्येन कुलपाशान्त्यतीतया ॥ ९८ ॥

Sampath_eBooks

युगपत्किल तेनाथ शोधयेदेकरूपतः ।

तत्वार्थं योगमुदितं निष्कृत्या च विशोधयेत् ॥ ९९ ॥

वागेशीं कल्पनाहीनां न्यसैदेकतमेऽध्वनि ।

मन्त्रसंपुटसंयोगाच्चुध्यते जन्तुमण्डलम् ॥ १०० ॥

अथ मन्त्रावृतो वाथ विरामावरणीं प्रिये ।

एकैकं देवतारूपं हर ईं संपुटान्वितम् ॥ १०१ ॥

एकादिभिः शतान्ताभिर्विशोध्याहुतिभिः क्रमात् ।

यावच्चक्क्रेशरूपन्तु ततस्तस्मिन् नियोजयेत् ॥ १०२ ॥

बुभुक्षुं साधकेन्द्रन्तु मुमुक्षुमलकात्मनि ।

एवं हि सर्वतोभद्रं दीक्षाकर्म विजानते ॥ १०३ ॥

यो गुरुः सर्पशुनान्तु लीलया मृतदायकः ।

आप्येयं यस्य यत् तत्वं शैवं शैवी क्रिया च या ॥ १०४ ॥

सस्मये स पदे नूनं स्थितिं कुर्याद्गरीयसीम् ।

ककुन्मीलयितुं कल्पस्तत्पदं गूढविक्रमम् ॥ १०५ ॥

विहाय सर्वतोभद्रं शिवज्ञानविदं गुरुम् ।

आलोकसृष्टिजुष्टेभ्यो जन्तोर्गुरुर्गुरुर्मतः ॥ १०६ ॥

गलन्त्यामय दोषाणि सुघोराण्यपि कस्य नो ।

ताडनादिभिरात्मस्थं शिशुं कृत्वा हृदि स्थिरम् ॥ १०७ ॥

चतुष्के पूरके मन्त्री सर्पिषा पूरयेच्चुचिः ।

Sampath_eBooks

तत्त्वोपलब्धिचैतन्यो वसोर्धारा सवेणिकाम् ॥ १०८ ॥

आध्यानात् स्मृतिसंकल्पस्थानेन्दुं संप्रयोजयेत् ।

युक्तित्तोऽन्या हुतीर्यश्च चतस्रः पञ्च चाष्ट वा ॥ १०९ ॥

रूणद् विशेषकं कर्म तद्योगादैस्तु संचितम् ।

पापच्चेदात् समार्ज्यञ्च प्रारब्धैकाचितात्मनाम् ॥ ११० ॥

मूलच्चेदे कृते स्नानमुपस्पृश्यथ प्रोक्षणम् ।

कृत्वा विज्आपनं चापि शंभोर्योगं समाश्रयेत् ॥ १११ ॥

त्वं हेतुकर्तृरूपोऽहं काय्र्योऽयं योजिते पशुः ।

न चाज्ञाकरणायोगात् परे वपुषि निश्चयः ॥ ११२ ॥

जयद्रथ उवाच ।

पुंसो व्यक्तशिवत्वस्य युक्तिः पूर्वविधानिका ।

सान्यार्थसाधनी किन्तु किन्तु व्यक्तार्थसाधनी ॥ ११३ ॥

व्यक्तार्थव्यञ्जिका सा तु यदि स्यादनवस्थितिः

सावशेषार्थजातस्य तदाद्यङ्गस्वरूपिणः ॥ ११४ ॥

न पीडनसमाप्तिस्स्यात् पिण्डादिषु कुत्रचित् ।

न चापि मैथुने त्यागो निवृतावपि जायते ॥ ११५ ॥

शिवत्वं परमा कोटिः पुंसः शास्त्रेषु गीयते ।

ततोऽपि नार्थसंसिद्धिः प्रमाणैर्नेष्यते क्वचित् ॥ ११६ ॥

अणोः स्थापकसूत्रस्य ग्रहणं योजनं च यत् ।

Sampath_eBooks

तदप्यस्मिन् ततः शक्तो विरुद्धं प्रतिभासते ॥ ११७ ॥

एवमेतत् प्राप्तशङ्को यतस्तन्महता विना ।

सन्दिग्धं तत्प्रसादेन निःसन्दिग्धं प्रकाशय ॥ ११८ ॥

श्रीभैरव उवाच ।

सम्प्राप्तशिवत्वस्य यद्योगकरणं मतम् ।

तच्चिवत्वं क्रियाङ्गस्थं नतदभ्यधिकार्थदम् ॥ ११९ ॥

लोहनं व्यक्तचन्द्राणां संपर्काच्चिचरेतसः ।

निर्णीतं वर्णशस्तेन क्रियावसुगणक्रिया ॥ १२० ॥

व्यापकं मन्त्रसामर्थ्याद् गृह्णाति विभुमप्यणुमु ।

न चापि ग्रहणं तस्य परमार्थेन सुव्रत ॥ १२१ ॥

तत्सामर्थ्यातिरस्कर्त्तुः शक्तिसंरोधनं तु यत् ।

तदत्र ग्रहणं प्रोक्तं शिवस्यैव चतुर्मतम् ॥ १२२ ॥

विशेषसन्निधिर्यस्माद् देहिनः संप्रदृश्यते ।

तत्त्वन्यासविधिर्यस्मान्मया तस्मिन् प्रकीर्तितम् ॥ १२३ ॥

अथ शब्दात्मिकां दीक्षां सन्देहविनिवृत्तये ।

वच्मि ते दूषता स्वामिस्रोतस्यस्मिन् प्रतिष्ठिताः ॥ १२४ ॥

न्यसेन्माहेश्वरं पुञ्जं तत्वहर्म्यतदीश्वरौ ।

वाग्वतीं कल्पयित्वा तु कृत्वास्याः कर्मणी हृदा ॥ १२५ ॥

ततोऽम्बुक्तसुमाभ्यान्तु शिशोः संप्रोक्षणाहुतीः ।

Sampath_eBooks

निर्वत्य शक्तिजङ्गन्तुर्जीवशक्तिप्रतिष्ठितम् ॥ १२६ ॥

हृत्पुटांतर्गतं कृत्वा संहारिण्या मयूरकम् ।

संहृत्य वलनिवृत्तिं निर्वृत्तिः सुजातोद्भवमुद्रया ॥ १२७ ॥

हृत्कृतं स्थिरतां प्राप्तं रेचकं द्वादशान्तगम् ।

हृद्याण्डं प्राक्प्रयोगेन वह्नियोनौ प्रयोजयेत् ॥ १२८ ॥

युक्त्यैवाधानमूलन्तु कर्म निष्कृत्य पश्चिमम् ।

कर्तव्यं तत्ववत् किन्तु निष्कृत्यां शोधयेत् पुनः ॥ १२९ ॥

पुराधिप पुरस्थानां कृताहुतिविधिक्रमात् ।

पूर्णाहुत्यात्मकं कुर्याच्चुम्बकश्चुम्बितं सकृत् ॥ १३० ॥

ततः समुद्धृते जन्तौ स्वस्थातस्थे कृते सति ।

भूयो विष्टपयोर्न्यासं योनिश्चैव विधायितुः ॥ १३१ ॥

प्राग्वत्तद्योगमूलन्तु कर्मं कुर्यात् क्रमेण तु ।

कालवह्नयादिकान्येव शोध्य् अगोत्रगृहाणि तु ॥ १३२ ॥

भुवस्ततस्तु सन्धानं पूर्ववत् परिकल्पयेत् ।

एवं वै सर्वतत्त्वस्थां पुरमालां विशोधयेत् ॥ १३३ ॥

शिवतत्त्वे विशुद्धे तु योगः कार्यो विपश्चिता ।

मुषितस्वात्मकं पाशं शिखां शुद्धे खिलेऽध्वनि ॥ १३४ ॥

अविच्यादित्रिकेणैव शुद्ध्यन्ति नरकाधिपाः ।

कूष्माण्डेनाथ चैकेन शोधयेदध्वविद्गुरुः ॥ १३५ ॥

Sampath_eBooks

पातालानि ततः शोध्य भूर्लोकं तत्वपूर्वकम् ।

षड्विधं भूतवृन्दन्तु विशोध्यं स्थाणुनादरात् ॥ १३६ ॥

जात्युत्तमगतं वाथ शोधयेदनुपूर्वशः ।

न्यग्रोधस्तंभजातीन्द्रमनन्तं व्यालयोनिषु ॥ १३७ ॥

पशुयौनौ वृथाश्वन्द शोध्य शोध्या तु मानुषी ।

सा भिन्नरूपसंस्थापि भिन्नजातिप्रतिष्ठिता ॥ १३८ ॥

हृदादौ गोभुजाद्यास्तु तस्या जातिस्तु सङ्करा ।

विशोध्य शूद्रविट्क्षत्रविप्रजाती हृदादिभिः ॥ १३९ ॥

शोधयेत् क्रमवित्प्रोक्तदिग्देशञ्चाप्यनुक्रमात् ।

चण्डकर्मच्युतः शूद्रः शूद्रकर्माधमो वणिक् ॥ १४० ॥

वणिग्विधिविहीनस्तु धर्मत्वमुपगच्चति ।

धर्मकर्मविहीनात्मा व्रह्मजातिमुपैति हि ॥ १४१ ॥

संस्कारसन्निपातं तु तस्यां संशोधयेत् क्रमात् ।

गर्भाधानं पुंसवनं सीमन्तं जातकर्म वा ॥ १४२ ॥

नामनिष्क्रामणी पञ्चप्राशनेषु कृतेष्वथ ।

भवेच्चूडोपनयनं व्रतबन्धनमेव च ॥ १४३ ॥

मेखलादन्तकाष्ठाख्यमजिनं त्र्यायुषं तथा ।

सन्ध्याभ्युपासा भिक्षा च मेखला व्रतसप्तकम् ॥ १४४ ॥

भूतेशं पाशुपत्यञ्च गणञ्चैव गणव्रतम् ।

उन्मत्तं चासिधारञ्च घृतेशं सप्तमं स्मृतम् ॥ १४५ ॥

एतानि व्रतवन्धान्तर्गतानीत्यवधारयेत् ।

समावर्तनकादूर्ध्वं सन्ति वेदव्रतानि तु ॥ १४६ ॥

नैष्ठिकं दार्विकं चैव भौतिकं सौमिकं तथा ।

क्रमादेतानि चत्वारि विचरेन्मुक्तमेखलः ॥ १४७ ॥

मुञ्जीमोक्षक्रियायोगं व्रतमेकं तु कीर्त्तितम्

विवाहान्ते दशैवेते संस्काराः श्रुतिचोदिताः ॥ १४८ ॥

वेदव्रतमहायज्ञैः पञ्चभिश्च समन्विताः ।

एकान्नविंशतीत्युक्ताः शेषान्येतर्गता विदुः ॥ १४९ ॥

देवयज्ञो वलिर्मौनं जपः स्वाध्याय एव च ।

एतान् पञ्चमहायज्ञान् गृहस्थः समुदाचरेत् ॥ १५० ॥

कृत्वा कुशमयीं जायां ज्ञानसिद्धिकुमारिकाम् ।

तया सिद्धविधिर्माखः कार्यः संस्कारकर्मणि ॥ १५१ ॥

स चापि पाकयज्ञाख्यो हविर्यज्ञाकरः परः ।

सोमसंस्थापकश्चान्यः सप्त पर्वाः प्रकीर्तिताः ॥ १५२ ॥

अष्टका पार्वणं श्राद्धं श्रावण्याग्रायणी तथा ।

चैत्री चाश्वयूजी चैव सप्त पाकमखाः स्मृताः ॥ १५३ ॥

अग्न्याधेयाग्निहोत्रञ्च दर्शाख्यं पौर्णमासिकम् ।

चातुर्मास्यपशुर्वर्णः षष्ठः सौत्रामणिर्मतः ॥ १५४ ॥

निरुद्धस्तु क्वचित् षष्ठः पशुबन्धस्तु सप्तमः ।
एते सप्त हविर्यज्ञाः परिशोध्याः क्रमेण तु ॥ १५५ ॥
अग्निष्टोमो उक्थोऽन्यः षोडशस्तथा ।
वाजपेयस्त्रिराख्यो ह्यस्तुर्यामस्तु सप्तमः ॥ १५६ ॥
सोमसंस्था इमे सप्त ह्यष्टावात्मगुणाः परे ।
दानं दया तितिक्षा च शौचोपायमतोऽपि च ॥ १५७ ॥
असङ्गममकार्पण्यमस्पृहेति प्रकीर्तिताः ।
चत्वारिंशाष्टसंस्काराः श्रुत्युक्तिप्रतिपादिताः ॥ १५८ ॥
वास्तोर्यामे कृते पश्चाच्छिष्यं सोमं तु पाययेत् ।
घृताभिघारितं भस्म अन्धोदकपरिप्लुतम् ॥ १५९ ॥
सोममौदुम्बरे पात्रे ब्रह्मपत्रपुटेन वा ।
सुस्नातं पाययेच्छिष्यं मनसा वाथ संस्मरेत् ॥ १६० ॥
अतो हिरण्यपादस्तु तथारण्यहिगुह्यकः ।
हिरण्यमेहो हिरण्यो हिरण्यपाणिर्हिरण्यवान् ॥ १६१ ॥
हिरण्यश्रुतिर्हिरण्यत्विट हिरण्याक्षस्तथैव च ।
हिरण्यजिह्वो हिरण्यनासिको दशमो मतः ॥ १६२ ॥
शतप्रकृतयो ह्येते कीर्तिताः क्रतवो दश ।
इत्येवमासहस्रांतां सप्तमन्तु विशोध्य तु ॥ १६३ ॥
जुहुयादश्वमेधन्तु द्वितीयाच्चाश्रमात् परम् ।

वानप्रस्थं परिव्राजमन्त्येष्टिं चाप्यनुक्रमात् ॥ १६४ ॥

एवं विशोधितं ब्रह्मा इत्यष्टकविशोधनम् ।

आम्नायेन प्रकर्तव्यं स्थाणुना योनिवेदिना ॥ १६५ ॥

पैशाचीं राक्षसीं याक्षीं गान्धर्वीं पाकशासनीम् ।

प्राजेशजां तथा सौम्यां ब्राह्मीं संशोध्य यत्नतः ॥ १६६ ॥

पिशाचादिविरिञ्चान्तां शोधयेदपि वा नृप ।

स्तंभाद्विरिञ्चपर्यन्तामेकैकाहुतियोगतः ॥ १७ ॥

तिसृभिः पञ्चभिर्वाथ विद्याविद्येन शोधयेत् ।

एवमेतत् क्रमात् सर्वमनन्तजनपूर्वकम् ॥ १६८ ॥

दृष्ट्वाम्नायेन संशोध्य यावत् संति पुराणि तु ।

शिखाचेदादिकं कर्म पूर्ववच्च ततो भवेत् ॥ १६९ ॥

अथवैतत्पुरा ध्यानं प्रतिचिन्त्य स्वदेहकम् ।

सन्ताड्याथ गृहीत्वाणुं समीकृत्यात्मना सह ॥ १७० ॥

देवतापदसंत्यागान्मन्त्रोच्चारवशात् तथा ।

पूर्णाहुत्यैकपाशान्ते योजयेत् परमे पदे ॥ १७१ ॥

चरति भुवनदीक्षां वेत्ति योध्वानमुच्चैः

शिवसमरसभावे यञ्च योगं स कुर्यात् ।

अविदितभुवनाध्वो भ्रान्तचित्तश्च तत्वे

कृतपुरुष विशुद्धिर्यात्यधस्ताद्गुहोऽपि ॥ १७२ ॥

Sampath_eBooks

विदितस्तु यदागमोऽखिलो विपरीतो विपरीतचोदितः।

क्रिययापि विपर्यस्तया विपरीतं पदमाप्यते तदा ॥ १७३॥

विविधमण्डलसाधनसाधितां सकलभोगसमर्पितविस्तराम्।

श्रियमनन्तगुणा भजतोत्सुका भजत भोर्विमलं पदमादरात् ॥१७४॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे

चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसंअकर्षण्यां अष्टादशः पटलः ॥

१८॥

ऊनविंश पटलः ॥

श्रीभैरव उवाच।

अथातः संप्रवक्ष्यामि वक्ष्ये षण्णां प्रियं प्रिये।

योगिनीनां महावीर्यं मण्डलं वीरवन्दिते॥ १॥

वेधोवक्राण्यनंतस्य वाहनं स्फिजचक्षुषी।

ग्रथितां वर्तयित्वा तु सांख्यतत्वमितां ततः॥ २॥

रक्षयेद् धाम्नि विप्रस्य लाञ्छनैश्चिह्नकोष्ठकान्।

तद्बाह्ये त्रिकमालाप्य तस्याधो बीजकोष्ठके ॥ ३॥

कोष्ठमानं बलं कृत्वा देवि प्राकारसंस्थितम्।

कण्ठस्योभयथा मृज्य सप्तकोष्ठान्तरे गताः॥ ४॥

रेखाः समन्ततो वत्स युक्त्या द्वारचतुष्टये।

सपक्षा मध्यरेखास्तु कण्ठाधः कोष्ठकत्रये॥ ५॥

मार्जयित्वाप्यधोर्ध्वे तु रेख्य तत्पार्श्व कोष्ठयोः।
मार्जनीये ततोधस्ताल्लोप्यं चापि तदन्तयोः॥ ६॥
तदन्तयोस्ततोर्ध्वस्थे ह्यर्धमेतद् विरामयोः।
ऊर्ध्वे तदन्तयोर्लोप्या लये वल्लीविधायके॥ ७॥
तद्विरामेऽधपार्श्वस्थे द्विरेखे तु विनाशयेत्।
एवं सर्वत्र भङ्ग्या तु पार्श्वयोरुभयोरपि॥ ८॥
कण्ठानां मार्जयेद् रेखा यथा वल्ली स्फुटा भवेत्।
उर्ध्वरेखाहृतास्त्रीणि ह्यधोरेखा चिराद्व्यम्॥ ९॥
कर्णतुल्यादिवल्लीनां ग्रन्थिलक्षणमीरितम्।
चलतः सर्वतः पोष्यो दशसप्तगृहे गणः॥ १०॥
पक्ष रुद्धाथ सा वीथी कोष्ठमाना समन्ततः।
कोणेषु कोष्ठे तुर्यन्तु ' लोपयित्वा विपश्चिता॥ ११॥
सप्तदशकोष्ठकानि कार्याण्यधिमुखानि तु।
त्रिकोष्ठकोष्ठके भवेन्मोक्षः कण्ठकोष्ठगलो भवेत्॥ १२॥
कण्ठस्यान्तरबाह्यास्तु द्वाराद्यन्तर्गता भवेत्।
ताः समालेखयेद् रेखा भङ्गाभ्यङ्गानुरूपतः॥ १३॥
पक्षौ द्वार समौ कार्यौ द्वारं बाह्यन्तु दक्षिणम्।
वाहयेद्वारि तुर्याम्बा विताने भुवनेऽनघ॥ १४॥
एवं निर्णीतधामा वै पूरयेद् वर्णकैः पुरम्।

Sampath_eBooks

शालिषष्ठीकगोधूमपांसुना भस्मनाथवा ॥ १५ ॥

सितेन पूरयेत् पद्मं कर्णिकापत्रसन्धयः ।

पादान्तश्चापि यः प्रोक्तपूर्वमासीत् तथा भवेत् ॥ १६ ॥

सन्धिसन्ध्यालकारेणु असृङ्निकरसन्निभम् ।

गरुत्मतः क्रमेणैव पत्रषट्कमथापि वा ॥ १७ ॥

वरेण्यं द्विगुणं कृत्वा तद्वद्वर्णं प्रशस्यते ।

प्राकारद्वारवल्लीनां एका रेखा सिता भवेत् ॥ १८ ॥

शेषे वै वर्णका देयाः स्फुरणे स्थानशोभनम् ।

या यस्योपादिता ः शोभा अन्ते देवस्य तस्य तु ॥ १९ ॥

स्वेच्चया वर्णविन्यासश्चित्रश्चित्रवितानके ।

योगिनीनां प्रियं प्रोक्तं समासीच्चन्द्रमौलिना ॥ २० ॥

गर्भवाह्या तु या वीथी संमाज्र्या गन्धवारिणा ।

वल्यंतं चुरणं कार्यं तद्वाह्ये च समन्ततः ॥ २१ ॥

द्वारमण्डलं शोभा प्रागुदिता कार्या यदि स्थानप्रविस्तरः ।

विस्तीर्णे धाम्नि संकीर्णे स्थाने शोभां न कारयेत् ॥ २२ ॥

मण्डलानान्तु सर्वेषां न ह्येके तु वितानके ।

श्रीदेव्युवाच ।

मण्डलस्य तु किं मानं पीठषड्दलवर्तनम् ॥ २३ ॥

कथमंभोरुहस्यास्य द्विगुणस्याथवा हर ।

पन्निलाङ्गरुहस्यैतन्निर्भ्रान्तं मत्प्रसादतः ॥ २४ ॥

प्रकाशय दिवावासमौलिचुंबितपङ्कज ।

श्रीभैरव उवाच ।

त्रिहस्तात् तु समारभ्य करकोष्ठसमं सितम् ॥ २५ ॥

मण्डलं श्रीपदं ह्येतन्मोक्षे स्वेचाप्रमाणकम् ।

कोष्ठकारेण पीठन्तु कृत्वा पूर्वोक्तमानतः ॥ २६ ॥

वृत्ततुर्ये प्रकर्तव्यं सरोरुहप्रसिद्धये ।

धार्यं त्रिभाजयेत् खण्डं नैवं चापि यशस्विनि ॥ २७ ॥

मीनेषु पातयेद् रेखां यथा रेखाष्टकं भवेत् ।

रूष बीजान्तरे तुल्यं रेखा तुर्यं निपातयेत् ॥ २८ ॥

प्रोक्तस्त्रिरेखिणं पत्रं कार्यमीनावधिं प्रिये ।

रेखा केसरवृत्तस्य सङ्गमात्परिधेरधः ॥ २९ ॥

द्विरागत्या गतभ्रान्तिः कार्या सन्ध्युभयानुगा ।

एवं पूर्वदलं वर्त्य शेषाणि तु विवर्तयेत् ॥ ३० ॥

चतुर्विंशतिभिः कार्यं रेखाभिः सूर्यपङ्कजम् ।

प्राकृतं व रु प्राकृति ।हृ द्विगुणाभिस्तु प्रतिपत्रं त्रिरेखिणम् ॥ ३१ ॥

द्विसन्धिदलसन्धिस्तु द्वादशारादिको भवेत् ।

विषवृक्षदलाग्राणां भङ्ग्यापत्रोग्रवर्तनात् ॥ ३२ ॥

बीजानां सप्तकं कार्यं पूर्ववत् केसरोगणः ।

Sampath_eBooks

कर्तव्यः षड्दले पक्षे ह्यस्यैवेतरयोर्द्वयोः ॥ ३३ ॥

शेषं प्रमुदितं सर्वं कार्यं गर्भे तु लक्षणे ।

एतच्चित्रविभागस्तु चित्रचित्तप्रसाधकं ॥ ३४ ॥

चतुर्दलादि पद्मानां गर्भे वा पूज्यते नृप ।

अन्यतन्त्रप्रसिद्धैस्तु स्वतन्त्रोक्तैरथानघ ॥ ३५ ॥

त्रयाणां स्रोतसा मन्त्रा ः ये पूज्याः संप्रकीर्तिताः ।

पूजिता ः जातिभिस्तेऽत्र पुरे यच्छन्ति वाञ्छितम् ॥ ३६ ॥

सर्वे अफूर्जन्ति वीर्यौघा धाम्नो यस्य प्रभावतः ।

यो वर्णयति वीरेशो वीरो यः पूजयेद्द् भुवि ॥ ३७ ॥

शेषकर्मरतस्तस्य गणको यदवस्थितः ।

एतत् प्रकाशितं तुभ्यमुपाप्तानुस्वप्रभावतः ॥ ३८ ॥

पीठे तु मण्डले मण्डं मण्डलेभ्यो निकुंभज ।

एवमेतत् पुरं वर्त्य पूजयेदत्र भैरवीम् ॥ ३९ ॥

भैरवं वा चतुर्वक्त्रं चतुर्बाहुं त्रिलोचनम् ।

शरच्चन्द्रनिभं शान्तं शूलखट्वाङ्गधारिणम् ॥ ४० ॥

कपालमालाभरणं मुण्डखड्गधरं हरम् ।

व्यालकल्पविचित्राङ्गं वृश्चिकावलिमालिनम् ॥ ४१ ॥

स्फुरद्भोगसहाररत्नभोगमञ्जीरमंडितम् ।

गुह्यशक्त्या सनारूढं योगिन्यंगविमालितम् ॥ ४२ ॥

योगिन्यश्चात्र कर्तव्या मूलतो बीजयुग्मगाः।

घोराङ्गनिर्गता घोरा घोरवक्राधिनायिकाः॥ ४३॥

वातार्णपंचकेनास्त्रप्रोक्तरूपं प्रतिष्ठितं।

सुघोरं घोरशक्त्युग्रं भुजङ्गं विनतासुतम्॥ ४४॥

लीलालोकोहला कंका करालाख्यामहारवा ः।

मंदोदरी षडेतास्ताः सर्वषट्काधिनायिकाः॥ ४५॥

याभिः संपूजिताभिस्तु सिद्ध्यन्ते विश्वमातरः।

स्वधाराब्जसदच्चायां पूज्या मलभिदः क्रमात्॥ ४६॥

मुण्डखट्वाङ्गधारिण्यो महाव्रतधृतश्रियः।

सृणिशक्तिकरा देव्यश्चतुर्वदनमण्डिताः॥ ४७॥

भस्मना पाण्डुवपुषः शुद्धांतस्त्रिरुचोऽथवा।

सेन्दुखण्डकपर्दिन्यः पीनोन्नतपयोधराः॥ ४८॥

षण्णां रूपधराश्चैव ताश्चतुर्विंशदम्बिकाः ॥ ४९॥

तुर्यतुर्य विभेदेन षट्कबीजसमाश्रिता ।

स्वरुचोष्णचदाभ्यासे परिवारे नियोजयेत्॥ ५०॥

द्रौपदी दमयन्ती च सीता कुन्ती विलासिनी।

रुक्मिणी सत्यभामा च देवकी मलयावती॥ ५१॥

नीलग्रीवा चला कद्रुर्विनता विनयावती।

महाश्वेताम्बिका रामा लीलाविद्रा महोदया॥ ५२॥

Sampath_eBooks

केकरा कालरात्री च गम्भीरोत्पलहस्तिका ।

एताः स्वकुलमार्गस्था जगत्यत्र चराचरे ॥ ५३ ॥

चतुर्विंशतियोगिन्यो योगिनीकुलनायिकाः ।

अमेयमपि तत्पीठं वेद्यमाभिः स्वरूपतः ॥ ५४ ॥

सिद्धाभिः सिद्धिमायांति सेविताभिः परौजसा ।

अङ्गवक्त्रकुधः कार्या न्यासस्थानेषु सर्वसु ॥ ५५ ॥

चतुर्विंशतिकाश्चैव चतुःषट्स्वरसंस्थया ।

एवमेकतमे यष्टे हुते ध्यातेऽङ्गवेदिना ॥ ५६ ॥

कार्यमेकतमं कर्म नित्याद्यं वसुधाधिप ।

भुङ्क्ते सर्वमिदं संपदेकमण्डलदर्शनात् ॥ ५७ ॥

दुष्कृतादापदो दाररोगवृन्दाच्च मुच्यते ।

मनुष्यजन्मनो भोगे रूपस्थं मण्डलद्वयम् ॥ ५८ ॥

त्रयमाखण्डलावाप्तौ हेतुरूपं प्रजायते ।

चतुर्भिर्भुवनैर्यष्टैः सुरज्येष्ठः प्रजायते ॥ ५९ ॥

पञ्चबिन्दुं च केशित्वं षत्वं षड्भिरवाप्नुयात् ।

सप्तभिः शतमध्ये तु चत्वारिंशच्चिवान्ततः ॥ ६० ॥

अष्टभिः प्रविशेन्मन्त्री ह्येवं वत्स ख वच्च नवादिभिः ।

ऊर्ध्वाधःक्रमयोगेन भुनक्ति स्थानसङ्गतिम् ॥ ६१ ॥

मण्डलानां शते पूर्णे कालसंकर्षणी स्वयम् ।

योगिनीपरिवारा तु वीरसंघसमावृता ॥ ६२ ॥

ढक्काडमरुकध्वानैः प्रपूरितदिगन्तराः ।

सर्वर्यन्तः समागत्य प्रदत्ता ः स्वसमानता ॥ ६३ ॥

कुर्यादध्वानमखिलं अस्तु बलं तस्य लीलया ।

कनीयोऽथ समं मुख्यं जगत्यां यत् स्थितं बलम् ॥ ६४ ॥

तत् तत् सर्वमनायासात् लभते मण्डलेज्यकः ।

बलीयसीं महानागैः शूरामपि च रोधनीम् ॥ ६५ ॥

दृष्ट्वैतन्मण्डलं योधा जयन्ति युधि लीलया ।

तत् तत् साध्यमसाध्यन्तु विधाने तु महाध्वनि ः ॥ ६६ ॥

कठिनेऽस्मिन् सन्मतानां यन्न सिद्ध्यति सैन्धव ।

नान्यथा चास्य सौभाग्यं लघुकर्तारमादरात् ॥ ६७ ॥

वक्ष्ये त्वां धारकेभ्यस्तु पुरं नाम्ना महोदयम् ।

एकविंशत्प्रकृत्यादौ कोष्ठकात् सर्वतस्ततः ॥ ६८ ॥

वेधसः परतो धार्यः पञ्चविंशन्मितां ततः ।

कोष्ठैकमालां संलोप्य तदधो जीवपार्श्वतः ॥ ६९ ॥

कोष्ठैके कंठवचनं कृत्वाधः कोष्ठकत्रये ।

मध्याधोऽधोर्ध्वरेखां तु पूर्ववत् कण्ठे धारयेत् ॥ ७० ॥

कर्तव्यास्तदधस्ताश्च ग्रन्थयो ये त्रयः स्थिताः ।

तेषां मध्यगतो रेखा य सपक्षा सन्धिं लोपयेत् ॥ ७१ ॥

Sampath_eBooks

तत्पूर्वकोष्ठके रेखामूर्ध्वमेव विलोपयेत्।

पूर्ववद्याम्यतो लोप्या लोप्य तत्पूर्वकोष्ठके ॥ ७२ ॥

प्रागुत्तरे तु वै रेखा परे सर्वं विलोपयेत्।

पश्चिमेऽप्यर्धमेवं हि सर्वं भंग्या प्रमार्जयेत्॥ ७३ ॥

ततोऽधो नवकं धार्यं कोष्ठकानां सितं समम्।

तन्मध्यरेखायत्नेन मार्जनीया विपश्चिताः॥ ७४ ॥

अधस्तात् तु पुनर्मार्ज्यं कोष्ठकत्रयमध्यमाः।

शोभा रेखा समः कण्ठ ःशेषो द्वारप्रविस्तरः॥ ७५ ॥

सप्तादश ः कोष्ठकानि द्वाराणि परिकल्पयेत् ।

त्रिकोष्ठकस्मृतो मोक्षो मण्डलेऽस्मिन् महोदये ॥ ७६ ॥

कण्ठबाह्याधिका रेखा भङ्ग्योग्याः प्रमार्जयेत्।

पश्चिमं दक्षिणं वाथ वाहयेन्मण्डलाननम्॥ ७७ ॥

शेषाणि कण्ठयेद्धीमान् वामतन्त्रविशारदः।

दक्षिणं पूर्वमावर्त्य ततः शेषाणि वर्तयेत्॥ ७८ ॥

पञ्चविंशतिग्रन्थिस्थं कार्यं सुश्रोणि अम्बुजम् ।

बालहेलिप्रतीकाशमष्टपत्रं सकर्णिकम्॥ ७९ ॥

बहुवर्णमेकवर्णं कार्यं शोभानुरूपतः।

यो यस्मिन् राजते वर्णस्तं तत्रैव निवेशयेत्॥ ८० ॥

स्वेच्छया वर्णविन्यासौ योगपीठादिकः स्मृतः।

महोदयस्य सिद्धीश तन्त्रे रावण पूजिते ॥ ८१ ॥

चतुःषट्दलपद्मादिभेदसाधारणं मतम् ।

पुरं महोदयं ह्येतन्महोदयविधायकम् ॥ ८२ ॥

उक्तयोगासनारूढं मालामूर्त्तिमयोदयम् ।

महोदयेन बीजेन विमलाद्येन सङ्गताम् ॥ ८३ ॥

पाशाङ्कुशधरां देवीं सुरूपां नवयौवनाम् ।

बन्धूककुसुमाभासां दिव्यचन्दनभूषिताम् ॥ ८४ ॥

कपालपट्टिशव्यग्रां त्रिचक्षुश्चतुराननाम् ।

भेकोल्लसन्महोत्तुङ्गधम्मिल्लोल्लासलासिताम् ॥ ८५ ॥

प्रबालकमयाशेषदिव्यालङ्कारशोभिताम् ।

महारजतसंरक्तवासोयुगविधारिणीम् ॥ ८६ ॥

पूजयेन्नाभिमध्यस्थां परिदूत्यष्टकं न्यसेत् ।

द्वादशारान्ततुर्येण विहरं निजशम्बरैः ॥ ८७ ॥

कुङ्कुमाद्यैः सुगन्धैस्तु पुष्पैर्जात्यादिभिः प्रिये ।

शर्करागर्भपक्वान्ननैवेद्यैः क्षीरसम्भवैः ॥ ८८ ॥

तिक्तहीनैः फलैर्भक्षैः प्रभुभोज्यैर्हरामिषैः ।

द्राक्षाखर्जूरफलजै रसैर्नानारसासवैः ॥ ८९ ॥

मणिभूमिरुक्मपात्रैः कांस्यसौवर्णपात्रकैः ।

सर्वोपचारैर्देवेशीमुपचर्यविधानवित् ॥ ९० ॥

Sampath_eBooks

सुविकासिमहाशोकलतागृहसमाश्रितम्।
पुंस्कोकिलकलालापिनन्दनान्तःप्रतिष्ठितम्॥ ९१॥
चिन्तयेद् द्वारपालञ्च सञ्जयं शौर्यकारिणम्।
महेक्षुधनुषं पुष्पपतत्रिकिरणारतम्॥ ९२॥
विपञ्चीमुरजध्वानकम्बुकोलाहलालये।
गणिकागणसंकीर्णप्रेक्षणीयविनोदकम्॥ ९३॥
वराङ्गनाकरोत्क्षिप्तैर्वीज्यमानं सुचामरैः।
ध्यायेन्महोदयं देवीं महोदयविधायिनीम्॥ ९४॥
यो सौ गम्भीरमेघाद्या विद्युल्लेखा समाकुला।
मत्तद्विरदगण्डाभ्यां पन्मदकणाकृतिः॥ ९५॥
धारासारं विमुञ्चन्ती तामूर्ध्वे प्रविशन् स्मरेत्।
तस्या व तस्याः यच्चोपगं सर्वं तद्ध्यायेत् कुङ्कुमच्चविम्॥ ९६॥
तर्पयेच्चापि वह्निस्थां मन्त्री त्रिमधुरेण तु।
मधुराढ्येन चाज्येन पयसा वा प्रसन्नया॥ ९७॥
फल्गुषा वीरदेहेन मार्गकौशिकजेन वा।
नम्रा नद्धजटा येन बालमाल्यधरेण वा॥ ९८॥
मायूरधार्तराष्ट्रेण लावकाद्येन सुव्रत।
कुम्भमण्डलवह्निस्थे कृते कर्मणि निश्चिते॥ ९९॥
शिशुकृत्यैव निर्णीतं ततस्तमभिषिञ्चयेत्।

कुम्भार्घपात्रशंखेन शुक्त्या रम्भादलेन वा ॥ १०० ॥

त्रेधापलं समादाय जलस्थलगरुत्मताम् ।

भृतेन पल्लवौ तेन गोक्षीराण्यंवुनाथवा ॥ १०१ ॥

हृदा कल्पितवीर्येण कपिशाद्यासनांगिना ।

चक्रालातसटाध्वस्ततमोमयगुणात्मना ॥ १०२ ॥

महोदये गुणशताद् विशेषामलमूर्त्तिना ।

योग्यं संसेवयेच्चिष्यं भाण्डेन तु घटादिना ॥ १०३ ॥

दक्षिणस्यां महेशान्या दिशि मण्डलके शुभे ।

नन्दिकावर्त्तसंचन्ने चित्रवर्णकराजिते ॥ १०४ ॥

पयःपूर्णघटस्त्रावे सूत्रकण्ठविधारिणि ।

मङ्गलानि तु भाण्डानि प्रवालाद्यानि सर्वदा ॥ १०५ ॥

पिष्ठातकादियुक्तानि शस्यन्ते शुभकर्मणि ।

चतुःषष्टिमितां कृत्वा कोष्ठकासु समां बुधः ॥ १०६ ॥

मध्यकोष्ठकतुर्येण वर्त्तयित्वा सरोरुहम् ।

कोष्ठमानां ततो वल्लीं समन्तात् परिवर्त्य च ॥ १०७ ॥

वीथीसंलग्नमालायां ग्रन्थिपञ्चकमध्यगाः ।

रेखाः प्रमार्जयित्वा तु तद्बाह्ये ग्रन्थिसप्तके ॥ १०८ ॥

तालुकाः पुष्पसर्गन्तु समानन्दीनि धारयेत् ।

तत्र पीठं समं द्रौमं सितवासोऽवगुण्ठितम् ॥ १०९ ॥

स्थाप्य तस्मिन् स्थितस्याणो रूपिणीभिः सह त्रिभिः ।

कारयेत शुभे लग्ने निर्मथ्यन कथं बुधः ॥ ११० ॥

शङ्खतूर्यरवैः रम्यैर्गेयैर्मङ्गलपूर्वकैः ।

कन्यानिर्मत्सने शस्ता विलासिन्यो विशेषतः ॥ १११ ॥

वासोऽलङ्कारगन्धाढ्याः सदासौभाग्यकर्मणि ।

समुद्रमासुरी नैवं कृतं निर्मत्सरं सदा ॥ ११२ ॥

दीप्ताङ्गारविनिक्षिप्तं चाकृष्याशेषदोषकृत् ।

सप्तशो ह्यारनालेन साङ्गारेण निषेचितम् ॥ ११३ ॥

आममांसादिभिर्वीरं निर्मत्स्य चगलैस्तथा ।

निर्मत्सयेद्विचित्रैस्तु रचितैर्वीरपूर्वकैः ॥ ११४ ॥

ततो पक्वशरावस्थैर्विचित्रैर्वटकौदनैः ।

कामिनीयुगलं हृष्टं पुनः पश्चात् प्रतिष्ठितम् ॥ ११५ ॥

पुनस्तया गृहीतं तु पाणिभ्यां मल्लकद्वयम् ।

विक्षिप्ताभ्यां परिभ्राम्य तदनूद्य समर्पयेत् ॥ ११६ ॥

ततः प्रागुदितार्घेण निर्मत्स्यामत्स्यताक्षतैः ।

सितव्याकोशमूर्द्धानं स्नापयेत् साधकं गुरुः ॥ ११७ ॥

ब्रह्मवेतालकरवैर्घटै रक्तघटक्रियैः ।

समबीजतया यस्तु चन्द्रमौलिदिगन्तगैः ॥ ११८ ॥

ततोऽन्ते चन्द्रमतुलं हृद्यं स्वच्छाम्बुना स्नपेत् ।

केतकारत्नगर्भां तु कृत्वा मूर्द्धिर्न पिटालिकाम् ॥ ११९ ॥

तदन्ते तु गुरुः साक्षादभिषेकघटेन तु ।

महोदयातनुध्यानसमर्पितमनास्त्रपेत् ॥ १२० ॥

निर्मत्स्यारत्निर्दीपैश्च पञ्चस्त्रिभिरनेकधा ।

देवीनेपथ्यधृक् प्राणान् धृत्वा देव्यै प्रणामयेत् ॥ १२१ ॥

वासोभिर्ह्यन्तरेह्यन्तः प्राक्प्रोक्तैः पीठमस्तकैः ।

दत्वा पद्मासनं पूर्णमब्जोर्घे विद्यया शिशुम् ॥ १२२ ॥

देहभूतं प्रविष्टस्य दूत्यष्टकमथो ददेत् ।

शिरश्चक्षुर्गुहाह्लादाभिगुह्यो रूपपादुकाम् ॥ १२३ ॥

वामदक्षिणयोगेन गुल्फजानुप्रतिष्ठितम् ।

किङ्कराणां चतुष्कन्तु विन्यसेदाद्यमादरात् ॥ १२४ ॥

महोदयं समावाह्य तदङ्गानि प्रविन्यसेत् ।

अनेनाब्जदलस्थायिदूतीवृन्दे प्रपूजिते ॥ १२५ ॥

विदिक्पत्राद्यगाः पूज्याः किङ्करा वह्निपूर्वगाः ।

परिधाप्या कल्पजालमपूर्वं रक्तवाससी ॥ १२६ ॥

ततः समर्पयेन्मन्त्रं प्रोक्तेनान्यतमेन तु ।

मैरेयरूप्रपूर्णेन पात्रेणालब्धबिन्दुना ॥ १२७ ॥

महोदयाः पुरः स्थित्वा प्राणचारे पुनः पुनः ।

स्वशिष्ययोः स्वविज्ञाय विद्योदयमनातुरः ॥ १२८ ॥

प्राणं पूरकसंयोगात् प्राणाद् वाथ विरेचनात्।

विद्याचक्रे स्थितो मन्त्री शिवचक्रावलम्बकः॥ १२९॥

आत्मचक्रच्युतो मन्त्रं स्वशिष्याय समर्पयेत्।

ततः संश्रावयेत् सर्वान् नाराचांश्च प्रसिद्धये॥ १३०॥

शिवाप्तशिवभक्तानां समयी भव पुत्रक।

दिव्यद्रव्यगुणोत्कृष्टकन्यास्त्रिशुभकर्मणाम्॥ १३१॥

लिङ्गिनामस्थिधारीणां भस्मिनाञ्च जुगुप्सिनाम्।

नमस्याभैरवे तन्त्रे स्वगुरोश्च विशेषतः॥ १३२॥

योषितेऽप्यथ धारित्वं वक्त्रित्वं तत्स्वभावता।

भूयिष्ठं स्मरणं स्थाणोस्संस्तवः समयो परः॥ १३३॥

सर्वमुल्लङ्घयेन्मन्त्री यद्गुरुं भूतलादपि।

गुरुं लुलादपि लघुं नानुसंस्कारदं क्वचित्॥ १३४॥

वीरयोषित्कुमारीभ्यो वामहस्तेन पूजनम्।

सर्वं सर्वं सुकर्तव्यं मन्त्राणां च विशेषतः॥ १३५॥

श्रुत्युक्तविपरीतन्तु प्रतितंत्रं सुर गणार्चिते।

संस्कृतस्त्वेवमाकर्ण्य समयात् स्वामिनोदितान्॥ १३६॥

निर्वृतःस्यात् प्रदानेन धनजातादिना प्रिये।

स्वांशमन्त्रचरुं दत्तं गुरुणा प्राशयेत् ततः॥ १३७॥

अनेन क्रमयोगेन प्राप्नोति महतीं दयाम्।

कुरुतेऽस्यापि तस्याशु स्यात् सौभागमहोदयः ॥ १३८ ॥

गोगोचरगते तस्मिन् न निस्त्यक्तमना भवेत् ।

पल्लवास्तरणे नूनं भविष्यति सदासुखम् ॥ १३९ ॥

श्रेयांसि गुरुज्येष्ठानां यत्रासन्ने भ्रमन्ति हि ।

जपानुस्मरणं न्यासं न कुर्यात् तत्र साधकः ॥ १४० ॥

सुषिरबीजमनङ्गजिताश्रियं जपनियोगरतस्य चकासतो ।

वितरतीह सुरासुरयोषितां हृदयसद्मनि नित्यतरां स्थितिम् ॥ १४१ ॥

किमिह रूपधनाश्रययौवतैर्मदनशास्त्ररहस्य निवेदनैः ।

युवतिवश्यकृतेति समादरो मनसि ते यदि वीरमहोदया ॥ १४२ ॥

निर्मत्सरादिकं कर्म यत् तस्मिन् कीर्तितं मया ।

शस्तमाना एकदापीं भूभृता ं चापि तत् सदा ॥ १४३ ॥

शश्वत् प्रक्रियमाणं हि न तु विघ्नापनुत्तये ।

एवमेतत् क्रमायातं महोदयविधायकम् ॥ १४४ ॥

महोदयार्चनं कृत्वा कृतवीरविधिर्गुणी ।

क्षमापयेत देवेशीं निर्माल्याय नये कृते ॥ १४५ ॥

शोधयेदुपलेपेन शकृता चामृताधरम् ।

इत्यवाप्य गुरुतो महोदयां पुण्यवान् भजतीतां विधानतः ॥ १४६ ॥

यो नरः स खलु सर्वसंपदो लीलया जुषति भैरवोदिताः ।

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

Sampath_eBooks

शतिसाहस्रे प्रथमषट्के श्रीकालसंकर्षण्यामेकोनविंशतमः पटलः ॥

१९ ॥

विंशतिः पटलः ॥

श्रीभैरव उवाच ।

अथातः श्रूयतां वत्स यथा सिद्ध्यति भैरवी ।

सिद्धार्था वाप्तिदा नारी यथा वाचः प्रजायते ॥ १ ॥

तथा ते संप्रवक्ष्यामि सन्देहविनिवृत्तये ।

रम्ये स्वाभिमते स्थाने भूतधामादिके नृप ॥ २ ॥

जप्त्वा महोदयां लक्षं हुत्वा चैव दशांशतः ।

कृतध्यानपरो योगी ह्यसिधाराञ्चरेद् ब्रतम् ॥ ३ ॥

रमणीं मनोहरां प्राप्य सर्वालङ्कारभूषिताम् ।

सुभक्तां श्रद्दधानाञ्च सुरूपां नवयौवनाम् ॥ ४ ॥

दिवा कुत्सितदिग्धाङ्गीं रक्तां शुद्धधृतां ।

उमारूपधरो मन्त्री गुप्तधाम्नि सुतल्पगः ॥ ५ ॥

रुढनिक्षिप्तजननसुशिरावर्तने रतः ।

अनन्यवासिनो देव्या रूपके परमेश्वरे ॥ ६ ॥

चुम्बनालिङ्गनासक्तश्चरेद् वासरसप्तकम् ।

व्रतमेतद् दुराधर्षं दुश्चरं ब्रह्मणोऽपि हि ॥ ७ ॥

निर्णीतोऽस्य महायोगी सर्वकर्मरुहो भवेत् ।

चरेद् वालक्षमेकन्तु देवीनेपथ्यधृङ् मुनिः ॥ ८ ॥

विचित्राभरणोपेतः गात्रेषु शिवरेतसः ।

विशुद्धालकहारेण कुण्डलाभ्यां विराजितः ॥ ९ ॥

विंशत्येकदिनेनाग्रां चरेद् वातन्महोदयम् ।

जपध्यानाभियुक्तस्तु व्रतमामिधभुङ्नरः ॥ १० ॥

स्वल्पकस्य जुषी गुप्तो सर्वदृक् सङ्गवर्जितः ।

ततः कृत्वा सुविस्तीर्णं सर्वसंभारसंभृतम् ॥ ११ ॥

व्रतोत्तरकृतं देव्यै व्रतचर्यां निवेदयेत् ।

ततो जपेत् पुनर्लक्षं मानुषीणां प्रसिद्धये ॥ १२ ॥

द्विगुणं च परेलीनां रक्षः स्त्रीणां त्रिरूपिणाम् ।

चतुर्गुणं च यक्षीणां गान्धर्वीणां तु पञ्चधा ॥ १३ ॥

क्रीडा महेन्द्रकन्यानां जपं कुर्यात् समाहितः ।

प्रजापतिपुरंध्रीणां लक्षाणां सप्तकं जपेत् । १४ ॥

स्वचिन्तयोषितो मन्त्री जपेल्लक्षाष्टकं समम् ।

प्रजप्तैर्नवभिर्लक्षैः क्ष्माद्यैरभ्यन्तरस्थिताः ॥ १५ ॥

कामिन्यो वशमायान्ति क्षामोदर्यो मृगेक्षणाः ।

दशभिः सर्वसंस्थानस्थिताः प्राप्नोति संपदः ॥ १६ ॥

लीलाधत्यो विशालाक्षो लक्ष्म्यावेशानुरागया ।

आलिङ्ग्यते महेशस्य लक्षैकादशकेन तु ॥ १७ ॥

Sampath_eBooks

महोदयास्वरूपेण मन्त्री प्राप्तमहोदयः।

सर्वभोगान् समश्नाति स्वतन्त्रो सुवलितेऽध्वनि ॥ १८ ॥

कलौद्वादशभिजप्तैर्वीरमन्त्रस्य सुव्रत।

वस्तुविश्वेन तच्चान्यद् विद्यते यत् सुदुर्लभम् ॥ १९ ॥

लक्षद्वादशकोटीनां भविष्यत्यनुसेविनाम्।

अर्घार्गलां विनिर्भिद्य मलवज्रमयीं दृढाम् ॥ २० ॥

स्वांशद्वारं न कस्येयं विद्योद्घाटयते जपन्।

कौकन्दरीं क्रियां वध्वा स्त्रीयोनावुषितं यदि ॥ २१ ॥

जराव्याकोशसंकाशमनन्तं चिन्तयेद् गिरिम्।

स्रवन्तं चोषणं स्वच्चं खगवच्च विभावयेत् ॥ २२ ॥

अनन्यवासनो व्यग्रस्तत्र तन्मयतां गतः।

कामिनीं क्षणयुग्मेन करोति मदविह्वलाम् ॥ २३ ॥

ताम्रनेपथ्यदृङ् मौनी शय्यायां संस्थितो निशि।

हृत्पङ्कजसमावस्थां दूतीकिंकरसंयुताम् ॥ २४ ॥

प्रत्यक्षीकृत्य ध्यानेन ततः साध्यं विचिन्तयेत्।

पाशेनाक्रोडितं कण्ठे भिन्नं कुब्जेन मस्तके ॥ २५ ॥

आकृष्यं तं प्रहृष्टाभिर्दूतीभिः किङ्करैस्तथा।

संचिन्त्य तं समायातमाक्रान्तं चरणेन च ॥ २६ ॥

उपयातं तु रञ्जीर मुखरेणाब्जवर्चसा सा।

ध्यानेनानेन साध्वीनां निश्चलेन गुणात्मना ॥ २७ ॥

विश्लेष्य मच्चरीरान्तः क्लिश्यतेऽथापि पार्वती ।

सुशिरं रक्ततत्वान्तमतिमार्गविनिर्गतम् ॥ २८ ॥

साध्यं तं चिन्तयित्वा तु तेन साध्यं विचेष्टयेत् ।

व्यूहमाकर्षयेच्चीघ्रं तन्तुनैव विनौकसाम् ॥ २९ ॥

प्रविष्टं बिन्दुमार्गेण तत्कलाजालमालितम् ।

हृच्चक्रं सामरस्यत्वादहन्यहनि तन्मयम् ॥ ३० ॥

कुरुते यः समाधिस्थस्तस्य ः तस्य शब्दाष्टकेन तु ।

मुक्ताच्युतमहावक्षा लक्ष्म्या याति दासताम् ॥ ३१ ॥

शूलकं दलमध्यस्थं तत्स्थं कुङ्कुमवारिणा ।

आलिख्याष्टदलं पद्मं बीजं तन्नाभिमध्यगम् ॥ ३२ ॥

बीजगर्भन्तु विन्यस्य प्रमोदपुटितं ततः ।

मन्त्रान्तः सर्वतोभद्रमिदमेव समालिखेत् ॥ ३३ ॥

सदा प्रमुदितं लिख्य सर्वेषु दलमात्रसु ।

पार्श्वेषु वेष्टयेत् पश्चात् सप्तधा बीजमायया ॥ ३४ ॥

ततो गुप्तप्रदेशस्थमहन्यहनि मन्त्रवित् ।

मालत्याद्यतिसौगन्धैः स्त्रग्भिः संपूजयेन्मुदा ॥ ३५ ॥

साध्यस्य जायते चिन्ता प्रथमे दर्शने प्रति ।

द्वितीयेन्वेषणोत्सादे प्रेषयेदभिसारिकाम् ॥ ३६ ॥

तृतीयेऽह्नि गोनाभितापितांश्च विषानुदम्।
वदनाम्बुप्रजालाब्जकुमुदानीव सेचयेत्॥ ३७॥
चतुर्थे दीर्घनिश्वासी मालायं वा प्रजल्पति।
मदनाग्निगृहीतस्तु पञ्चमस्वरगीतगः॥ ३८॥
अन्वग्घरिति सोऽत्यन्तं क्षमात्यक्तस्तु पञ्चमः।
उन्मत्तचेष्टितावस्थः षष्ठे स्थाने परिच्युतः॥ ३९॥
भ्रमते ग्रामारण्यांस्तु वीरदर्शनलालसः।
अशुचिः स्मरणामात्रप्रपीडितो व्याधिभिः स्यात्॥ ४०॥
अष्टमेति सुदुःसहैर्नवमे च भवेज्जडः।
कोष्ठवन्निश्चलाकृतिः सप्तमे त्यक्तभोजनः॥ ४१॥
साध्यशब्दो भवत्याशु ध्यायन् स्याद् दशमे हनि।
तस्माद्दिनत्रयं कार्यं यन्त्रमेतद् विपश्चिता॥ ४२॥
अन्यथोन्मत्तरूपः स्याद् भिषक् स्याज्जगतोऽस्य कः।
खादिराङ्गारवह्नौ तु साधनत्रयतापनात्॥ ४३॥
आकर्षयति कामिन्यः सप्ताहाच्चतयोजनात्।
मध्यान्ते मोहकृत् प्रोक्तमुन्मादयति रक्तगम्॥ ४४॥
तीक्ष्णतैलविषाक्तन्तु वपुषो दाहकृन्मतम्।
क्षीरान्तः शान्तिमाधत्ते मुष्टिं त्रिमधुरान्तगम्॥ ४५॥
आयुःप्रवृद्धये मन्त्री विश्रमेदुपशान्तये।

नृपतस्करतः खिम्भ्यो भयाद्धेतिसमुद्भवान् ॥ ४६ ॥

त्रायते तन्महायन्त्रं मधुरत्रयसंस्थितम्।

द्विषकृद्धुटिकान्तस्थं मृत्युकृच्चापि मध्यगम्॥ ४७ ॥

दीर्घकण्ठसकृन्मध्यपूजितं गमने हितम्।

अथ किं वहुनोक्तेन शान्तघोरघनाश्रयम्॥ ४८ ॥

यन्त्रमेतन्महीपाल सौम्यं क्रूरं तु साधयेत्।

यन्त्रानीतं समाख्यातं तन्त्रेऽस्मिन् यत् सुविस्तरम्॥ ४९ ॥

प्राङ् मया कैकशेशाय तुष्टेन गलकृन्तनात्।

तेषां मध्ये समाहृत्य सारं तद्भूरिविक्रमम्॥ ५० ॥

प्रकाशितमिदं तुभ्यं हैमवत्या अनुग्रहात् ।

मणीनां कौस्तुभो यद्वद् शत्रृणां मृत्युदायकः॥ ५१ ॥

ग्रहाणां भानुमाली च तेजसां च दृग्गुष्णगुः।

तथैतत् सर्वयन्त्राणां यन्त्रं मुख्यमुदाहृतम्॥ ५२ ॥

शक्तिभिः सुप्रसन्नाभिरनुध्यातो यदा नरः।

तदा महोदयां लेभे लेभे यन्त्रमिदं च यत्॥ ५३ ॥

महाराजेनाग्रमिदं गोरोचनसवेणिकम्।

योगिनीरजसा विद्धं लिखेत् तेन कुशेशयम् ॥ ५४ ॥

पत्राष्टकसमोपेतं कालिका नाम गर्भिणम्।

संलिख्य नाभिमध्यस्थं दलेऽष्टे कलिकां ततः॥ ५५ ॥

योगिनीवेष्टितं व वेष्ठितं ह्येतं ह्येतद् यन्त्रं भूर्जप्रतिष्ठितम्।
स्वनासासृक्समोपेततमश्वत्थान्तं निधापयेत्॥ ५६॥
पत्तनं नगरं ग्रामं पुरं घोषं महापुरम्।
उपघ्नस्थोऽपि योगीन्द्रः कर्षयन्नाम लेख्यतः ॥ ५७॥
पुरमेकाररूपन्तु लिख्य तत्कर्णकोटिषु।
स्वतः कण्टकिनं कृत्वा नामान्यंभःप्रतिष्ठितम्॥ ५८॥
साध्यस्य लिखितं गर्भे लिखेद् दिक्षु महोदयाम्।
गोरोचनेन भूर्जे तु सर्वेस्मिंल्लिखिते सति॥ ५९॥
वृषोऽन्धशृङ्गं शृङ्गस्थां रोधसः सरितोऽब्जगाम्।
सप्ताम्बुजवनस्थां तु वल्मीकशिखरालयाम्॥ ६०॥
मृदस्थिकृमिकेशादीन् कृत्वाकृतिं बुधः।
कारयेन्मत्स्यरूपन्तु प्रयोगं तद्धृदि क्षिपेत्॥ ६१॥
तदस्थिनलिकाक्षिप्तं ततो गुमूत्रमध्यतः ।
संस्थितं दिवसान् सप्त पूजयेत् सुसमाहितः॥ ६२॥
त्रिसन्ध्यं चानुद्विग्नो हेतुभिः सप्तमेऽहनि।
नान्यः पुंसगणावृन्दं कर्षयेल्लिखितान्वयम्॥ ६३॥
करालगलके वद्धमेतदुच्चाटकृत् स्मृतम्।
साध्यनाम विनिक्षिप्य योगिनीजठरस्थितम्॥ ६४॥
वेष्ठयेत् सप्तवारन्तु या मात्रालम्बिनी तया।

स्वनाम्ना तु समाकृष्य ं तेननूद्वध्य योषितः ॥ ६५ ॥

लिखित्वां धूलिकायान्तु त्रिसन्ध्यं ं खदिरानले ।

तापनाद्वशमायाति भार्या वाचस्पतेरपि ॥ ६६ ॥

द्विपुटे ग्रन्थिहीनेऽपि भूर्जे विरमशालिने ।

गोसकृद्रसगो कुन्थ काश्मीरजद्रवेण तु ॥ ६७ ॥

चतुर्दिक्षुः थधृन्नाम पूर्णचन्द्रेण वेष्टयेत् ।

तद् बाह्ये मण्डलाविष्टां लिखेन्मालालिपिं क्रमात् ॥ ६८ ॥

उत्तमाम्भसिकारुद्धं क्षिपेदङ्कुशं मूर्द्धनि ।

मरालषट्कलाधारां सूचीं वा दिविराजते ॥ ६९ ॥

तद् विनिक्षिप्य गर्भे तु तत् सर्वं पटलस्य तु ।

शिरोधिकारचन्द्रे तु ध्वनिं वीर्यवतो लिखेत् ॥ ७० ॥

रुद्रपादान्धतामिस्त्रनितम्बस्य महात्मनः ।

रक्षैषा वार्षिकी यस्य देहे तिष्ठति सैन्धव ॥ ७१ ॥

न तस्य भूतवेतालाः शाकिन्यो ग्रहपूतनाः ।

दृगङ्जलिनो भुजगाः पलाशिद्वेषिणोऽहिताः ॥ ७२ ॥

प्रभवन्ति महाघोरा न चाप्यामयजातयः ।

सातङ्कमविविक्तं च सुप्तं क्रुद्धं प्रहर्षितम् ॥ ७३ ॥

प्रलुप्त समयाचारं प्राप्तच्छिद्रमपीश्वरि ।

नार्चयन्ति दुराधर्षा रक्षितं रक्षयानया ॥ ७४ ॥

अनया रक्षितं चैव त्रैलोक्यं दशकन्धरः ।
निर्जित्यावज्ञया यातो लङ्कां स्वभुजयार्जिताम् ॥ ७५ ॥
समयच्च्युतस्य विहृता यदा शान्तेर्मया पुनः ।
रामेणापि तदानी तं तत्तस्यायुर्यमक्षयम् ॥ ७६ ॥
कालसंकर्षणी नाम रक्षेयं शासनादिषु ।
लिख्य वाचायुषोवृद्धिमनन्तां जनयेद् गिरिः ॥ ७७ ॥
अथ दूतीगणस्याग्रे तं त्रिकालागमाश्रितः ।
योजयेत् तस्य वक्ष्यामि फलं भिन्नपदाश्रितम् ॥ ७८ ॥
वैरिञ्चो वा मम ज्येष्ठस्त्रिलक्षं परिवर्तयेत् ।
मूलदूत्यक्षरं यन्मे स भुङ्क्ते भूमिमण्डलम् ॥ ७९ ॥
रौद्रीसंघा द्वितीयार्णोराविभूतिं प्रसाधयेत् ।
तारकस्य तृतीयोऽपि ह्यसृजन् तैजसं बलम् ॥ ८० ॥
संयोगान्मुञ्जकेशिन्याश्चतुर्थ्यार्णोनिलंत्वदः ।
धर्मघोषाश्रया जप्ता स्वपदं पञ्चमी ददेत् ॥ ८१ ॥
षष्ठी चापि शुभा शीर्या सङ्गाद्वीर्यं हिमस्तुतः ।
तस्याः रूपाधिकारित्वमकरोज्जयरूपतः ॥ ८२ ॥
सप्तमी चर्ममुण्डाया संघाज्जस्वा विवस्वतः ।
स्वरूपमभजत् पारमपरं चाधिकारकृत् ॥ ८३ ॥
आमर्दकाङ्घ्रिसं स्पृष्ट्या प्रजप्ता चाष्टमी नृप ।

Sampath_eBooks

पुंस्तत्त्वंसरहस्यं च निःस्वरूपं चकाशयेत् ॥ ८४ ॥

आदितो लक्षवृद्ध्या तु जपोऽयं कीर्तितो मया ।

सर्वावाप्तिकरः पुंसां कालसंकर्षणीमते ॥ ८५ ॥

चतुर्णां किङ्कराणान्तु जपलक्षे कृते सति ।

वश्याकर्षणप्रेष्यत्वं सर्वजन्तषु निवर्हणम् ॥ ८६ ॥

जपत्रयप्रयोगस्तु क्रमशः कर्मसिद्धिदः ।

येन येन प्रकारेण चक्रमेतन्महोदयम् ॥ ८७ ॥

योज्यते तेन तेनैव विधायै व ख विदधै तन्महोदयम् ।

महोदयं प्राप्य तु कामभोगानम्भोजसौभाग्ययुतो हि को नु ॥ ८८ ॥

लक्ष्मीविधानान्न भुनक्ति लक्ष्मीः ।

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शति साहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां विन्शतिमः पटलः ॥ २० ॥

एकविंशतिः पटलः

श्रीभैरव उवाच

अथातः श्रूयतां वत्स सर्वारम्भकृताश्रये ।

भाग्यहीने यथा लक्ष्मीर्न निकायं समाश्रयेत् ॥ १ ॥

तथा वच्मि विधानन्तु पारम्पर्यक्रमागतम् ।

परेण भैरवेनादौ पूजितं भुवनाधिपैः ॥ २ ॥

अधिकारवशात् प्राप्तं मयाप्यस्वरभैरवान् ।

योगिनीकमरुद्धन्तु मालाद्यं वर्णपञ्चकम्॥ ३॥

चेतोधामादि दृष्टान्तं भवेत् पापं च पञ्चकम्।

प्राक् चोदितं तमालन्तु स्फुरद्वह्निकरोद्गिरम्॥ ४॥

अनन्तचर्मलालञ्च दशमेन प्रकल्पयेत्।

पद्मं जलादिकिञ्जल्कं कर्णिकाबीजमण्डलम्॥ ५॥

धनुषा कल्पयेन् मन्त्री गावस्तच्चरसेन तु।

वपुर्मालामयी कार्या गुह्यशक्तिपुटस्थितम्॥ ६॥

हृल्लक्ष्मीवाचकं प्रोक्तं नमोऽन्तं प्रणवादिकम्।

लक्ष्म्यर्थं पूजयेल्लक्ष्मीं लक्ष्मीमण्डलमध्यगाम्॥ ७॥

कालीकलाकलापेन समन्तात् परिवारिताम्।

जयद्रथ उवाच।

लक्ष्मीमण्डलविन्यासं न्यासं लक्ष्म्याः कलाक्रमम्॥ ८॥

सनाम ं श्रोतुमिच्चामि ब्रूहि चन्द्रार्द्धशेखर।

श्रीभैरव उवाच।

पद्मवक्रकृतकर्ममण्डले ग्रन्थितुर्यशत वर्तने कृते॥ ९॥

धार्य वेधसि सचिह्नलक्षितात् कोष्ठकान्सकलतत्वसंख्यया ।

तत्पुरे युगलकोष्ठमानया पूर्ववद् विहितनत्रिवर्तनः ॥ १०॥

तत्पुरेऽपि युगकोष्ठलिप्सया ं वर्त्तयेद् विहरणाय वीथिकम् ।

क्रान्तिबाह्यगतकोष्ठकत्रिके द्वारतुर्यरचनां विभाजयेत्॥ ११॥

Sampath_eBooks

सर्वकर्णगृह तुर्यगे बाह्यबस्तुदशसद्गृहाश्रिते ।
अन्तयोर्मदनबाणसंख्यया धार्य षट् तदनुमध्यगान् हरेत् ॥ १२ ॥
सद्मनामथ चतुष्ककन्दरे लोपयेद् ध्रुवगतं समन्ततः ।
तत्परस्य युगलस्य मध्यमां लोप्य जीवविगतां हि रेखिकाम् ॥ १३ ॥
अन्तरस्थलतया समानगं वर्त्य बाह्यमपि सल्लतात्रयं ।
लोपयेत् सकललोप्यलक्षणं यल्लतासु बहिरन्तरस्थितम् ॥ १४ ॥
एवमेतदखिलं हि लक्षणं प्रोक्तमस्य कठिनस्य सुव्रतम् ।
षोडशच्छदकुले मया कृते पूर्वदृष्टविधिना विवर्तयेत् ॥ १५ ॥
कण्ठानां बाह्यरेखाणां लोपालोपेऽपि लक्षणम् ।
विद्यते वाहयेद्वारं याम्यं पश्चिममेव वा ॥ १६ ॥
सनन्दिं बुधविम्बाभं श्रीवत्समतिशंसितम् ।
शेषशोभावसानन्तु भवते देशिकेच्छया ॥ १७ ॥
लक्ष्मीमण्डलमेतद्धि सर्वकामफलोदयम् ।
शिरश्छेदे महातन्त्रे कथितं सिन्धुभूपते ॥ १८ ॥
एवं निष्पन्नधामा तु विविक्ताङ्गः प्रसन्नधीः ।
मुक्तादामवितानाढ्यं घण्टाचामरमालितम् ॥ १९ ॥
क्षीरवृक्षसमुद्भूतं रागादिद्वारशोभितम् ।
गिरितीरकृतोपान्तपताकाटोपाराजितम् ॥ २० ॥
विचित्रतैलवर्त्यान्तर्दीप्तं सा द्रवमालया ।

प्रविश्य यागनिलयं कृतपूर्वक्रियाक्रमः ॥ २१ ॥

पर्जन्यास्योपविष्टस्तु हुंफडन्तायुधेन तु ।

पानीयं शोधयेद्वह्निं सयमण्डलमालिना ॥ २२ ॥

प्रणवेनावसानेन प्लावयेच्च सवौषडा ।

विचिन्त्य क्षीरडिण्डीररूपिणीं विपुलां सुधाम् ॥ २३ ॥

ततः कोपात् तदाटोपां कारयेत् स्वलतायुगाम् ।

दशसप्ताक्षरां न्यस्य करजासु कलां न्यसेत् ॥ २४ ॥

वामतर्जनिकाद्यास्तु यावत् सव्यां प्रदेशिनीम् ।

सृष्ट्याद्या न्यस्य सव्यान्तो यावद्वामां प्रदेशिनीम् ॥ २५ ॥

भूयोऽप्यनुक्रमाद् देया वस्तुतस्तुशिवादयः ।

ततः स्त्वावाहयेल्लक्ष्मीं मालांगव्यापिनीं प्रिये ॥ २६ ॥

कृतस्त्वङ्गुष्ठयोः शान्तं देशिन्योस्तत्परः शिवः ।

अन्तयोर्जलिनीं न्यस्य न्यसेच्चैव तदन्तयोः ॥ २७ ॥

पुरुजातिमहाज्योतिः सुरयोरावृतं शुभम् ।

संवर्त्ततरणिव्रातं तेजोऽस्त्रं च कनिष्ठयोः ॥ २८ ॥

विन्यस्य ध्यायेन्मुक्तिं लक्ष्म्या तत्तत्स्वरूपया ।

प्राणायामादिके तस्मादन्तःकरणपश्चिमे ॥ २९ ॥

कृते कर्मणि लक्ष्म्यार्घं षडङ्गं विदधेद्गुरुः ।

ततः शक्तिकराद्यन्तु लक्ष्मीकुम्भावसानगम् ॥ ३० ॥

दृष्टान्ताद्येन कर्तव्यं कर्म सर्वं सुमेधसा।

कृत्वात्मभुवि विश्वन्तु पञ्चगव्येन गन्धिना॥ ३१॥

अनन्तं तत्र विन्यस्य द्वात्रिंशद्भुवनाधिपम्।

शतकोटिप्रविस्तीर्णामनन्तां कर्मरूपिणाम्॥ ३२॥

विन्यस्याव्यक्त चरमं दीर्घनालं प्रविन्यसेत्।

नरादिकण्टकाटोपसमत्वागतमण्डलम्॥ ३३॥

चित्तं मायामयं दत्वा चिन्तयाब्जं सुधात्मकम्।

ज्ञानाण्डकेसराकीर्णं ज्ञानेश्वरदलालयम्॥ ३४॥

शक्तिमायोत्करं शान्तं नाभिमण्डलमण्डितम्।

रश्म्याष्टादशबीजाढ्यं शक्त्युदन्वति संस्थितम्॥ ३५॥

दीप्तभास्वत्सुसंपूर्ण बिंबोपममनाविलम्।

ध्यानेन निर्मलीकृत्य तत्र विद्येश्वरीं न्यसेत्॥ ३६॥

मस्तके कंदले अष्टौ आस्ये कण्ठोरसि क्रमात्।

ज्ञानाश्रयोदरे नाभौ नितम्बे करयोर्द्वयोः॥ ३७॥

तथोर्द्धं जानुगुल्फेषु सृष्ट्याथा विन्यसेत् क्रमात्।

सृष्टिः रिद्धिर्द्युतिर्लक्ष्मी मेधा कान्तिः स्वधा स्थितिः॥ ३८॥

शिवारुद्रहता दृष्टिः साधना स्पृहणा धृतिः।

समाधिर्वासनान्तैताः षोडशैव गिरः कलाः॥ ३९॥

नामानुक्रमयोर्न्यस्य लक्ष्मीमावाहयेत् ततः।

हेमभूषणभूषाढ्यां तप्तकार्तस्वरश्रियम् ॥ ४० ॥

कुङ्कुमांशुकपीताङ्गीं पीतमाल्यानुलेपनम् ।

पद्मरागमणिव्रातविनद्धाङ्गददोर्लताम् ॥ ४१ ॥

चित्ररत्नचितोन्नद्धजटाटोपप्रकोष्ठिनीम् ।

सर्वरत्नप्रभाजालग्रैवेयकविराजिताम् ॥ ४२ ॥

महामणिरुगुद्वाहि कृतकुण्डलकर्णिकाम् ।

पिशङ्गमणिसन्नद्धगुणत्रयनितबिनीम् ॥ ४३ ॥

क्वणन्मणिमयारागनुपूराङ्कितपद्युगाम् ।

नानारत्नचिताकारमुद्रिकारचिताङ्गुली ॥ ४४ ॥

प्रोल्लसद्दललावण्यसरोरुहमुखाश्रयाम् ।

स्फुरन्नीलोत्पला लोकाः सपुष्पा ः मादकोद्धताम् ॥ ४५ ॥

एकहस्ते कृताम्भोजामन्ये भद्रघटालयाम् ।

विकिरंतीं तृतीयेन मणिवृष्टिमनातुराम् ॥ ४६ ॥

चतुर्थेनामृतापूर्णं मणिपात्रकृतादराम् ।

सर्वावयवसंपूर्णां स्वागताभाषणे कृते ॥ ४७ ॥

हृदा संस्थापनं कृत्वा पूर्ववच्चर्विधने ।

पद्मभद्रघटाभ्यां तु कर्तव्या सन्निधानता ॥ ४८ ॥

प्राग्वद्दर्भादिकं कृत्वा वपुंषि क्रमशो ददेत् ।

सकले निष्कलं योज्य स्वभावः समुदाहृतः ॥ ४९ ॥

Sampath_eBooks

स्नातायामभिषिक्तायां प्रदद्यात् पीतवाससी ।

मसृणेन नाभिपङ्कविलिप्तायामलङ्कृतिः ॥ ५० ॥

दातव्या प्रोदिता सर्वा माल्यानि सुरभीनि च ।

विष्णोरारभ्य मन्त्रेषु यावती पत्रसंस्थितिः ॥ ५१ ॥

स्थितिपूर्वाः कलास्तावद् भावनान्ताः प्रकल्पयेत् ।

शिवाद्युष्मावसाने तु स्वतन्त्रेन प्रतिष्ठति ॥ ५२ ॥

लक्ष्मीवेशधराः सर्वाः सर्वा ः व्यालोलचक्षुषः ।

कारयेन्निर्भरं प्रह्वमध्याध्यासितविग्रहाः ॥ ५३ ॥

पद्मचामरहस्तास्तु सम्मुखाः स्वामिनीं प्रति ।

सर्वोपचारैस्ताः पूज्या भोगाङ्गानि प्रविन्यसेत् ॥ ५४ ॥

नाभावग्नौ गुह्यौ पूज्य रूपं दिवि शिरस्ततः ।

योगिनी यातुधाने तु नभस्वति पुरुष्टुतम् ॥ ५५ ॥

लक्ष्म्याः पुरस्थितिं चाक्षि पूजयेत् क्रमशो गुरुः ।

पीठाभ्यासगतं बाह्ये केकरास्त्रं हविर्द्युतिम् ॥ ५६ ॥

पूजयेद् दिक्षु सर्वासुत्खातकोरगजन्तुरम् ।

एकस्मिन् निर्मिता यागे व्यतीते तु क्रमद्वये ॥ ५७ ॥

क्रम एषोऽस्य निर्दिष्टो रक्षाकर्मणि सर्वतः ।

चन्दनागुरुकर्पूरर्लवङ्गैलासमावृतम् ॥ ५८ ॥

सहरिन्तु दहेद् धूपं लक्ष्म्यादीनां प्रति प्रति ।

दत्तार्घेभ्यः क्रियाजालं दर्शयेद् देहदर्शितम्॥ ५९॥

आत्मदेहाङ्गुलिक्षेपाच्चक्राकारं मुहुर्मुहुः।

उभयोर्हस्तयोरेव मुद्रा सङ्कर्षणी मता॥ ६०॥

अनया देवताः सर्वा निःशेषाधारसन्ततिम्।

प्रवेशितं तु भवते मन्त्रग्राममशेषतः ॥ ६१॥

सर्वज्ञसिद्धिदा ह्येषाभीष्टमन्त्रनियोजिता।

एषा मुद्रा महाभागा सर्वदेवनमस्कृता॥ ६२॥

वद्धायां प्रणमन्तीह सर्वाकाराश्चराचराः ।

नानया सदृशी मुद्रा त्रिषु लोकेषु विश्रुता॥ ६३॥

सारैषा सर्वतन्त्राणां सिद्धीनां च परा स्मृता ः।

एतां सन्दर्शयेल्लक्ष्म्या लक्ष्म्योर्वीरकृतादरः॥ ६४॥

अथ किं बहुनोक्तेन सर्वचक्रेषु सुव्रत ।

सामान्यैषा समाख्याता मुद्रा सङ्कर्षणी मया॥ ६५॥

अनुक्तेष्वपि दातव्या तत्क्रियार्थप्रपूरिणी।

स्वरभूषादिकां दीपाममृतेन प्रबोध्य तु॥ ६६॥

सङ्कल्पयन्निवेद्यन्तु नानारसमतः परम्।

मुद्राप्रमाणपूजानामुपचारे कृते सति॥ ६७॥

सुगन्धवसुसंयुक्तां दद्यात् ताम्वूलमादरात्।

शतं जप्त्वा निवेदित्वा मायाधूपध्वजालयम्॥ ६८॥

तत्र पूर्वविधानेन भावं निर्वत्तयेद् विधम्।

ततोऽग्निपुरुषे न्यस्य लक्ष्मीचक्रमनाकुलः ॥ ६९ ॥

तत्र निर्वर्त्य यत्नेन मानवीं त्रिविधां क्रियाम्।

शिशोर्यागप्रवेशान्तं ततः कर्म समाचरेत्॥ ७० ॥

निरूद्धयोस्ततो मन्त्रैः सञ्चितागामिकर्मणोः।

प्रारब्धकर्मणा लक्ष्म्याः कलसं शोधयेद् गुरुः ॥ ७१ ॥

लक्ष्मीकलास्तु याः प्रोक्तास्ता एवामूलसंज्ञया।

अलक्ष्म्याः कीर्तिता देवि कलादुःखप्रदायिकाः ॥ ७२ ॥

सन्ताड्य केकरास्त्रेण शिरःप्रभृतिधामगा।

तत्संपुटनियोगेन गृह्य संहारमुद्रया ॥ ७३ ॥

मन्दिरानलसंयोगाद् देव्या त्रिदशमूर्द्धनि।

प्राग्वदायुधसंयोगाद् गृह्य वह्नौ नियोजयेत्॥ ७४ ॥

न युक्तां प्रोक्षयित्वा तु केकरास्त्रपुटीकृताम्।

हुंफडन्तां कलामाहुस्त्रिपञ्चादिशतान्तिकाम् ॥ ७५ ॥

शते पूर्णाहुतिर्देया तदर्धे च विपश्चिता।

शेषे कलालिकाये तु हुते पूर्णा प्रशस्यते ॥ ७६ ॥

एवं लक्ष्मी कलाजाले संदिग्धे स्थाणुना तदा।

प्रणवादिवौषडन्ताः संयान्त्याहुतियोगतः ॥ ७७ ॥

लक्ष्मी कलाः स्ववपुषि समापाद्य क्रमेण तु।

Sampath_eBooks

लक्ष्मीदेहात् समाकृष्य हृदा पूरकयोगतः ॥ ७८ ॥

योजयेच्चिष्यदेहे तु हृदि संपुटितां कलाम् ।

पाशेन व पाषेन वेष्टयित्वा तु रोधयेदङ्कुशेन तु ॥ ७९ ॥

ततो होमः प्रकर्तव्यः संपाताहुतियोगतः ।

संख्यानमाहुतीनान्तु पूर्णायाश्च पुरोदितम् ॥ ८० ॥

ज्ञातव्यं चुम्बकेन्द्रेण कलाक्रमविधायिना ।

कलान्तिमावसाने तु लक्ष्मीमावाह्य रोधयेत् ॥ ८१ ॥

तस्याः सनातनस्थित्यै शतं सहस्रमेव वा ।

पद्मानां श्रीफलानाञ्च जुहुयात् क्षौद्रसर्षपाः ॥ ८२ ॥

एवं लक्ष्मीशरीरे तु होमसंपर्कतो गुरुः ।

शिशोर्विन्यस्य जृम्भे तु रूपे लक्ष्म्यात्मकोन्नतम् ॥ ८३ ॥

ऋद्धि वृद्धिविशाखान्ता धात्री सिद्धार्थिका स्मृता ।

क्षोदेनानेन तस्याङ्गं समुद्वर्त्य मुहुर्मुहुः ॥ ८४ ॥

ततः संस्नापयेच्चिष्यं निर्मत्स्योक्तविधान्तः ।

घटो योगः समाघ्रातस्तत्र मायोपयो न्यसेत् ॥ ८५ ॥

तन्नन्दिनीसमे सोऽत्र द्रुतये यूषरूपिणीम् ।

ध्यात्वा तत्रासनं दद्याद् दीप्य जन्मावसानिकम् ॥ ८६ ॥

तत्र लक्ष्मीं समावाह्य कुर्यात् कर्मत्रयं त्रयम् ।

मालायां व्याप्यतो ं मन्त्री कलाभिस्तां स मन्त्रवित् ॥ ८७ ॥

भोगाङ्गानि प्रविन्यस्य विन्यस्येत कलास्ततः ।

गन्धादिपूजिते तस्मिन् मायाङ्कुशनिरोधिते ॥ ८८ ॥

गूह्यशक्तिपुटान्तस्थं लक्ष्म्या कुम्भ शतेन तु ।

सहस्त्रेण हि जप्त्वा तु पूर्ववत् सिञ्चयेच्चिशुम् ॥ ८९ ॥

इति लक्ष्मीघटपयसा स्नानमलक्ष्मीं विमुक्तसर्वाङ्गीम् ।

पश्यामि न तारगणाञ्जगति गतसंपदो गति युक् ॥ ९० ॥

लक्ष्म्याभिषिक्तमृगाङ्का शुकवलिताः सकलदुरिततिमिरहराः ।

शरदिव साधक मूर्त्तिर्भ्राजति शुभ्राजितानान्दी ॥ ९१ ॥

निखिलगतममृतं मलपटलपावकं दुर्भगमम्बुधरमर्दनम् ।

जनयति न कस्य लक्ष्मीं लक्ष्मीचक्रं क्रमप्राप्तम् ॥ ९२ ॥

यदि वाञ्चसे किमिह पौरुषैः सुखैः गुणविस्तरं वपुषि भासुरं निजे ।

कृतनिश्चयो विदितसाधनो हि तच्चरणाम्बुजं भज महेशसंपदः ॥९३ ॥

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामलेचतुर्विंशतिसाहस्त्रे

प्रथमषट्के श्रीकालसङ्कर्षण्यामेकविंशतिःपटलः२१ ॥

द्वाविंशतिः पटलः ॥

श्रीभैरव उवाच ।

अथातिनिबिडभाग्यपटलपिहितसुखां कुविधनुर्यमपहाय

विविधसाधनविद्युल्लेखा विमालिनी ।

अमृताम्बुधाराकदम्बकप्रकाशितवीरमूर्त्तिमयीम्

हृतसन्तापां लक्ष्मीभट्टारिकां प्रणम्य तस्या ः विधानं वक्ष्ये ॥१॥

प्रागुदितान्यतमस्थानपदेशागां लक्ष्मीं लक्षमेकं जपेत्।

तद्दशभागकृतहोमो देवि स्वरूपधारी त्रिसप्ताहमामलकभुग्

बर्हिपिशितभोजी वा चीर्णलक्ष्मीव्रतो विमला।

वारिघनतरङ्गमालामालिनः विकचकोकनदरेणुपटलपिञ्जरते स्थानसरसः

पात्रमाश्रित्य लक्षमेकं जप्त्वा शिथिलनालसरोरुहा युतहोमाद् द्विदशग्र

ामलाभो भवति॥ २॥

द्विगुणात् त्रिगुणाद्दशगुणाच्चतुर्गुणान् ग्रामायुतमाप्नुयात्।

पञ्चधा माण्डलिकः स्यात् षोढा सकलवर्षाधिनिम्नगोपेतां महीं भुङ्क्ते।

उदितलक्षवृद्ध्या तु सकलभुवनदिगावलिमीशान्यान्तां सम्पदश्च भुङ्क्ते क

तद्विसप्तलक्षविधिर्मुञ्जकेशिनं सभृत्यभार्यं विधेयतां नयति॥ ३॥

त्रिपञ्चलक्षजापीमाज्ञापयति पञ्चायुतेन कमला खनदी कमलकरा साक्ष

ात् साधक।

वपुषि लीयते सर्वमङ्गलाग्नियोनौ विकासिनीं राजीवायुतहोमाद् ग्र

ाममाप्नुयात्॥ ४॥

तत्पश्चाद् तत्पक्षाद् द्विगुणमेवं तद् द्विगुणाद् द्विगुणतरलाभः स्यात्।

प्रोत्फुल्लनीलोत्पलायुतहोतुः सकलरमणीजनो दासतामुपैति त्र्ययुतहोमा

नियतमजिमूलकलाभो भवति॥ ५॥

अयुतहोमाद् रैगांकं वपुर्गच्चति।

एवं कुशेशयानां वैवस्वतम् ॥ ६

कुमुदानां कुवेरं रक्तारविन्दानां वसु ।

रक्तोत्पलानां लक्षहोमात् स्वयमिन्दिराम् पश्यति ॥ ७

रक्तारविन्दविरचितमालावलम्बितगलः ।

सकलावयवानां वांबुरुहभूषः ॥ ८ ॥

पीतवासास्तापिकापुष्परेणुरञ्जितकायः ।

सुरभिधूपधूपितस्ताम्बूलपूर्णमुखो जनों जिताक्षः ॥ ९ ॥

पञ्चास्त्रधृक् प्रयुतं जप्त्वा लक्षैकहोमान्ते समारूढः ।

गजविमानां सकललक्ष्मीचितां लक्ष्मीं सम्भोगमाप्नोति ॥ १० ॥

सहस्राणां चक्रवर्तित्वं लभेत् ।

रोहितानामशेषनित्याधिपतिः स्यात् ॥ ११ ॥

प्राचीनानां नभोवारणरोहणेन याति ।

श्रीगुरुस्थानानां योगिनीनां सामान्यो भवति ॥ १२ ॥

रसलीनां मातृपदमाप्नुयात् ।

सकलजलजलक्षहोमाद् वीरेश्वरपदास्पदी स्यात् ।

यः पुनः सुलक्षणोऽपि तत्प्राप्त्या मध्यमसिद्ध्यर्हो भवति ॥ १३ ॥

कञ्चावर्गयोश्चाजपौष्णामिषयोर्हारी तलावकतित्तिराम्बुवटककेकिकार

ंडकलक्षणवीनां नियतहोतुर्गरुत्मान्स्वपदमर्पयित्वा निरधिकारी स्यात् ।

अथ लक्ष्मीं धवलालये सुसमे मार्जितस्थण्डिले प्रागुद्दिष्टविधिना

प्रपूज्यासितया सुरा जवफल्गुषविविधरसानि तद्रजांसि च मु
ण्डविनिहितानि दत्वा परितः काण्या पूरितपात्रगालयां शोभां विदध्यात
तदन्ते महाज्यपूरितकन्दलांधकारारिमालाभिर्विपुलां शोभामाचरेत् ॥
१४ ॥
ततोऽयुतं जप्त्वा प्रागुक्तहोमानि सहस्रहोमे कृते सति ।
भगवत्याः पुरो मनःशिलातालतापिच्छकुसुमरजोभिः प्रागुक्तमम्बुजं
निर्वर्त्य तदपि कुम्भान्तः प्रक्षिप्य कर्मातिशक्तिपर्यन्तां सनखां कृत्याब्ज
ं नानावाग्रसामलभृतपूतमुपाचम्य कलाद्यङ्गांतं सकलीकरणं कुर्यात् ॥
१५ ॥
दलस्थापितकलाविन्दोर्लक्ष्म्या विकासात्मानमनन्यरूपमभिध्यायेत्
तेन च प्रवर्तकत्वम् ।
सकलकाष्ठान्तरालापूरणादनन्तरमेव लक्ष्मीत्वमुपगतः
साधकस्तेजोनिध्यन्तमस्खलितमुपभुज्याविशृङ्खलोऽमृतत्वं
साधकस्तेजो प्राप्नुयात् ॥ १६ ॥
अथ देव्यग्रतोऽवस्थितः सर्षपात् कोटितैलाक्तं मनोरुगद्वारमृत्पूरितं
सितकपाले दापयेत् ।खञ्जिरीटिकाभि वधाम्नाम्बुनाभिषिञ्चयेत् ततः प्रक
द्धामन्वगेव प्ररूढां शस्त्राभिजप्तदात्रेण विलूनां विमर्द्य ततो
मङ्गलस्थानीय दृषदोः संघर्षाच्चूर्णीकृत्य तच्चूर्णं सितं शिरसिकृत्य
देवीशतसहस्रजप्तं वा देव्यै षडङ्गं निवेद्य ं शेषस्येन्दुविरचिता

मौलिभागाः सिद्धेभ्योदद्यात्।

अवशिष्टपांशुना यावज्जीवं रजोरूपिते शिरसि सत्वमवचूर्ण्यते तद्रूपतां नयति ॥ १७ ॥

अवेणिकेनावगुण्ठिताणुरदृश्यो भवति।

रोचनासमत्वाङ्गतिलकाद् गन्धर्वाधिपत्यं प्रसाधयति ॥ १८ ॥

एवं कान्त्या विद्याधराणां कुतद्य किन्नराणाम्।

तालेन पूर्वसिद्धानाम्। दरदेन यक्षाणाम्॥ १९॥

स्रोतोऽञ्जनेनामिषभुजां सिन्दूरेण गरुत्मताम्।

भृङ्गाद्यैर्मरुत्मताम्॥ २०॥

शुक्तिजन्यरेणुरञ्जितमिन्दोः श्मशानकुतपशिफामूलालोपितं पितृणां त्र्यग्निस्मरणादयुतं ब्रह्मणां चिताभूतिसंभृतमम्बिकानाम्।

नरपित्ताक्तं योगिनीनां सङ्गरापन्नेषुरलोलापृक्तं वीराणां विद्या ध्वजरजोमिश्रं लाकिनीनाम्॥ २१॥

नवोढा प्रथमपुष्पोपेतं मनोजन्मनः रुद्रसुमनोयुक्तं निधनपदानाम्।

मातृस्रगुपरचितं भूचरीणां योगिनीकुसुमान्वितमुभयचरीणाम्॥ २२॥

गुह्यकरजोरूषितं खेचरीणाम्।वीरप्रसूतसमरसं वीराणां भैरव्याकोशलुलितं भैरवपीठाधिष्ठित भैरवाणाममितसिद्धचूर्णं यत् सामर्थ्यद्रव्येन युक्तं प्रयुज्यते॥ २३॥

तत्सामर्थ्यमनायासात् प्रदर्शयति।

अथ किं भूयः प्रलपितेन तिलकाञ्जनचूर्णगुटिकालेपया दले परसरसायनादि सिद्धित्रयं प्रसाधयति ॥ २४ ॥

अशोकरन्ध्रे द्विरन्ध्रयुक्तसिता ताम्रस्निग्धकोकनदवर्णका र्णकारयद्रितरूद्रस्थविरहत्याधिदैवेऽतिशुभ्रवीरमस्तके कमठोरुकटाहे वा मणिभूरितारमरकतराजवर्तशुल्वायतनपत्रेषु वागुरुचन्दनवदना-शोकबकुलतिलकपुन्नागनीपचम्पकशिंशपाश्रीपर्णीदेवदारुहरिन्दिन्दु-कान्तिं विज्ञानविदुषा शिल्पिनाथषडङ्गुलादारभ्य पाणिप्रमाणां लक्ष्मीं स्वरूपनेपथ्यकृतास्पदां स्वमुद्रालङ्कृतां सर्वावयवसंपूर्णां स्वरूपां विचिन्त्य तन्नितम्बाधो वामनामतोऽष्टावष्टौ कलाः स्वरूपिण्यो लिखेत्।

देव्या उभयपार्श्वयोः स्तंवेन मांसलकिङ्किणीप्रोन्नतकुम्भाम्भो विपुलवृत्तायतं प्रोत्सृजत्या दैवीमूर्धपरिसरपुष्कराचलविधातारावुत्किरेत् ।अथाभिवर्गैकैनागरेखया समासादितपटफ लकभित्त्याम्बाचित्राद्युपासनात् क्वणत्कलसंपदः शाश्वताधिष्ठानाः समास्वादयेत् ॥ २५ ॥

कपालयोगिनीसामान्यकृन्मतज्ञाख्यं कपालं यो-व्युत्क्रमादनन्ताविलोकसप्तकक्षालिङ्गनविधात्र चिरादायतनपात्र सप्तकं स्यात्।

आगुरोर्वैष्णव्यः श्रैखण्डाद् ब्राह्मयस्त्रैमिषाद् यक्षिण्यः आशोकाद्

विद्याधर्य बकुलादशरसः ॥ २६ ॥

तैलकात्किन्नराङ्गना ः यौनाद् गान्धर्वयोषितः सिद्धकन्याश्चाम्का

तार्क्ष्यविलासिन्यः शैंषपाद् रक्षोबलाः काश्मीराद् भूपतिमहिष्यः

सुरदारुणाः सुरपुरन्ध्रया हारिन्ध्यादहस्करस्त्रियः तैर्मिकात्

पिशाचवनिताभूंरादव्युच्चिन्नां संसेवितात् साधकेऽनुपदमेव

दासतामुपयान्ति ।

लक्ष्मीं संयोगकर्तारीं सर्वावाप्तिकरीं मुखाम् ॥ २७ ॥

विदित्वा खेचरे तन्त्रे निर्लक्षणगतेऽद्भुतम् ।

कुसुमविधिं न वेत्ति न च साधकगात्रविधिं विविधगुणं न चास्त्रनिचयं

स्वनियोगसमम् ॥ २८ ॥

परिकरसंयुतञ्च नालं प्रथमानुगतं कथमखिलं भुनक्ति

शिवशासनशक्तिफलम् ।

इति भैरवस्त्रोतसि विद्यापीठे शिरश्चेदे श्रीजयद्रथयामले महातन्त्रे

चतुर्विंशतिसाहस्त्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां द्वाविंशतिः पटलः ॥

२२ ॥

त्रयोविंशतिः पटलः

श्रीभैरव उवाच ।

अथातो विदितं वीरैर्दिव्यैर्देवगणैरपि ।

सिद्धं सूक्ष्मं भवाद्यन्तु सर्वं वक्ष्याम्यनुक्रमात् ॥ १ ॥

Sampath_eBooks

वर्णिनां शुद्धजातीनां कन्याफलधिकारिणः ः।
प्रोच्यते रुद्रपुष्पन्तु तथा सप्तकृतेषु च॥ २॥
योषिन्मूलस्त्रगुद्दिष्टं मातृस्त्रक्परमेष्ठिना ।
गोरश्वाद् बन्धूपुष्पं योगिनीगुह्यकाख्यगम् ॥ ३॥
तयोः कुमारिकाख्यन्तु वीरभैरवनाशनम्।
पुष्पान्येतानि तन्त्रेऽस्मिन् षड्डुद्दिष्टानि शूलिना॥ ४॥
नानाश्चर्यकराण्येकवीरवीर्यवहानि तु।
रुद्रपुष्पविशेषेण चानुर्वर्ण्या वरस्त्रियः॥ ५॥
कर्षिता यान्ति दासत्वं साधकानामनादरात्।
मातृस्त्रक्तिलकाश्चैव सर्वमातृकुलोद्गताः॥ ६॥
दर्शनाद् वशमायान्ति वीराणां विश्वयोषितः।
शाकिन्यो रुद्रशाकिन्यो यो डाव्यो डामरिकाः शुभाः॥ ७॥
योगिन्यो वशमायान्ति तिलकाद्योगिनीस्त्रजः।
जपादीनां तु देवीनां रक्तादीनां तु सुव्रत॥ ८॥
नानातन्त्रप्रतिष्ठस्य कुसुमालकजन्मनाम्।
यान्युद्भवास्तुवनिभा यच्चन्ते त्वक्षमेलकम्॥ ९॥
तिलकां त्रिःसमाकृष्टां वीरेभ्यो गुदकास्त्रजः।
जायते वीरसामान्यो वीरो वीरविशेषतः॥ १०॥
पिण्डाकृष्टिं रसाकृष्टिं तरसा नभसि भ्रमात्।

जातियोनिविभागस्य व्यतीतस्य प्रवेदनम् ॥ ११ ॥

रूपाणां परिवर्तञ्च चित्रो भीमः सुमानसः ।

प्रसाधयति वीराणां वीरशासनवेदिनाम् ॥ १२ ॥

धनमिश्रममिश्रं वा पुष्पषट्कं नराधिप ।

न तदस्ति जगत्यत्र यदाश्चर्यं न साधयेत् ॥ १३ ॥

अथ वीरस्य गोप्यानि तथागोप्यानि सुव्रत ।

वच्मि संक्षेपतस्तुभ्यं तपोयोग्यानि विस्तरात् ॥ १४ ॥

वीरत्वावाप्तिदानुक्तमर्घपात्रमलं शुभम् ।

प्रागुक्तैकतमं मन्त्रैः संस्कृतं न प्रकाशयेत् ॥ १५ ॥

सर्वरत्नाक्षसूत्रं च तेजोवृद्धिविधायकम् ।

जाम्बूनदाक्षजं पाद्मं बलजं कलधौतजम् ॥ १६ ॥

खपदास्पदोभिजनकं वीरास्थिजमनाविलम् ।

धनभूयस्करं शुभ्रं स्फाटिकं कलधौतजम् ॥ १७ ॥

निहन्ति तदघौघानि वैद्रुमं शुभकर्मकृत् ।

राजवर्त्तमणिप्रोतं मणिभूतिविधायकम् ॥ १८ ॥

मारकतसमुत्पन्नं चतुष्कं वृद्धिदायकम् ।

शिववृन्दसमायोगकरमच्चकराक्षजम् ॥ १९ ॥

मलसिद्धिलोमेनोत्थं मदिरास्वादकर्मकृत् ।

सर्वेच्चालिप्सपर्यायिकारकं जीवकोद्भवम् ॥ २० ॥

Sampath_eBooks

इत्येतदक्षसूत्रन्तु स्मृतं द्वादशरूपकम्।

विद्याचक्रास्पदं गुप्तं कर्षणीयं विपश्चिता॥ २१॥

धौतवस्त्वादिभिः पूर्णैरालम्बं गन्धनिःस्वनैः।

कपालकृत्यं मेधावी हृदा पुष्पैः प्रपूजयेत्॥ २२॥

ततः प्रतिमणौ मूलं विन्यसेत् कोमलाकृतिम्।

चक्रं वा विन्यसित्वा तु कुब्जपन्नगरोचितम्॥ २३॥

वपुष्यायुधबीजन्तु हार्दे श्रीवत्ससंपुटे।

रथाङ्गपतिहस्ते तु प्राकृतं विनिवेदयेत्॥ २४॥

तेन कार्योजपो वत्स सर्वकर्मप्रसिद्धये।

भाष्यं स्वान्तमुपांशुञ्च त्रिस्वरूपं हि संस्थया॥ २५॥

अक्षराक्षरसन्तानं स्वश्रोत्रश्रुतिगोचरम्।

जयो गावः समाख्यातो तद्रुतो न विलम्बितः॥ २६॥

मनोऽनन्तरसंलीनं सर्वार्थपरिवर्जितम्।

स्मरते वर्णसनातनं यत्रासौ मानसो जपः॥ २७॥

प्रोक्तो भयार्थसंपृक्तः स उपांशुः स्मृतो बुधैः।

उषो मध्यंदिनं सायमन्तर्नक्ताह्नमेव च॥ २८॥

रेच्यं वीरैरखण्डन्तु साधनाराधनस्थितैः।

दिने दिने तदेका घोरैकं कुर्यात् प्रयत्नतः॥ २९॥

एकाधिष्ठितनिर्व्यूढिमह्नस्येच्चन्ति सूरयः।

सचक्रं पावकं होमे लक्षाद्ये च समाप्तिगम् ॥ ३० ॥
देवादेर्न्यस्त मन्त्रस्य सर्वगो गोचरस्तथा ।
गार्थ गोलसन्तानमन्यागौरपट्टक्रियम् ॥ ३१ ॥
महाफलसमास्वादसमभोगार्थयोषितः ।
रक्षामनुचरं दृष्टं दासगुप्तमधस्तु नः ॥ ३२ ॥
वीराणां नृपशार्दूल तन्त्रेऽस्मिन् भैरवार्चिते ।
शुभ्रशङ्खे प्रकर्तव्ये द्वयङ्गुले कर्णिके शुभे ॥ ३३ ॥
चरुके द्वयङ्गुले शस्ते तुर्याङ्गुष्ठः शिखामणिः ।
त्रिवृन्नरकचोत्पन्नस्त्रिपञ्चसरिकः समः ॥ ३४ ॥
कण्ठाज्जघनसंस्पर्शी शस्तः पञ्चवटोऽपि च ।
सुवृत्तमणिसङ्घातः स्यादेकावली समाः ॥ ३५ ॥
धार्या साधकचन्द्रेण शेषभूता तदिच्छगा ।
प्रागुक्ततरुदण्डस्थं द्वासप्तत्यङ्गुलं समम् ॥ ३६ ॥
समानं वा समुद्वाह्यं खण्डाङ्गं भैरवाणुभिः ।
ध्वजो त्रिशूलमुण्डो तं विविधं तत्प्रशंसितम् ॥ ३७ ॥
किञ्चित् किलकसंयुक्तमधोर्ध्वावद्धकं त्रिकम् ।
मालालम्भनशोभाढ्यं शताष्टाधिकसज्जटम् ॥ ३८ ॥
कल्पादिपिञ्छसत्पुञ्जप्रबद्धललनाकरम् ।
चित्रवर्णकसूत्रोरुरज्जुवेष्टनसंयुतम् ॥ ३९ ॥

खट्वापादगतं वाथ विघ्नघ्नं तत् प्रशंसिनम्।
सुपुण्यवान् महावीरः सधीरस्स स जगद्गुरुः॥ ४०॥
समचेष्टो महेशानि योगिनीनाञ्च सम्मतः।
य उद्वहति खट्वाङ्गं कपालञ्च महारवम्॥ ४१॥
न तत्पुण्यमघघ्नञ्च त्रिषु लोकेषु विद्यते।
मुद्रापञ्चकधारीणां यत् संमानमुदीर्यते॥ ४२॥
ते धन्यास्ते स्वसैन्यस्था वीरा मातृवल्लभाः।
यत्र वेलाव्रतेनापि दध्युः शङ्खं विभूषणम्॥ ४३॥
केशस्पूतागमापाण्डुकणदेहाम्बुजच्छदे।
कपालभोजनादीनि संपर्कात् सन्तरन्ति हि॥ ४४॥
उमाकल्पतनुत्राणे मर्माण्यंगानि त्रायति।
दुष्टकर्मेषु जालानि न स्पृशन्ति सितान्यपि ॥ ४५॥
भ्रमत्पतङ्गवद्यत्र साधकेऽस्थिव्रतांशुमान्।
कुतस्तत्र समासीत वसन्ते मासि बलीयस्यपि ॥ ४६॥
अस्थिभूषा शशिज्योत्स्ना भासिताङ्गत्रिविष्टपे।
कुतो विद्यान्धकारस्य वस्तुस्थितिनिदर्शनम् ॥ ४७॥
आगामिममलालातकृतभस्माग्निभस्मनाम्।
पलितं साधकानां हि उद्यद्धानुमतामिव॥ ४८॥
काश्मर्यः शाल्मला वाथ लघुदारुमयः समः।

दशाङ्गुलो मुखे धार्यो मुखरः सुमहारवः ॥ ४९ ॥

वाद्यानां डड्डीकादीनां लक्षणानि महीयसाम् ।

साधकेच्छावशस्थानि फलदानि भवन्ति हि ॥ ५० ॥

लम्बवल्कलसूत्रत्वक्संभवौ सुखदौ समौ ।

धार्यौ साधकचन्द्रेण योगपट्टोपपट्टकौ ॥ ५१ ॥

केयूरकटके धार्ये प्राक्प्रदर्शितरूपके ।

सर्वहिंसकदोषेषु प्रतिषेधकृतास्पदे ॥ ५२ ॥

इत्युक्तं मनसि कृत्वा सदागमनिदर्शनात् ।

साधकेनोपयोग्यन्तु धृतं शुभफलावहम् ॥ ५३ ॥

अवधार्य त्रिशूलं वा लक्षणोपचितं शुभम् ।

सर्वं हेत्यर्घमीशानजनहार्दमनिर्मितम् ॥ ५४ ॥

चतुरस्रे समे हस्ते क्षेत्रे रुद्रमितानि तु ।

कुर्यात् समां ततो मन्त्री पिटकानि समानि तु ॥ ५५ ॥

कृत्वा पञ्चाधसंस्थानि कार्यो हेतुर्विपश्चिता ।

ऊर्ध्वं षड्घटिकास्थाने लिखेच्छृङ्गत्रयं समम् ॥ ५६ ॥

जीवांशपार्श्वरेखां तु सार्द्धभागाङ्कसंस्थया ।

वामहस्तस्य मध्ये तु कुर्याद्दुल्लेखमूर्ध्वतः ॥ ५७ ॥

तदूर्ध्वे जीवमानेन समुल्लेख्या द्वितीयके ।

पार्श्वयोरुभयोरेवं शृङ्गमूलं विवर्त्य तु ॥ ५८ ॥

ऊर्ध्वं भागत्रयाद्वक्ष्य सूत्रभ्रान्त्या तु मेलकम् ।

रेखायां शृङ्गमूलस्य बहिरस्य समाचरेत् ॥ ५९ ॥

सार्द्धयुग्मांशसूत्रेण जीवाग्रादंतरस्थया ।

रेखया सह संयोगो कार्यस्तूभयपार्श्वयोः ॥ ६० ॥

शृङ्गद्वयं विवर्त्यैवं मध्यशृङ्गं समालिखेत् ।

मूले त्र्यंशसमं कार्यमग्रात् सूत्रद्वयेन तु ॥ ६१ ॥

तस्याधः कण्टकस्थूलः शृङ्गमूलसमाश्रितः ।

मूलाधोगा समा कार्या पट्टिका त्र्यंशरूपिणी ॥ ६२ ॥

तुर्येण सुसमाना स्याच्चतुष्कोणविभागगा ।

तदर्धे जीवभागे तु पार्श्वे लेलोपलेखना ॥ ६३ ॥

मध्यतः कण्ठमावर्त्य पट्टिकावद् घटो भवेत् ।

किं तत्त्वयोः समुल्लेख्यः कार्योऽस्य घटरूपकृत् ॥ ६४ ॥

ततोस्य द्विगुणो दण्डः कार्यः सामलसारकः ।

जीवभावसमः सो हि प्रशस्तस्तु सुवर्तुलः ॥ ६५ ॥

दण्डाध्यासमधो युग्मं तत्वा मध्यमसंस्थया ।

भ्रान्त्या विवर्तयेद् धीमान् वृत्तमालालसारकम् ॥ ६६ ॥

तस्याधः कीलकः कार्यो अङ्गलांशोऽङ्गुलोऽथवा ।

स सदार्द्धः प्रकर्तव्यः शूलारोपणहेतवे ॥ ६७ ॥

नवकोष्ठेऽथवा क्षेत्रे पूर्ववत् पार्श्वसानुनी ।

विवर्त्य वर्तयेच्छृङ्गं मध्यमध्युषिभागिकम् ॥ ६८ ॥

तन्मूलं जीवरेखातो भागमानेन चिह्नयेत् ।

चिह्नयेदग्रसंयोगात् पार्श्वे रेखे निपातयेत् ॥ ६९ ॥

शेषाद् विलोपयेद्रेखां मध्यशृङ्गे त्रिरेखिणम् ।

ततोऽधः पार्श्ववृत्तानु भागमानेन पट्टिका ॥ ७० ॥

वह्नेरुल्लेखनाग्रन्थिः कार्योऽध्वों जीवभागिकः ।

तथैव पट्टिकाधोऽपि प्रोक्तं दण्डे च लक्षणम् ॥ ७१ ॥

सपट्टिकस्वराशात् सकुम्भं शक्तिसपद्मतः ।

सिद्ध्यत्येकादशाङ्गाश्च क्षेत्राच्चूलं पुरोदितम् ॥ ७२ ॥

द्वितीयमपि यत् प्रोक्तं तल्लोकाष्टनवांशगम् ।

सपट्टिकं सग्रन्थिं वा ग्रन्थ्यधो वा सपट्टिकम् ॥ ७३ ॥

संसिद्धं त्रिविधं शूलं सर्वपावकयोथकम् ।

खदिराशोकमन्दारशिंशपावेणुशालजा ॥ ७४ ॥

सर्वलोहोद्भवा वाथ शूलदंष्ट्राः प्रशंसिताः ।

तीक्ष्णायससमं कार्यं त्रिशूले ग्रन्थिवेधगम् ॥ ७५ ॥

वेधदण्डसमारोप्य सुदृढो निश्चलात्मवान् ।

एतच्चूलं समोद्ग्राह्यं सितशृङ्गं समुज्वलम् ॥ ७६ ॥

वीरैश्वर्यसमाविष्टैः क्रूरसत्वनिबर्हणम् ।

नानेन रक्षितमनं घनोऽप्यामर्दकाश्रयः ॥७७ ॥

Sampath_eBooks

तज्जिघांसयितुं शक्तो मयाप्यादरचोदितः।

किमायुधधरो ह्येवमनुज्ञानास्त्रवान् गुणी ॥ ७८ ॥

ज्ञानभूषणभूषाढ्य साधयेद् गुणमालिकाम्।

अस्त्रानीकं सवपुषमिदं सर्वविघ्नघ्नमुग्रय -

सन्ध्यावत् सकलमणवः सन्निधानान्निदध्युः ।

तच्चानुध्यावचनसहितं सन्तु सेवाश्रितानां

यच्चामोघं भवति विषदं साधकानामवेद्यम् ॥७९॥

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे

चतुर्विंशतिसाहस्त्रे प्रथमषट्के श्रीकालसंकर्षण्यां

साधकोपयुज्यमानव्रतनिर्णयस्त्रयोविंशतिः पटलः ॥ २३ ॥

चतुर्विंशतिः पटलः।

श्रीभैरव उवाच ।

अथ क्रियाकलापस्तु क्रियाफलविधायकः।

वर्ण्यते सन्नियोगस्तु सन्देहविनिवृत्तये ॥ १

वज्रं खड्गं कपालं तु खट्वाङ्गमुरगाङ्कुशौ।

स्पन्दनाङ्गं त्रिशूलञ्च धनुर्नाराचमुद्गरः ॥ २ ॥

चर्मकृत्ति सरोजञ्च दंष्ट्रिणी सकचं शिरः।

गदा दण्डो ध्वजः शक्तिर्वरदाभयदर्पणाः ॥ ३ ॥

परशुः पट्टिशं वृष्टिश्चशको योनिशृङ्खला।

चामरं भद्रकुम्भश्च विकिरा मुसलं हरम् ॥ ४ ॥

निष्ठुरा मुखरी ज्वाला तथा शवकमण्डलम् ।

घण्टा महारवो लिङ्गं तथा च विकटानना ॥ ५ ॥

प्रेतकान्तावसानास्तु मुद्राः प्रोक्ताः प्रसिद्धये ।

चत्वारिंशोदिता शुभ्राश्चतुर्भिरधिकाः प्रिये ॥ ६ ॥

भाव्यरूपं महालक्ष्म्याः शाम्बरं प्रागपेक्षितम् ।

प्रोक्तनेपथ्यवृन्मन्त्री गन्धिगन्धाक्तपाणिकः ॥ ७ ॥

प्राग्लक्षणोक्तशिष्येभ्यः मुद्रावृन्दं प्रदर्शयेत् ।

तिर्यक् कृत्वा करं सव्यं प्रसारितमवाङ्मुखम् ॥ ८ ॥

सान्तरं स्वगुहाग्रे तु तस्योर्ध्वे सर्वदुर्मुखम् ।

स्थाप्यं यथोभयोः स्यातां संसक्तौ मणिकूर्परौ ॥ ९ ॥

करयोङ्गुष्ठरुद्धे तु कुचयित्वा कनिष्ठिके ।

शाखात्रयं प्रसार्यन्तु विरलं वज्रशृङ्गवत् ॥ १० ॥

कर्णिकारस्त्रगुद्धासि वज्रमेतत् सकण्टकम् ।

वज्रेश्वरी मनोहृद्यमामर्दकगणोदितम् ॥ ११ ॥

कनिष्ठा ज्येष्ठरुद्धा तु त्रयोऽङ्गुल्यो घनोच्छ्रिताः ।

विकासीन्दीवरश्यामं खड्गचापादिकाः स्मृताः ॥ १२ ॥

उत्तरोत्तानहस्तेन्दु ः कपालं भैरवी स्मृतम् ।

तन्मुष्टिबन्धनोत्तानं खट्वाङ्गं देशिनी स्मृतम् ॥ १३ ॥

Sampath_eBooks

अङ्गुष्ठदेशिनी योगा नागरुक्पाशदर्शनम् ।

अष्टौ कुटिलकोटयस्तु तया कुब्जेऽलकच्छविः ॥ १४ ॥

विकराङ्गुलितलभ्रान्त्या रथाङ्गमचिरोपमम् ।

स्वनासाच्चोग्रयाच्चूलं दर्शयेद्भास्वदुत्कटम् ॥ १५ ॥

मुष्टिबन्धं करं वाममुत्ताम्याकुञ्चिताङ्गुलिम् ।

सव्यं स्वांशगतं कृत्वा शब्दं कृतिमदभ्रमात् ॥ १६ ॥

चापमार्गणयोर्मुद्रां दर्शयेदेकतः स्थिताम् ।

शशाङ्करश्मिवद्धारिकार्मुकं हरिधर्मवत् ॥ १७ ॥

कबरीस्थौ करौ कृत्वा मध्यमे संप्रसारयेत् ।

ज्येष्ठौ पुटगतौ कृत्वा भुजसंपुटयोगतः ॥ १८ ॥

नीलमेघप्रतीकाशो मुद्गरः कीर्त्तितो दृढः ।

तलपृष्ठगतौ हस्तावङ्गुष्ठौ चोच्छ्रितौ तयोः ॥ १९ ॥

चुम्बिताग्रौ स्मृतौ ह्येष सन्ध्यारुणस्तु नन्दकः ।

सव्यमुष्टि लघुर्लम्बा कृत्तिः सौदामिनीप्रभा ॥२० ॥

विस्तीर्णकरशाखस्तु सिताब्जः पाणिसंपुटः ।

कनिष्ठिकोत्सृतं मुष्टिं वामं वामकरालकम् ॥ २१ ॥

कृत्पदातिविषाणान्तां दंष्ट्रामुद्रां प्रदर्शयेत् ।

प्रशस्तेयं महामुद्रा शासने ज्ञापनीया ॥ २२ ॥

अन्योन्यस्पन्दितानान्तु प्रागज्ञानस्वरूपिणाम् ।

वामहस्तस्य मुष्टिस्तु स्वप्रलम्बस्वभावगः ॥ २३ ॥

प्रत्यग्रक्षतजादिग्धं संस्मरेत् सकचं शिरः ।

वाममुष्टेः सृतांगुष्ठं सर्वमुष्टिप्रपीडितम् ॥ २४ ॥

तस्याप्युदग्रज्येष्ठेन गदा स्यादायसाङ्किता ।

मुष्टिबद्धोच्छ्रितो हस्तः प्रसारितकनिष्ठिकः ॥ २५ ॥

दण्डः सुपक्ववेण्या च सर्वदुष्टविघातकः ।

विकीर्णकरशाखेन पाणिना च परेण तु ॥ २६ ॥

शिरीषकुसुमाभासां वैजयन्तीं प्रदर्शयेत् ।

करयोर्ग्रथनं कृत्वा मध्यमे हृत्प्रचुम्बिते ॥ २७ ॥

प्रसार्य दण्डवद् बाहू शक्तिः स्यादञ्जनप्रभा ।

सितोऽबरसमुत्क्षिप्तः सम्मुखस्तु कराङ्गुलिः ॥ २८ ॥

भुजङ्गमफणाकारकरेणापाण्डुरोभयोः ।

घनाङ्गुलौ करे वामे सन्मुखे दक्षमुष्टिना ॥ २९ ॥

मणिबन्धं गृहीते तु स्वमुखं वीक्षयेद् बुधः ।

एषादर्श समाख्यातः शरन्मामण्डलद्युतिः ॥ ३० ॥

पपातानुकृते हस्ते ज्येष्ठे नक्रस्य तर्जनीम् ।

संसक्तशाखपरशुर्मध्यन्दिनरविप्रभः ॥३१ ॥

वेणीवद्धाङ्गुलीजालो मध्यमे तु प्रसारयेत् ।

हल्लग्ने पार्श्वविक्षिप्ते तदन्यां कारयेत् तयोः ॥ ३२ ॥

Sampath_eBooks

बाहुसंघट्टदण्डेन पट्टिशोऽप्यर्कवर्चसः ।

अधोमुखौ करौ कृत्वा शाखाग्राङ्गुष्ठचुम्बितौ ॥ ३३ ॥

भूयोऽङ्गुलिक्षेपाद् वृष्टिः पीयूषवर्चसा ।

यत्कार्यार्थोपयोग्यन्तु दृष्टापूतं च यद्धनम् ॥ ३४ ॥

सर्वकर्मसु तस्यैव वृष्टिरुक्ता प्रपूरणी ।

लघ्वनामान्तरेऽङ्गुष्ठं क्षिप्य तिर्यक् कृताङ्गुलिः ॥ ३५ ॥

स्वच्छमुक्ताफलाभस्तु चषको योगिनीप्रियः ।

तलपृष्ठसमायोगे त्र्यङ्गुलेऽस्य कृते सति ॥ ३६ ॥

तलान्तरुत्सृजेत् कार्यं हल्लग्नाग्रे कनिष्ठिके ।

ज्येष्ठा वाङ्मुखसंघट्टाद्योनिः स्यात् कुङ्कुमच्छविः ॥ ३७ ॥

अङ्गुष्ठतर्जनीयोगाद् ग्रथनाच्छृङ्खला मताः ।

सुप्रलम्बं करं सव्यं पुष्टिं सञ्चालयेन्मनात् ॥ ३८ ॥

नागारिके सरिसटारूपकं चामरं स्मरेत् ।

कृत्वा च सुशिरं मुष्टिं वामं दक्षदलान्तरे ॥ ३९ ॥

सर्वशाखानिरुद्धन्तु हेमं भद्रघटं तथा ।

तिर्यक् सव्याङ्गुलीक्षेपाद् विकिरेन्मणिमालिनीम् ॥ ४० ॥

ज्येष्ठोत्सृष्टां च मुष्टिञ्च सव्यं वामेन पीडयेत् ।

गवलालिमण्डलनिभं दृढं प्रत्यपरं स्मृतम् ॥ ४१ ॥

मध्योर्ध्वमुष्टिना गृह्य प्रसारितकनिष्ठिका ।

प्रदेशिनीं वाममुष्टिः शिर स्याच्चुकपक्षभाग् ॥ ४२ ॥

गुप्ताङ्गुष्ठे भवेन्मुष्ठिर्निष्ठुरा किङ्किणी ततः ।

मुक्तलाब्जं मुकुलवत् सा भवेत् करसंपुटम् ॥ ४३ ॥

हस्तद्वयप्रकम्पाच्च ज्वालाज्वालेव जाज्वला ।

शाखाग्रपत्रकं श्लिष्टं कृत्वोर्ध्वास्यं करोत्तरे ॥ ४४ ॥

प्रौढेन्दीवरसंकाशं करकं सासवं स्मरेत् ।

विकटा कुञ्चिता शाखा वामहस्तप्रचालनात् ॥ ४५ ॥

किङ्किणी जालरूपाभा भाव्या रवहिता हिता ।

सव्यहस्तस्य मुष्टिं तु चालयेत् स्थिरकूर्परम् ॥ ४६ ॥

डमरुको रोचनाभो मुखरो भैरवीप्रियः ।

हस्ताङ्गुष्ठेन वामेन दक्षिणस्य करस्य तु ॥ ४७ ॥

ग्राहयेद् ग्राहमङ्गुष्ठं मध्यपृष्ठेऽङ्गुली स्थपेत् ।

प्रवरप्रदर्शनादेशा लिङ्गालिङ्गस्वरूपिणी ॥ ४८ ॥

त्रैलोक्यं दर्शयेत् क्षिप्ता सृजते संहरत्यपि ।

महामुद्रेश्वरीं देवीमीशत्वे विनियोजयेत् ॥ ४९ ॥

सांनिध्य करणाच्चैतां देवतानां प्रदर्शयेत् ।

योगं प्रवर्द्धयत्येषां सर्वज्ञत्वं प्रयच्चति ॥ ५० ॥

विकृतं स्वासनं कृत्वा जिह्वां निष्कामयेद् बुधः ।

अतिशुष्कोदरं कृत्वा तनोश्च प्रविलम्बितौ ॥५१ ॥

उभौ मुकुलितौ हस्तौ कुर्यान्नग्नस्तु मन्त्रवित्।

विकटा नाम मुद्रैषा रक्ताकर्षविधौ स्थिता ॥ ५२ ॥

संहारिका प्रयोगानां नास्त्यस्याः सदृशी क्वचित्।

सर्वकामानवाप्नोति क्लृप्ता या साधकोपमा ॥ ५३ ॥

अर्धमुन्मीलिते नेत्रे वक्रं च विकृतं तथा।

बाहुग्रीवाश्लथत्वाच्च शवमुद्रा प्रकीर्तिता ॥ ५४ ॥

हन्त्येतया कालमृत्युः सिध्यते कर्मविस्तरः।

षण्मासाभ्यासयोगेन मृत्युञ्च जनयेद् बलम् ॥ ५५ ॥

दण्डकासनमारूढो ऋजुग्रीवशिरःस्थितः।

बाहुकूर्परयोर्न्यस्य जान्वास्थाप्य च कूर्परौ ॥५६ ॥

तर्जनीं प्रसृतीकृत्य मध्यमुष्टौ धने सकृत्।

द्वितीये चिबुके न्यस्या कुंचयित्वा विधानतः ॥ ५७ ॥

प्रदेशिनीं ततोऽङ्गुष्ठे योजयित्वा विकुञ्चयेत्।

शेषाः प्रसारिताङ्ङ्गुल्यः सोपानविधिना क्रमात् ॥ ५८ ॥

कृत्यशान्तं प्रसन्नञ्च मुखं कुर्यात् स्थिरेक्षणम्।

कान्तेयं कान्तवत्कान्ता बध्वा ज्ञानं प्रवर्द्धयेत् ॥ ५९ ॥

स्वेच्चया वरणं अस्याः अभ्यासक्रीडनीयके।

सौम्यो देव्या भवन्त्यस्या घोरा अपि प्रदर्शनात् ॥ ६० ॥

लाङ्गलं निष्ठुरां योनिं कुब्जं सङ्कर्षणीं ध्वजम्।

चामरं विकिरां विकटां गुहाशक्त्या प्रयोजयेत् ॥ ६१ ॥

वरदाभा यदा हृष्टिः पाणिपात्रकमण्डलुम् ।

कान्ता कुम्भोब्जमुकुलं लिङ्गं चास्या हृदः क्रिया ॥ ६२ ॥

कपालं दर्पणं पाशं मालारन्ध्रान्तिमस्य च ।

चर्म वर्मधनुर्दंष्ट्रां परशुं धनुषापि च ॥ ६३ ॥

शस्त्राण्यस्त्रानुवाद्यानि शेषान्यत्र स्मृतानि तु ।

लिङ्गं दंष्ट्रीगवं कान्तां विकटाकर्षणीक्रियाम् ॥ ६४ ॥

मुद्राषट्कमिदं देव्यै सन्निधानाय दर्शयेत् ।

शेषे स्वरूपदृष्टास्तु मन्त्रग्रामे क्रिया मताः ॥ ६५ ॥

मुकुलिः शस्यतेनूनं लोकेशादियवीयसाम् ।

अनुक्तास्वपि नियोगः कार्यः श्रुतिनिदर्शनात् ॥ ६६ ॥

उभाभ्यामेकवीराभ्यां यामलाभ्यां सुव्रत ।

त्रिकालकर्माणि सदा देव्युक्तां दर्शयेत् क्रियाम् ॥ ६७ ॥

मुद्राकर्माणि संप्राप्ते यन्त्रमुद्रा न चोदिता ।

मन्त्रमुख्यैः स्मृता दंष्ट्रा मुकुलश्च यवीयसि ॥ ६८ ॥

कुंभाय शस्यते वज्रं निस्त्रिंशं चेदनाय च ।

मुण्डसन्धौ विकृष्टैवं खट्वाङ्गं भैरवो ख भैरवा ॥ ६९ ॥

शंशनीयसत्वानां गजरोधावकर्षणे ।

कृत्तनाय रथाङ्गन्तु त्रिशिखाभेदनाय च ॥ ७० ॥

वेधनाय धनुःखण्डे मुद्गरः स्फोटनाय च।
नायकाराध्यातः सर्वेषां दुष्टकर्मणाम्॥ ७१॥
सुतीक्ष्णाबद्धया त्वद्य कृत्तिर्विषसनाय च।
लक्ष्म्यै कोकनदं सेव्यं दंष्ट्रिणी योगिनी प्रिये॥ ७२॥
शिरोभैरवभावाय गदारी भञ्जनाय च।
दण्डो दुष्टविमोहाय ध्वजः प्रोच्चाटनाय च॥ ७३॥
स्रुक्स्रुवास्त्रभिदुश्चर्म सर्वकामप्रसिद्धये ।
भृत्यः प्रपालनायाथ भयेभ्योऽप्यभयं मनः॥ ७४॥
भानुचन्द्रमसोश्चैव तेजसे दर्पणः क्षमः।
शृङ्गे तीक्ष्णकुठारस्तु पट्टिसत्रोटनाय पट्टिश च॥ ७५॥
निर्वाणयोगतप्तानां वृष्टिः पीयुषवर्षमुक् ।
तत्प्रशान्त्यै च वशको योनिरेतो मुमुचे नृपः॥ ७६॥
शृङ्खला सर्वसत्वानां बन्धनाय प्रयोजिता।
चामरं प्रभुभावाय घटं चापि निधिं दृशे॥ ७७॥
समस्तमणिलाभाय विकिराघातनाय च।
निग्रहाय च क्षुद्राणां सर्वेषां मुसलः क्षमः॥ ७८॥
पातालचालनायोच्चै लाङ्गूलं निष्ठुरक्रियम् ।
मनोमरुद्धयादीनां रोधनाय बलीयसी ॥७९॥
लक्ष्मीधनार्जनाभ्यान्तु मुत्कुलिर्बलशालिनी।

ज्वालनाय स्मृता ज्वाला शिखोनोवुन्य पीच्चया ॥ ८० ॥

सर्वामृतकराकृष्ट्या करकः पेशलो मतः ।

एडाद्यक्षाभिघातस्य विलुप्त्यै किङ्किणी हिता ॥ ८१ ॥

सर्वेषां दुष्टरूपाणां त्रासनाय महारवः ।

लिङ्गं शिवाप्तसिद्धीनां दात्रेभ्यस्तं बलोत्कट ॥ ८२ ॥

विकटाध्वानप्रत्यक्षाय प्रशंसिता ।

सर्वासां प्रेतसिद्धीनामनायासप्रसिद्धये ॥ ८३ ॥

प्रेतमुद्राः प्रशस्तास्तु सेविता मन्त्रयोगतः ।

निजकान्त्या तिरस्कृत्यै कान्तिमतां नृप ॥ ८४ ॥

कान्ताभ्याससमारम्भं कुरुष्वान्यं परित्यज ।

स्वस्वरूपस्फुटाटोपश्चोत्तमाङ्गकृतास्पदा ॥ ८५ ॥

खलिङ्ग धारिण्यो मुद्रा ध्येयास्तु मण्डले ।

स्वमन्त्रासनमारूढाः सकृदुच्चारविग्रहात् ॥ ८६ ॥

सर्वावाप्तिकराः सन्ति वीरैः संपूजिता विधौ ।

मोचयन्त्या उपासकान् ॥ ८७ ॥

यतोऽतोभिहिता मुद्रा व मुद्राः मोचनाद् रावणार्थतः ।

द्रावयन्ति घनां मूर्चां शिवत्वं मोचयन्ति च ॥ ८८ ॥

पशूनां पाशजालेभ्यो मुद्रा गीयन्ति सूरिभिः ।

इत्येवं दिव्यविद्यामनुविविधनिधीः सत्क्रियाश्चाप्ययोगी

Sampath_eBooks

योगी मन्त्रस्वरूपं व्रतसलिलनिधिस्तीर्णदुस्तीर्णपारः ।
वीराङ्गे रक्षितात्मा विभुचरणयुगं सेवमानः सुभक्त्या
के ते सन्त्यत्र भोगाः शिवमतविहिता ः नाप्नुयाद् यानुयत्नात् ॥ ८९ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां मुद्रापटश्चतुर्विंशतिः पटलः ॥ २४ ॥

पञ्चविंशतिः पटलः ।

श्रीभैरव उवाच ।

अथातो या महाविद्या सर्वपातकनाशनी ।
सर्वा घोरारवे घोरा सर्वातङ्कापहारिणी ॥ १ ॥
विश्वेश्वरमुखोद्गीर्णा विश्वेशैः संप्रपूजिता ।
विश्वसिद्धिप्रदातारी विश्वव्याप्तिविधायिनी ॥ २ ॥
सकृदुच्चारणात् पुंसामुपपातकनाशनी ।
महापातक संदोहात् सप्तोच्चाराश्चहन्ति या ॥ ३ ॥
पवित्रं सन्निधानञ्च सर्वकामप्रदं च यत् ।
नास्त्यन्यत्र जगत्यस्मिन् यत् सामान्यं प्रचक्षते ॥४ ॥
मृतसञ्जीवनी दीप्ता जीवहा दीर्घजीविनाम् ।
कालसङ्कर्षणी नाम या विद्या कीर्तिता मया ॥ ५ ॥
शेते तु प्रलये यस्मात् कालसंकर्षणी ततः ।

प्रागुक्तैकतमे स्थाने स्थितिं कृत्वा सुखावहम् ॥ ६ ॥

प्रच्छादिततनुर्मन्त्री वासोभिश्चेडिकादिकैः ।

लक्षं जप्त्वा युतं हुत्वा पुरन्ध्रीवेशलालसः ॥७ ॥

सर्वावयवभूषाढ्यःसदा विद्याव्रते स्थितः ।

जप्त्वोदर्कमुखां विद्यां नमोऽन्तां विंशदक्षराम् ॥ ८ ॥

सहस्रं प्राकृतानान्तु क्षमः स्यात् कर्मणां नृप ।

ध्यायमानोरुणां देवीमात्मानं साध्यमेव च ॥ ९ ॥

त्रिसन्ध्यं शतजापेन समाम्नातं त्रिरोधनम् ।

धराश्रयरमण्यस्तु मनोभवमदालसाः ॥ १० ॥

वशमायान्त्यनायासाज्जापिनां शब्दजप्तकान् ।

आकृष्य जातिसंयुक्ताः कृष्यन्ते विवशास्तथा ॥ ११ ॥

उच्चाटयति रोगांश्च उच्चाटयति मामपि ।

काकपक्षः कृतोष्णीशो गुटिकाकर्दमाञ्जितः ॥ १२ ॥

वज्राक्षमालया मन्त्री द्वेषयत्यप्पनन्यजम् ।

मनःशिलाद्रवाल्लब्धः पीताच्च मणिमालया ॥ १३ ॥

सुप्रसारितसंस्थानो जरां स्तम्भयते न कः ।

वश्याकर्षणविद्वेषप्रोच्चाटे च चतुर्थके ॥ १४ ॥

आसनं कर्मकृत् प्रोक्तं वीराणां क्रमशो नृप ।

पद्मं स्वस्तिकवीरञ्च करालं भावनावशात् ॥ १५ ॥

भूतवेश्मैकलिङ्गन्तु ह्यथ लोकाष्टकागृहम् ।

सुसुप्तं प्राप्य मेधावी नानासृक् सातविग्रहः ॥ १६ ॥

भेदप्लुतविचित्राङ्गं स्वाप्य लिङ्गान्तरा मृजः ।

शङ्खास्थिलशुनं नीलं करालं सकृता सह ॥ १७ ॥

तेन लिङ्गं समालभ्य विद्यां मलयमालिनीम् ।

लिख्य फट्कारमध्यस्थां तत ः ईडासरोपयः ॥ १८ ॥

सूत्रास्थिमयं विपुलं दहेद् धूपञ्च तन्मलम् ।

क्रूराधिपो महामन्त्री भैरवासनसंस्थितः ॥ १९ ॥

विकटक्रियाविधानैश्चिदङ्गारानलाग्निभिः ।

ताडयेद् द्विः फडन्तान्तं प्राक्प्रोच्चारणविद्यया ॥२० ॥

शतेन हृदये शूलं सहस्राच्चोणितस्रवम् ।

भवते तस्य हे राजन् युताद्वर्त्तिमामपि ॥ २१ ॥

एष घोरः प्रयोगस्तु तन्त्रेऽस्मिन् पन्निलात्मज ।

गोपनीयस्तु शिष्याणां दुष्टदृष्टदुरात्मनाम् ॥ २२ ॥

वोऽनेन व्यवसितं पायान्मन्मूलं देवतागणः ।

स्रोतांसि यानि मन्त्राणां घोराघोरतरात्मनाम् ॥ २३ ॥

महारक्षाविधानाद्यैर्न च रक्षंन्ति तान्यपि ।

ह्रींकारः कर्षणे शस्तो मकारो मुद्रणेऽपि च ॥ २४ ॥

हाकारो हन्ति दुःखानि चंकारो कर्षयेदसृक् ।

डकारो डाकिनीस्वार्थेनिग्रहाय च दुर्मतः ॥ २५ ॥

योकारो वेगकर्तृत्वे सर्वेषां भूभृतामपि ।

गृह्णापयति रक्षां हि सर्वागमविधायिनाम् ॥ २६ ॥

गकारो मामपीशानि किमन्यैर्देवतागणैः ।

नरोरगसुरेभ्यस्तु मन्त्रेभ्यः परमात्मनाम् ॥ २७ ॥

शकारस्त्वाकरश्शंभोरिकारो दहते जगत् ।

जडनं रोदनं स्तंभं बन्धनं विषनिग्रहम् ॥ २८ ॥

तकारः कुरुते जप्तः पाशरूपो महाबलः ।

निर्वापयति तप्तानि वह्निसूर्यातपादिभिः ॥ २९ ॥

धकारोऽधोमुखो ध्यातो जप्तः सप्तानि लीलया ।

स्तंभनं घट्टनं धैर्यं श्रोत्रादीन्द्रियनिग्रहम् ॥ ३० ॥

प्राणरोधो गिरां हानिं वैकल्यं जंभनं तथा ।

थकारः कुरुते जप्तो ध्यानश्चापि क्रियावताम् ॥ ३१ ॥

फडेकस्त्रासकृत् प्रोक्तो जनन्या कुलतां परः ।

निग्रहः सर्वभूतानां मकरश्च तृतीयकः ॥ ३२ ॥

वज्राञ्जनशिलादीनां चतुर्थः स्फोटकृत् स्मृतः ।

सर्वारिष्टोर्जिताध्वंसि जपात् सर्वान्तिमो भवेत् ॥ ३३ ॥

जपस्तु शतिकोर्णस्य स कर्मारम्भकृन्मतः ।

भूतकर्मकरस्तन्त्रे जपः साहस्रिको मतः ॥ ३४ ॥

हुं सस्फुटप्रयोगेन अघोराक्षरपञ्चकम् ।

मेदोसृग्रक्तमज्जास्थिशुक्रसंग्रहकृन्मतम् ॥ ३५ ॥

ज्योतिर्व्याप्तशुनासीरपुटगं कुण्डलाक्षरम् ।

पुष्टिकृत् क्षीणवपुषां प्रजप्तं तप्तभूतिरुक् ॥ ३६ ॥

सर्वेषामेव दुष्टानां कोदण्डं दण्डनाय तु ।

प्रलापसंपुटोच्चारात् शंसितं सर्ववेदिनाम् ॥ ३७ ॥

आवामापुटितं शान्तं कुरुते वर्तुलाक्षरम् ।

लाघवं गरलोच्चादे ध्वंसने कुष्ठश्लेष्मणा ॥ ३८ ॥

वृतान्तमूष्मयामुक्तमात्मानं कर्मणि क्षयम् ।

आमिषं कररुद्धञ्च दत्तं वा वाग्विभूतिदम् ॥ ३९ ॥

जात्यङ्गकल्पनायुक्तं विमलासनसंस्थितम् ।

पदवीप्सापदेनैव भवमूलनमोऽन्तिना ॥ ४० ॥

कदम्बवनमध्ये तु ध्यानं लक्ष्मीस्वरूपिणम् ।

मुक्ताहारविलासाढ्यं किन्तु कुन्देन्दुवर्चसम् ॥ ४१ ॥

वाचामधीशं कुरुते नियुतात् समुपासितम् ।

प्राकृताः संस्कृता वाथ नानादेशस्वराश्रयाः ॥ ४२ ॥

कास्ताः वाचो जगत्यत्र या न सन्त्यस्य सेवनात् ।

जयद्रथ उवाच ।

कीदृक् पुरे महेशान यद्युते चाग्निभूतिदा ॥ ४३ ॥

एतत्प्रसादतो ब्रूहि संदेहविनिवृत्तये ।

स्फुरद्वदनचन्द्रांशुभाभिर्भासितविग्रहम् ॥ ४४ ॥

प्रोवाच ससितक्लेशं शङ्करः सूनृतं वचः ।

पुनः प्रकाशकं देव्याः समसोत्त्यन्तविस्तरम् ॥ ४५ ॥

पतङ्गमानं देहानां मालाःकृत्वा समन्ततः ।

स्थानैकान्ते स्वराण्डोऽपि चत्वारा धार्य कोष्ठकान् ॥ ४६ ॥

तद्वाह्ये सर्वतो मार्ज्य कोष्ठमालां चतुर्गुणाम् ।

ततो न जीवतुर्येऽपि द्विकोष्ठं धार्यकन्दरम् ॥ ४७ ॥

तदधस्ताच्च तुर्यं वै मध्यरेखात्रयं प्रिये ।

प्राक्प्रमाणस्ततोऽधस्तात् कार्यः कण्ठो विपश्चिता ॥ ४८ ॥

द्वाराणि च सुवेश्मानि प्रयत्नेन विवर्त्य तु ।

द्वारकण्ठान्तरा रेखा भद्रकण्ठबहिर्गता ॥ ४९ ॥

विलोप्य द्वारवाह्येऽपि चतस्रो मार्ज्य मोक्षगाः ।

गर्भकोष्ठ चतुष्कं यत्तत्र कार्याम्बुजाकृतिः ॥ ५० ॥

पूर्वाभिहितमार्गेण चतुःषोढादलादिना ।

त्रिहस्तां तु समारभ्य यावत् सप्तगुणं प्रिये ॥ ५१ ॥

चतुर्वर्णं चतुर्द्वारं श्रीवितानमिदं पुरम् ।

सनन्दि यन्मया प्रोक्तं तस्याप्येषा मतिर्मता ॥ ५२ ॥

मण्डलस्य स चक्रस्य षडङ्गेनाम्बुजं भवेत् ।

Sampath_eBooks

द्वारकण्ठः स्मृतोऽशोभो भद्रकण्ठो द्वितीयकः ॥ ५३ ॥

पद्मवीथ्याधभागस्तु भागेनैकेन पङ्कजम् ।

परतोऽप्येवमेवं हि वीथ्याद्यं भागलक्षणम् ॥ ५४ ॥

सर्व मन्त्राश्रयं ह्येतत् सुख्यातं वाग्वतीप्रियम् ।

दर्शनादस्य जायन्ते ज्ञानानन्यजनाः श्रियः ॥ ५५ ॥

मूर्खकृपणविद्विष्टजन्तुभ्यः पन्निलात्मज ।

भक्ता वागीश्वरी वेति सर्वविद्याप्रदायिनी ॥ ५६ ॥

लक्ष्मीकल्पविधानेन साधकानां क्रियावताम् ।

हृषीका भूषहारन्तु घकारपुटितो चली ॥ ५७ ॥

त्रिकर्णाधिष्ठितो वर्ण कुरुते ब्रह्मणोऽपि हि ।

कल्पासनमहायानस्थितैर्जप्तः समुष्टिना ॥५८ ॥

स्वर्णेन पुटितं कृत्वा पावनोर्णस्तदुन्नतिम् ।

श्रीहर्म्यकाननारामगोपुराट्टालकादिषु ॥ ५९ ॥

योगिनीमेलककरौ दरपूर्णपुटेष्वतः ।

रोदनान्तर्गतं जप्तमक्षरन्तु सबिन्दुकम् ॥ ६० ॥

रक्तमाकर्षयेदन्वक् सर्वसत्वाङ्गसंस्त्रमम् ।

ह संपुटे महाहानिं महाविजयसम्भवाम् ॥ ६१ ॥

कुर्यादुदीर्णशत्रूणां प्रजप्तः साधकेश्वरैः ।

मथते विलयन्त्राणि तेजांसि च तपस्विनाम् ॥ ६२ ॥

आससंपुटितः शब्दस्तेजसां परमो निधिः।

भुजङ्गभूतरक्षांसि सर्वलोकवराङ्गनाः ॥ ६३॥

विद्याद्याकर्षयेद् वर्णो हर ईकारसंपुटः।

गुटिकाद्य शेषा याः सिद्धीरयुताद्यं प्रसाधयेत्॥ ६४॥

महापदन्तु पत्राङ्गमहितात्ममहीयसीम्।

कुर्याच्चण्डपदं चापि चण्डवीर्यं प्रसाधयेत्॥ ६५॥

योगेश्वरेश्वरत्वञ्च कुर्या कुर्याद् योगीन्द्रश्रीपदम्।

संभूतिस्थितिहर्तृकृत् त्र्यक्षरं जगतः पदम् ॥ ६६॥

मुहूर्तोन्मुद्रणं भूतग्रहरक्षोनिवारणम्।

डाव्याद्यनन्तक्षुद्राणां भुजङ्गानां विनाशनम्॥ ६७॥

पातकाद्यन्तदुष्टानामुपपातकिनामपि।

महापातकदुष्टानां प्राणिनामन्तिमं पदम्॥ ६८॥

कालं विशोध्य चिराच्चतसाहस्रिकायुता।

लक्षात्र कुरुते भोगं वीराणां तालमानगम् ॥ ६९॥

द्वाभ्यां भानुमतःसोमस्त्रिभिस्तज्जस्य तुर्यभिः।

पञ्चभिस्तु गुरुः षड्भिरेकाक्षो गुरुसत्तमः॥ ७०॥

शीर्षस्य सप्तभिर्लक्षैर्ध्रुवस्यापि तथाष्टभिः।

एवं जपप्रवृद्ध्या तु साधयेदुत्तरोत्तरम् ॥ ७१॥

विहारं साधकेन्द्राणां पदे पदमनादिमम्।

Sampath_eBooks

पुङ्गध्वनिपरावानां वपुषो निर्गतास्त्रियः ॥ ७२ ॥

शूलेश्वरीतनुस्थानसन्निधाना महाबलाः ।

लक्षोत्थादित्रिकान्तास्तु तच्चरुं सप्तजन्मजम् ॥ ७३ ॥

वीमभ्यः संप्रयच्चन्ति सर्वज्ञत्वप्रसाधकम् ।

षड्जन्मानं पशुं दीप्तं कृतशक्तिपदास्पदम् ॥ ७४ ॥

प्रकाशयत्यनायासा तथा योगीश्वरीपदम् ।

या सा चण्डा महाघोरा चण्डकर्मकृतास्पदा ॥ ७५ ॥

सा पशुं पञ्चजन्मानं मातृसायुज्यकारकम् ।

चण्डलक्षप्रजापिभ्यः संप्रयच्चत्यनादरात् ॥ ७६ ॥

महीयसि पदे या सा चकारोन् महिमां पराम् ।

सा महा पदजापीनां महत्वं साधयेद् वरम् ॥ ७७ ॥

पदचक्रोदितायास्तु सिद्धयश्च प्रपञ्चगाः ।

यवीयस्योध्व सामन्याः समग्रया गूढविक्रमाः ॥ ७८ ॥

ताः सर्वामीक्षतां यान्ति लक्ष्याद्योमार्णजापिनाम् ।

लक्ष एवं पराकाष्ठा विद्याङ्गाक्षरजापिनाम् ॥ ७९ ॥

समस्ते व्यस्तमार्गेऽपि सिद्धिसंयोगकृन्मतः ।

इति शुभवतितन्त्रे कालसंकर्षणीये विविधविधिविधानं कोऽत्र शक्तोऽतिवक्तुम् ॥ ८० ॥

तव मनसि विलासो यादृशस्तादृशत्वं जुष नरवर सिद्धिं नृत्यशूलेश्वरीं

Sampath_eBooks

च ।

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां पञ्चविंशतिः पटलः ॥ २५ ॥

षष्टविंशतिः पटलः ।

जयद्रथ उवाच ।

देव शूलेश्वरीचक्रं कीदृक् तद् युज्यते कथम् ।

एतत् प्रसादतो ब्रूहि दृगुन्मूलितदर्पक ॥ १ ॥

जुषन्त्यग्रश्रियः केन शासनेज्ञप्रतिष्ठिते ।

चन्द्रचूडामणिद्युप्तजटाबन्धस्य ते हर ॥ २ ॥

केन कल्मषनिर्मोचविमोचाभिनवाङ्गिनः ।

प्रसादं मणिमूर्धानस्ते रेजुरुरगा इव ॥ ३ ॥

विकासं केन गच्चन्ति तद् बलादित्यवोधितः ।

विध्वंसिततमोनिद्राशरदीवाम्बुजाकराः ॥ ४ ॥

केन मन्त्रद्रुमो दामफलतृप्तिमुपागताः ।

त्वत्प्रसादात् तु संप्राप्त विजृम्भितगुणात्मकाः ॥ ५ ॥

केषां नानेकसंसार संभूतः कर्मकर्दमः ।

त्वत्प्रसादाम्बुवाहिन्या क्षालितस्तनुसंगतः ॥ ६ ॥

नाभिर्भवति तज्ज्ञानां तमोरुद्धं नवांशुभिः ।

पृक्तं भानो निवेशेन केषां सर्वार्थदर्शनम् ॥ ७ ॥

Sampath_eBooks

त्वत्पादाश्रितसंतृप्ता न ययुः कोऽत्र निर्वृतिम्।

तत्वे प्रविशत ः प्राणा महाज्ञानपरा इव ॥ ८ ॥

इति सर्वहितासक्ताश्चन्द्रमौलेऽम्बिकायते ।

मया संपृच्चितं ब्रूहि कस्त्वं स्तोतुं समुत्सहे ॥ ९ ॥

श्रीभैरव उवाच।

वत्स । गोपितुमारब्धा देवी शूलेश्वरी मया।

सा तवांशाङ्कुशाकृष्टस्नेहेनाद्य प्रकाशते ॥ १० ॥

कृत्वा तु शाङ्करे क्षेत्रे गृहद्वादशकं समम्।

पदद्विसप्तकं लोप्यं कर्णतुर्येऽपि सुव्रत ॥ ११ ॥

चतुष्कोष्ठं प्रकर्तव्यं समं द्वारचतुष्टयम्।

कण्ठकोष्ठसमुच्चेरधो मोक्षो द्विसदर स्मृतः ॥ १२ ॥

प्राकाराभ्यन्तरे माला मेकरो हां विलोप्य तु।

शेषे षट्कोष्ठके क्षेत्रे शूलं प्राक् क्रमवर्तितम्॥ १३ ॥

पूरयेद्वर्णकैशुभ्रैः प्रागुक्तेऽपि सितादिभिः।

कीलकः कृष्णवर्णस्तु काञ्ची वाम सदा भवेत्॥ १४ ॥

शिरीषस्त्रङ्गिभो दण्डः पट्टिके विद्रुमच्चवि।

कुम्भो हेमोपमः षष्ठः शृङ्गान्यन्ते सितानि तु ॥१५॥

धाराः सिताः प्रकर्तव्याः कण्ठकोलिसमप्रभाः।

नानादानवरक्ताम्बुप्रशासिततित्रिशोऽथवा ॥ १६ ॥

Sampath_eBooks

योो यस्मिन् राजते वर्णस्तस्मिन् शूलेऽस्य सः शुभः ।

प्रागग्रं वर्तयेच्चूलमथवोत्तरकण्टकम् ॥ १७ ॥

प्राकारशृङ्गमध्यस्थः क्षेत्र रुद्राङ्गुलं समम् ।

वन्ध्याब्जं मध्यशृङ्गाग्रवृत्तास्पदविभागगम् ॥ १८ ॥

अष्टपत्रं सनाभिं तु दशषट्केसराकुलम् ।

पूर्ववत् पूरयेत् तद्धि तत्र देवीं प्रपूजयेत् ॥ १९ ॥

करालस्य चक्रेणादंष्ट्रिणाग्रत्रिचक्षुषा ।

राज्ञीनामञ्जनाभासि वर्णेन च स्फुरत् त्विषाम् ॥ २० ॥

कृत्तिकालमहाशूलखट्वाङ्गोद्यतपाणिनिम् ।

सर्वभूषणभूषाढ्यां भस्मपाण्डुवपुष्मतीम् ॥ २१ ॥

अनन्तासनमारूढामधस्तात् त्र्यक्षैरस्त्रिभिः ।

विचलादुष्मवसनैर्जातिकल्पितगात्रकैः ॥ २२ ॥

पूर्वोद्दिष्टक्रमात् तुभ्यं तस्य आराधनादिकम् ।

तेजो वृषोत्थरक्षःसु मरुत्प्रागादिदिक्षु च ॥ २३ ॥

हृदाद्यस्त्रावसानानि विन्यस्याङ्गानि मन्त्रवित् ।

पवित्रवटिकाशुद्धो देहः प्रयतमानसः ॥ २४ ॥

भवभावोद्भवापूतद्रव्यजातिं प्रयोजयेत् ।

तव द्रव्यद्वयं व्याप्तं सितचन्दनपूर्वकम् ॥ २५ ॥

देव्यै देयं महावीरैः सुगन्धं गन्धधूपकम् ।

त्र्यंशानुवटिका कार्या भवोद्भवसनातनैः ॥ २६ ॥

एकाङ्गा रस्यते नारमथवैकं सनातनम् ।

पवित्रे पावनः सेकः स्यादयं सुनिवेशितः ॥ २७ ॥

क्ष्मानृगोमायुमांसानि त्रिशूले वल्लभानि तु ।

तानि दद्यात् प्रयत्नेन न तद्रक्तानि विशेषतः ॥ २८ ॥

एवं दीपोविचारस्तु महाद्वयप्रदर्शितैः ।

पूजितां सर्वलाभस्तु कुर्यान्शूलेश्वरीं नृप ॥ २९ ॥

स्वसमानाप्तदृष्टानि तद्युक्त्या संप्रसाधयेत् ।

सर्वाणि सिद्धरूपाणि शूलस्यालीलया गिरिः ॥ ३० ॥

अथ शृङ्गत्रये त्रीणि कृत्य चामीकराणि तु ।

तत्र देवीत्रयन्यासं कुर्याद्वर्ण द्वयेन तु ॥ ३१

मूलयागाङ्गयुक्तेन पृथग्वर्णविभागिना ।

मध्याब्जेन यथा पूज्या देवी शूलेश्वरी परा ॥ ३२ ॥

पश्येद् घोषावतीं द्वेन सा विज्ञेया परापरा ।

शूलेशी प्राप्तनेपथ्या किन्तु प्रौढार्कवर्चसा ॥ ३३ ॥

अजीवधर्ममध्येन ज्योतिर्द्वयपरां पुमान् ।

अपरार्थप्रतिष्ठानां ज्योतिर्ज्वालावभासिनीम् ॥ ३४ ॥

चक्राणां त्रिस्वरूपाणां शान्तघोरातिघोरिणाम् ।

योनयः कीर्तिता ह्येताः ---र्णिकरूपगाः ॥ ३५ ॥

आभिः संपूजिताभिस्तु सिद्धाभिस्त्रिस्वरूपकम् ।

विश्वसंयोगिनीजालं शान्तघोरविमिश्रकम् ॥ ३६ ॥

वशमायात्यसन्देहात् सेत्स्यन्ते सर्वसिद्धयः ।

न तदस्ति जगत्यत्र मध्यमोत्तमकन्यसम् ॥ ३७ ॥

यन्न सिद्ध्यति भूपाल गूढयोगनिषेविणी ।

ते यास्यन्ति परां काष्ठां भुक्त्वा संभोगसन्ततिम् ॥ ३८ ॥

ये त्रिशूलमुखाया तदग्घदुष्कृतदारवः ।

परमाद्वयभावनसत्क्रियया भज शूलनिवासिशिवां हृदये ॥ ३९ ॥

न च वाञ्चितवस्तुकृते लघुता लघुकर्षगुणे परिहारमुखम् ।

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षिण्या शूलेश्वरीकल्पे षड्विंशतिः

पटलः ॥ २६ ॥

सप्तविंशतिः पटलः ।

श्रीभैरव उवाच ।

वीराणां क्रीडनार्थाय वक्ष्ये सामान्यकर्मिणाम् ।

विद्यासंसाधिकाः सम्यक् पारंपर्यक्रमागताः ॥ १ ॥

ओङ्कारं सनमस्कारं ततश्चोद्गमनेश्वरी ।

चतुर्थ्यन्तं पदं लिख्य ततः शुच्यशुचीपरे ॥ २ ॥

कापालिनिलिस्वाहान्तं विद्यैका विंशदक्षरा ः ।

जप्तायुतं भवेत् सिद्धिस्ततः ततः कर्मणि योजयेत् ॥ ३ ॥

गन्धमूषकहृत्पूर्णं शवमाल्यं सुशोभितम् ।

चूर्णीकृत्य सहस्रन्तु तज्जप्त्वा मखसन्निधौ ॥ ४ ॥

शिरस्याचूर्णनात् कुर्यात् त्रिभौमा वशगास्तु यः ।

प्रणवाद्यं विलिख्यादौ हुण्डनमुण्डने तथा ॥ ५ ॥

अमुकस्य मुखं स्वाहा वन्धास्याद्यन्नियोजयेत् ।

पूर्व क्रम प्रसिध्यं मेतन्मुखासने ॥ ६ ॥

भास्वद्द्रुमलतापत्रपुटसंश्लिष्टमग्रजम् ।

कलकण्ठककण्ठकैः संभ्य सप्ताभिमन्त्रितम् ॥ ७ ॥

वाल्मीकं सुशिरे क्षिप्त्वा अष्टशतोपलम् ।

वामापादेन चाक्रम्य समाप्यास्यं निबध्यते ॥ ८ ॥

।ओं उं नमो भगवतीति महाशंखिन्यथापरम् ।

भिक्षामावाहयान्तं च भूयः शंखिनि वै पदम् ॥ ९ ॥

नमोऽस्तु दानसंयुक्तमनसा सप्तमं तृणे ।

पात्रेषु संस्कृता भिक्षा भ्रमिष्णोः पतति ध्रुवम् ॥ १० ॥

सुवर्णमञ्जरीकेति द्वन्द्वयोगेन विद्यया ।

अभिमन्त्रित कपालं विद्याम्भोभिः प्रपूर्यते ॥ ११ ॥

चण्डालि विजयेशेषं वीरे विजयदानयुक् ।

प्राग्विद्यासाधनात् सिद्धां विद्यां कर्मणि योजयेत् ॥ १२ ॥

Sampath_eBooks

कृत्वा मण्डलकं वृत्तं प्रातः प्रातस्तु विद्यया ।

शताष्टोत्तरजप्तानि जातीपुष्पाणि निक्षिपेत् ॥ १३ ॥

मासाद्रूपवतीं कन्यामवाप्नोत्यविचारतः ।

श्मशानाद्यं भवाद्यञ्च पिशाचिपदमालिखेत् ॥ १४ ॥

विद्वेषयद्विरभ्यस्तं हुं फडन्तं महामतिः ।

अनया मालया नुन्नां साध्यरूपविनिर्मिताम् ॥ १५ ॥

शतजप्तेऽन्तराले वै बध्वा क्षेत्रे निधापयेत् ।

करालगन्धने वाथ बद्धा द्वेषयते रिपुम् ॥ १६ ॥

तत्वं सटे मठे लिख्य नटे सर्वं ततः परम् ।

बन्धं करोमि सिंहानां व्याघ्राणां पदमालिखेत् ॥ १७ ॥

चौराणां शाकिनीनाञ्च ं च हुं फट् स्वाहावसानकम् ।

सदा प्रस्थानकाले तु मन्त्रितं लोष्ठकाष्ठकम् ॥ १८ ॥

प्रक्षिपेद् दिक्षु सर्वासु मन्त्रितं विद्ययानया ।

बद्धदग्घिंसकानान्तु पथि या गुणी ॥ १९ ॥

शुद्धं कुलं द्विरभ्यास कुलजेन्यं पिशाचिनि ।

द्वन्द्वयुक्तानुमानेन स्वमन्त्राह्लादनं परम् ॥ २०

नित्यं हि शतजापेन कर्णे कर्णपिशाचिका ।

नानाराष्ट्रान्तरोद्भूतां वार्तां ब्रूते गुणात्मिकाम् ॥ २१ ॥

शिवं लम्बोदरं चैव वामनं कद्दृ कद्दृ च ।

Sampath_eBooks

कथय हुं फट्स्वाहान्त मन्त्रो कः ॥ २२ ॥

जपात् पिशाचोऽप्यथ च कथयेद्विश्वजल्पितम् ।

चलेति च द्विरभ्यस्तं द्विरभ्यस्तं च चालय ॥ २३ ॥

हुंकारं ग्रसयुग्मञ्च हेद्रावय फडन्तगम् ।

द्विरभ्यासं गिलिद्विश्च भञ्जत्रूट पदं द्विधा ॥ २४ ॥

मोटयद्वि स्फोटयद्वि आविश रक्ष च द्विधा ।

हेमहास महाविच्चे रक्ष मां च समायुतम् ॥ २५ ॥

परसैन्यान् परा ह्येषा विद्याद्वन्द्वसमायुता ।

महामायेति विख्याता सिद्धकर्मसु योजयेत् ॥ २६ ॥

सिध्यते चाप्ययं राजमनुष्यगजवाजितः ।

सिद्धकाष्ठानि संगृह्य कृष्णाष्टम्यां विचक्षणः ॥ २७ ॥

प्रज्वाल्य चिद्धुताशं च होमयेत् शवकच्चदान् ।

अष्टोत्तरशतं यावत् तेन निर्वाणभस्मना ॥ २८ ॥

अनुवातविरक्तेन युद्धारम्भविलासिनी ।

मत्तेभ बलसर्वाद्यासेनाध्यक्षं पलायते ॥ २९ ॥

संमूढाश्च भटास्तस्यां महामायाविमोहिताः ।

संरुद्धचेतसः सर्वे जिघांसन्ति परस्परम् ॥ ३० ॥

निजैरेव सुभृत्त्यैस्तु स्वामिनां क्रियते क्षयः ।

स्वामिभिश्च सुभृत्यानां शिरांसि सुसितांसिभिः ॥ ३१ ॥

विलूयन्ते प्रकोपाढ्यैराहवामर्षितैर्भृशम् ।

अथवा भस्मना तेन साध्यपुत्तलिकाकृतौ ॥ ३२ ॥

विद्याजप्तस्वरूपं वा यदङ्गं चिद्यते नृप ।

तदङ्गरहितः साध्यो भवेदिति सुनिश्चितम् ॥ ३३ ॥

कुणपं वेणुलोहं वा विद्ययाष्ठाभिमन्त्रितम् ।

मा स्फोटयेत् तेन संक्षुब्धो ------मस्तके भृशम् ॥ ३४ ॥

यावत् स न तथा याति तावत् साध्यो विपद्यते ।

नैनं रक्षयते शम्भुरीश्वरो न सदस्पतिः ॥ ३५ ॥

उन्मत्तपत्ररसयुग्भस्म नस्तिलकेन तु ।

स्वललाटं समीक्षन्ते न मोहान्विता जनाः ॥ ३६ ॥

विवेकशून्यतां यान्ति यदि पीयूषपाणिनः ।

पानसंयुक्तं वश्यकृत् त्रिदशेष्वपि ॥ ३७ ॥

निशायां सुविमिश्रन्तु भवेच्चूर्णनादिकम् ।

त्रिरक्तमिश्रिणां शुष्कभस्मना गोलका ॥ ३८ ॥

लिखिता कर्षयेज्जन्तुमाकर्षणविधानतः ।

तिलकाञ्जनचूर्णानां लेपनानां तु स्पर्शिनाम् ॥ ३९ ॥

साधर्म्यं धनसंयुक्तं तदर्थं संप्रसाधयेत् ।

येन येन प्रकारेण महामाया प्रयोज्यते ॥ ४० ॥

साधयेत् तेन तेनैव सर्वकर्माणि लीलया ।

Sampath_eBooks

चितिभस्मभयेच्चसमोपेतभस्मना तेन ताडितः ॥ ४१ ॥

जन्तुरस्त्रसुगुप्तोऽपि व सुगुप्तिपि महाभूतेन गृह्यते ।

गोक्षीरपूरितं कुम्भं विद्ययाशनमन्त्रितम् ॥ ४२ ॥

तेन संस्नापितं सत्वं स्वस्थो भवति तत्क्षणात् ।

गृंजनं भस्मविद् भस्म खररक्तेन पेशयेत् ॥ ४३ ॥

तेन प्रेतपटे लिख्य शत्रुसैन्यविदर्भिताम् ।

विद्याक्षरैस्ततोद् वर्तिं कृत्यं लेख्य प्रदीपयेत् ॥ ४४ ॥

तिलतैलं कपाले तु सुप्रदीप्तं चिदग्निना ।

यथा यथा विनश्येत सावर्त्तिर्वर्त्तिर्दीपिता ॥ ४५ ॥

तथा तथा प्रजायन्ते शत्रवो विशरारवः ।

अस्मिन् सम्यक् कृते रात्रौ प्रयोगे विधिसंयुते ॥ ४६ ॥

अहमेव विनश्यामि का कथा हीतरैर्जनैः ।

अथवा मातृभिः साध्यं मध्ये चैव विदर्भितम् ॥ ४७ ॥

गोकुत्थं कुङ्कुमं क्षोदलिखितं भूर्जनिर्व्रणे ।

मधुरत्रयसंयुक्तं ततः साध्यं वशे नयेत् ॥ ४८ ॥

वशकृत् प्रोक्ता विद्या कल्याणकारिका ।

जन्तूनां भाग्यहीनानां प्राधान्येन नराधिप ॥ ४९ ॥

वश्याकर्षणविद्वेषमारणोच्चाटनादिना ।

फलयोगेन सिद्ध्यन्ते विद्ययानया ॥ ५० ॥

कृतानि साधकेन्द्राणां मर्त्यभोगाभिलाषिणाम् ।

महामायामन्त्रविधिः ----------- ॥

ध्रुवाद्यं -------------ष्टै युक्तं सतारकम् ॥ ५१ ॥

साध्यनामतदन्ते तु द्रावयोपपदान्वितम् ।

फडन्तमेतत् संलिख्य भूर्जे संवेष्टितं ततः ॥ ५२ ॥

साधयत्याशु द्रो द्वारकृतो हृदि ।

उत्क्षिप्य शुल्वसूच्या तु विद्धचोपस्थे कृतिं ततः ॥ ५३ ॥

निर्धूमखदिराङ्गारेस्त्रिसन्ध्यं तापयेद् बुधः ।

सप्ताहात् कृष्टिमायात्यनुलोम्यपि न संशयः ॥ ५४ ॥

विमलाद्यससुतारं स्मरणं कन्यपदान्वितम् ।

यच्चर्याभ्याससंयुक्तशक्तिशक्तिमता युतम् ॥ ५५ ॥

फडन्तमिति मन्त्रज्ञः प्रयोगं विपुलेऽम्भसि ।

स्तनमात्रप्रविष्टस्तु जपेदयुतसंख्यया ॥ ५६ ॥

यावन्तीं वल्लभां कन्याम् नीचोऽप्युत्तमवर्णजाम् ।

अप्रमोदं भवादिञ्च कारणाक्रान्तमस्तकम् ॥ ५७ ॥

सारसं द्रव्यसंज्ञञ्च याचयान्ते द्विधा पुनः ।

सौम्यघोरीफडन्तश्च प्रयोगोऽयं यथा पुरा ॥ ५८ ॥

सेवितः साधयेद् वत्स सर्वं चित्तसमीहितम् ।

अघोरीपुटितो जप्तो धृतराष्ट्रो नदीशयुक् ॥५९॥

Sampath_eBooks

सर्व कामार्थसंसिद्धिं कुरुतेऽयुतजापिनाम्।

शिव स्मरकरा लीना मोहय सम्मोहय ॥ ६० ॥

मुहुः करालस्मरणं प्रयोगमिदमद्भुतम्।

क्षेत्रेऽथ कर्परे लिख्य पटे क्षेत्रं निधापयेत्॥ ६१ ॥

मोहयेज्जन्तुचक्रं तु क्षिप्रमेव हि मण्डलम्।

विमलं नमस्कृतं चैव प्रेषकाय सदान्वितम्॥ ६२ ॥

घोषकाय तथा चान्यं प्रेषिताय लघुः परः।

कुरु स्वाहा समायुक्तविद्यया सर्षपान् जपेत्॥ ६३ ॥

तां क्षिप्तां लङ्घयेद्यस्तु स वश्यो भवतेऽचिरात्।

चामुण्डिनीति प्रथमं चिच्चण्डालिनि चापरम्॥ ६४ ॥

चिच्चण्दालि पदं लिख्य अमुकं दह दहेति च।

पचयुग्मं पुनर्लिख्य ममशब्दसमन्वितम्॥ ६५ ॥

वशमानय स्वाहान्तं वेद्येयं विमलादिका।

अनजाम्भोधिजा हुत्य एकविंशतिसंख्यया॥ ६६ ॥

जुहुयाद् यस्य नाम्ना तु त्रिसन्ध्यं पूजिताम्बिकः।

स भवेद् दासवद् वश्य आत्मद्रविणदायकः॥ ६७ ॥

नमो भगवते लिख्य रुद्रायाभययुग्मकम्।

हस युग्मं मर्दयुगं च भगजिह्वामुखं ततः॥ ६८ ॥

बिन्दुरूपं तु तत्कृत्वा भगजिह्वामुखं पुनः।

हुं फड्युग्मसमायुक्ता स्वाहान्ता मृतचूलिका ॥ ६९ ॥

विद्येयं कथिता राजन् सर्वकर्मप्रसाधिका ।

सन्नक्षत्रतिथिवारसंयमोपोषवर्जिता ॥ ७० ॥

माक्षीकवान्ते घटितां सुरूपां शालिभञ्जिका ।

स्वासृग्जो सृक्सकाश्मीरद्रवेणालिख्य पूर्ववत् ॥ ७१ ॥

प्रयोगं भूर्जपत्रे तु तद्भूर्जं हृन्निवेशयेत् ।

तस्यास्तां किङ्करास्तस्य कण्टकैर्ग्रथितांगिनीम् ॥ ७२ ॥

शताष्टोत्तरजप्तैस्तु विविक्तैस्तर्हाप्य पूजयेत् ।

त्रिसन्ध्यं सौमनैः पुष्पैरब्दान्ते अब्दसप्तकम् ॥ ७३ ॥

आकर्षयेत् प्रयोगोऽयं सप्ताहाद् देवतादिकाम् ।

सर्वाङ्गसुन्दरी दुर्गा मानुषीणां तु का कथा ॥ ७४ ॥

जपेद् वा सततं यस्तु तस्य वश्यं जगत्त्रयम् ।

या स्थिता कामरूपिण्यो ता रमन्ति न संशयः ॥ ७५ ॥

कर्षयेत् सप्तरात्रेण नामयुक्तन्तु यज्जपेत् ।

स्त्रीपुंनपुंसकं वाथ दिव्यादेशेन संशयः ॥ ७६ ॥

तत्त्वं भगवति पदं चामुण्डे च परं ततः ।

योगाञ्जनवशीयुक्तं करणेति पदं ततः ॥ ७७ ॥

स्त्रीवशीकरणे चान्यं तथा पुरुषसंयुतम् ।

वशीकरणे च परं सर्वशब्दं ततः पुनः ॥ ७८ ॥

Sampath_eBooks

वशीकरणे च स्वाहा विद्येयं चित्तभेदतः ।

योजिता साधयेत् सर्वं यदसाध्यमपि क्षितौ ॥ ७९ ॥

भवं शङ्करशब्दं च हिरिकेश्यथ पिङ्गले ।

आदित्यदयिते हुं च फडन्तेयं महाबला ॥ ८० ॥

आदित्यदयिता नाम विद्या सर्वज्ञभाषिता ।

आदित्याभिमुखो भूत्वा पटेनार्द्रेण प्रावृतः ॥ ८१ ॥

यामुद्दिश्य जपेत् कन्यां प्राक्प्रयोगेन साधकः ।

लभेत् तामविचारेण यावदसौ शुष्यते पटः ॥ ८२ ॥

तारादिकमिदं लिख्यमिचिकेति पदं पदम् ।

स्वाहान्ताष्टाक्षरा विद्या भूरिकर्मप्रसाधिका ॥ ८३ ॥

नानाश्चर्यकरी तुभ्यं वीरकर्मप्रकाशिका ।

वामे करतले लिख्य पद्ममष्टदलं बुधः ॥ ८४ ॥

स्वनासोऽसृक्सु गोकुत्थकाश्मीरकरसेन च ।

मञ्जुपिच्चेन तन्नाभौ नाम गर्भं भवे लिखेत् ॥ ८५ ॥

ततः प्राग्दलतः स्थाप्य विद्यां ह्येतां भवादिकाम् ।

वामोरावप्यसंभिन्नमेतल्लेख्यं विलिख्य तु ॥ ८६ ॥

ततस्तल्लेख्य यत्नेन घण्टा वाग्दुष्टपाणिना ।

जपेदयुतसंख्यानं यन्नाम्नापल्लवार्तिना ॥८७ ॥

तामाकर्षयते शीघ्रं त्रिभौमं जन्तुमण्डलम् ।

सहस्रान्तरकामिन्यो पक्षिण्यश्चायुतान्विताः ॥ ८८ ॥

अयुते वशमायान्ति योषितो ह्यमृतान्त्रगाम्।

सर्वकल्पोपचारैस्तु वशीकरणकर्मणि ॥ ८९ ॥

योजितेयं महाविद्या वशीकुर्याज्जगत्त्रयम् ।

कामिनीति पदं पूर्वं रञ्जनीति ततः परम्॥ ९० ॥

उक्तयोगयुता देवी कामिनीयं नवाक्षरा।

सर्वकामप्रदा प्रोक्ता तन्त्रेऽस्मिन् रावणार्चिते ॥ ९१ ॥

योषित्सुरतकाले तु वामपाणिशतेन तु।

अभिमन्त्र्य स्पृशेद् योनिं विद्यामन्त्रं समुच्चरेत्॥ ९२ ॥

ततः प्रेखांक्षरस्तस्मिन् रणे षट्के विमज्जते।

स्फुरद्विलोचना नारी मन्मथोद्दामदीपिता ॥ ९३ ॥

नि चलनैः कान्तं चात्यावद् गूहयेद् दृढम्।

अजहच्चापलातावद् यावत् तेन न कामिता ॥ ९४ ॥

तावन्नरमतेऽन्यत्र न प्रयाति च निर्वृतिम्।

गात्र शिरः स्पृष्टं वक्त्रं हृत्पाणिना प्रिये ॥ ९५ ॥

रक्षन्ति सर्वरूपिण्यः संस्पृष्टा विद्ययानया।

एकैकमुत्सृजेत् तद्धि वशीभवति निश्चितम्॥ ९६ ॥

शालिपिष्टमयीं कृत्वा पुत्रिकां यत्स्वरूपगाम् ।

सहस्रजपितां तान्तु शर्कराज्यविनिश्रितान् ॥ ९७ ॥

Sampath_eBooks

ग्रामे ग्रामे सनामास्तु भक्षयेद् विद्ययानया ।

स वश्यो भवते शीघ्रं जीविनाममुदेऽपि च ॥ ९८ ॥

ध्वजोपस्थेऽभिमन्त्रित्वाच्चतेनैकेन साधकः ।

सा वश्या भविता नारी यया सह भजेद्रतिम् ॥ ९९ ॥

अथोभयरतं द्रव्यं देव्यग्रे शतमन्त्रितम् ।

तिलकं कुरुते यस्तु सवश्यं कुरुते जगत् ॥ १०० ॥

एषा सा कामिनी नाम विद्याकामगुणालया ।

स्वाधिष्ठानसमारूढा जात्यङ्गपरिकल्पिता ॥ १०१ ॥

पूजिता कूरुते भोगान्ननन्यजगुणाधिकाम् ।

कामिनी विधिना यष्टा सर्वविद्यारणात्मनाम् ॥ १०२ ॥

कुर्वत्यभीप्सितानर्थान् मातृभेदक्रमेण तु ।

विद्यावृन्दं वेत्ति सर्वार्थसिद्धिं वाक्यस्पाणोः सेवनस्यानुषङ्गात् ॥ १०३ ॥

ज्ञात्वा देवीं तां च वज्रेश्वरेशीं मात्रान् भोगान् को नु भुङ्क्तेऽध्वदृष्टान् ।

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां विद्योद्धारः सप्तविंशतिः पटलः ॥ २७ ॥

अष्टविंशतिःपटलः

श्रीभैरव उवाच ॥

अथ यासौ सुतृप्तेन्दुच्चायाप्यम्बुजकल्पना ।

श्लथकेशा सिताम्भोजविलोचनसहस्रधृक् ॥ १ ॥

स्वदेहांशुहृतच्चाया ----------धुतेजसा ।

पुष्परागमहारत्नभूषाभूषितविग्रहा ॥ २ ॥

सर्वाङ्कुशधरा देवी दिग्दोर्दण्डकणाङ्किता ।

पिशङ्गा वरनेपथ्या -------------पीतमा ॥ ३ ॥

सञ्जातालिमहामालाप्रचुम्बितकपोलिनम् ।

दंष्ट्राग्रोद्भिन्नशालाग्रप्रोत कर्मकशालिनम् ॥ ४ ॥

चतुर्दन्तं सदा मत्तं गजमारुहते सदा ।

नाम्ना वज्रेश्वरी देवी सौम्यरूपा महाबला ॥ ५ ॥

गोपिता सर्वतन्त्रेषु मया चोशनसादिषु ।

साध्यशेषगुणाभोगदलितेश्वरवेणिका ॥ ६ ॥

क्रूरेन्दुसंयुताध्यासा शृण्वथ समासतः ।

अनन्त पुण्यविद्याञ्च भैरवैश्वर्यमेव च ॥ ७ ॥

विपर्ययांश्च पुण्यादीन् कल्प्याधश्चादनं ततः ।

षट्कण्ठकर्णिकमलमूर्ध्वच्चादनं -- ॥ ८ ॥

विन्यस्य गोमयं कुर्यात् पङ्कजं प्राङ् निदर्शनात् ।

भास्वन्मण्डलमारूढं चतुर्वक्त्रं सनातनम् ॥ ९ ॥

दत्वामृतकरस्थायि् बीजके तु प्रकल्पयेत् ।

वितताम जटाभारं लोकालिहनलालसम् ॥ १० ॥

Sampath_eBooks

यत् तेजस्तत्समारूढं कल्पयेत् मामुमाधरम्।
सर्वमेतन्महीपाल भवेदानन्तपूर्वकम्॥ ११॥
कल्पमालामयी ध्येया तनुर्दिव्यामलाकृतिः ।
वक्रं भवमयं कृत्वा विद्याङ्गैरालभेत् ततः॥ १२॥
सारमेकाक्षरं कृत्वा दद्यात् कुर्यात् क्षरेत् ततः।
मूर्ध्वज्वालानले देया वपुष्मां स्त्रक्षैरथ॥ १३॥
कौक्षेयकं पुरोद्दिष्टं पञ्चाक्षरमिति स्थितम्।
मालादेहविनिर्यातमेतद् विद्याङ्गपञ्चकम्॥ १४॥
वपुस्थं साधकेन्द्राणामरिवीर्यहरं परम्।
योगीश्वर्यन्तु वर्णैश्च कल्प्यचक्षूंषि मन्त्रवित्॥ १५॥
आवाहयेत् महादेवीं विश्वरूपां मनोन्मनाम्।
जडतामधृत्य जिघ्रन् प्रमोद -- न्वितान्॥ १६॥
शक्त्यन्तोच्चारयोगेन शक्तिसंवित्तिविद् गिरः।
द्विरुरीयषडादित्यसङ्क्रन्दननभस्वती॥ १७॥
संख्यास्वरविभेदेन----------प्रकल्पयेत्।
सारमूर्ध्वशिखांगस्थं दृक्रिकं चारिसूदनम्॥ १८॥
आधेयाधारसंस्थानि विद्याशिरमयानि तु।
अङ्गानि वेदितव्यानि नेत्रज्योतिर्निदर्शनात्॥ १९॥
आवाहनादिकं कर्म पूर्ववित् कृत्य मन्त्रवित्।

Sampath_eBooks

हृत्तेजसि ददेत् पूर्वं चन्द्राङ्कितकपर्दिने ॥ २० ॥

मायाविनिःसृतां पूज्य पिङ्गलञ्च नभस्विनि ।

दिग्दलेषु न पूज्यानि दृग्दिशिस्थं प्रपूजयेत् ॥ २१ ॥

एवं षडङ्गसंयुक्तां कान्तां शुभकरीं लभेत् ।

सन्निधीकृत्य देवेशीमुपचारैः पुरोदितैः ॥ २२ ॥

उपास्य तर्पयेद् वह्नौ होमद्रव्यैः प्रकाशितैः ।

जपं कृत्वा निवेदित्वा होमकर्म विधीयते ॥ २३ ॥

अनयोर्व्युत्क्रमात् क्रम्य याति निष्फलतां ध्रुवम् ।

नित्यं तेजसि यष्ट्वा तु होमकर्म फलावहम् ॥ २४ ॥

काम्येत रत्नफलके विज्ञाने जातिवर्जनात् ।

शक्ति कार्येथ कुण्डे च स्थण्डिले मण्डलेप्यलौ ॥ २५ ॥

अन्या तु संस्कृतान्येषां न्यासात् स्यात् संकरो न हि ।

यागोपचयके सर्वं जातरूपमयं शुभम् ॥ २६ ॥

अर्घपात्रादिकं कार्यं वज्रेशीपदकांक्षिभिः ।

वज्रेशीरूपिणा नित्यं सेव्या देवी सुमेधसा ॥ २७ ॥

एतदेव व्रतं साधु साध्वर्थप्रतिपादकम् ।

साधूनां साधुवृत्तीनां सर्वाध्वार्थविमिश्रितम् ॥ २८ ॥

फुल्लारविन्दशोभाढ्यं व फुलाढ्य रससानुसमाश्रितः ।

तत्र स्थानविशुद्धिं तु कृत्वा सीराद्युपस्करैः ॥२९॥

मन्दिरैर्मठिकाद्यैस्तु पातयेत् क्रूरघातकी ।

कृष्णसूत्रधराङ्गारमर्दनाङ्कितम ॥ ३० ॥

रोपयेत् खादिरं शङ्कु दशदिक्ष्वस्त्रमन्त्रितम् ।

विपुलाम्बलिमाहृत्य लोकपालाम्बिकात्मिकाम् ॥ ३१ ॥

परितः स् गृहीतस्य क्षेत्र --- सत्तमः ।

तत्र कृत्य शुभागारं पूर्ववल्लक्ष्यलक्षितम् ॥ ३२ ॥

देवव्रतं क्रतुं कृत्वा टङ्कयोगे कृते सति ।

लङ्कालक्षजपोत्तीर्णो दशांशाग्निकृतक्रमः ॥ ३३ ॥

यागं कृत्य महादेव्यास्सर्वसंभारसंभृतम् ।

जपः सलक्षनिर्णीतो हुत्वाब्जानि दशांशतः ॥ ३४ ॥

अर्घकर्मक्रियाकल्पो जायते साधकेश्वरः ।

तुर्ययुग्मात् समानञ्च कर्मणोः पेशलो भवेत् ॥ ३५ ॥

यत्राखण्डलकोदण्डनिर्गमो धाम्निभावतः ।

तत्र वज्रेश्वरीजप्तः क्रूरघ्नं विकिरेद् बुधः ॥ ३६ ॥

सन्ध्यायामर्धरात्रे च वर्तिकां तैलबोधिताम् ।

केकरास्त्रायुतां जप्त्वा प्रक्षिपेदन्तदिग् बलिम् ॥ ३७ ॥

यावत् प्रविशते वर्णी जपेत् तावन्महेश्वरम् ।

सहस्रं जपते यावत् तावद् धूमोद्गमो भवेत् ॥ ३८ ॥

द्वाभ्यां ज्वालाकुलं स्थानं भवते गर्जति त्रिभिः ।

जपेदेवं चतुर्थेऽस्य यावत् तावन्महाफणी ॥ ३९ ॥

प्रस्फुरन्मूर्द्धमाणिक्याभीषुभासितविग्रहः ।

शङ्खकुन्दावदातस्तु निर्यात्य क्रूरलोचनः ॥ ४० ॥

वीक्षते दिग्रणं त्रस्तो मन्त्रमायापकर्षितः ।

दृष्ट्वा साधकचन्द्रं तु संकोचितमुखाम्बुजः ॥ ४१ ॥

अन्धरो वा जहन् शोभां यथा स कमलाकरः ।

पिण्डीकृतफणाजालसाधकाङ्घ्रियुगाग्रतः ॥४२ ॥

तरसाक्षिप्तकायस्तु स पपात ममार च ।

ततस्तं वीरमातङ्गः सहायानुचरान्वितः ॥ ४३ ॥

भक्षयेन्निर्विशङ्कस्तु स्मरन् वज्रेशीरूपकम् ।

तेन भक्षितमात्रेण वज्रेशीरूपधृङ् मुनिः ॥ ४४ ॥

-------शक्तिपर्यन्तं जगत्यत्राविशृङ्खलः ।

ससहायाशुजापश्च साभिप्रेतो ध्रुवाश्रयः ॥ ४५ ॥

अथवास्योत्तमाङ्गस्थमणिक्षिप्तमुखान्त ।

यतोच्चरेन्मन्त्री रम्यभागे मनोरमे ॥४६ ॥

समुच्चयेद् गतोस्थिनिं धनलिप्साविडम्बितः ।

यः कश्चित् स लभेद् भूप महापद्मनिधिं निधिम् ॥ ४७ ॥

व्यपतेन्न व्ययं तेन क्षयं याति व्योमस्थित्यंतसंख्यया ।

अथ भूतनिशामध्ये गत्वा भूतालयं गिरिः ॥ ४८ ॥

वज्रार्गलं लिखेत् तत्र मण्डलं सप्तहस्तकम्।

निशातालपराकेन शिलाकिंशुकजेन वा॥ ४९॥

षट्कण्टककरस्थायिपंकजेन व षट्कं कण्टककरस् विभूषितम्।

तत्र वज्रेश्वरीं पूज्य षड्गात्रकविमालिताम् ॥ ५०॥

तावद्धानाम्बुसंपृक्तैरासवैस्तर्पगन्धिभिः।

भृष्टपक्वसुहृद्यानि फल्गुषांतानि सर्वतः॥ ५१॥

चन्द्रपात्रे कृतामीषन्मृदुनि सुरभीणि च।

निवेद्य विधिवन्मन्त्री पावकानि वह्नि च॥ ५२॥

पूर्वोक्तैश्चैव नैवेद्यैश्चाद्य मण्डलनायकम्।

अर्घं पुनः पुनर्दत्वा वज्राङ्कुशकृतःश्रिया॥ ५३॥

वह्निस्थां तर्पयेद् देवीमनङ्गास्त्रामिषैनवैः।

तिलैः सिद्धार्थकैर्वाथ वसाज्याक्तैस्तु भूरिशः॥ ५४॥

राजीवं शक्तिदण्डञ्च कृपाणं वरुणायुधम्।

पताकां लकुटिं शूलं प्राक्कृत्वाग्रादि विन्यसेत्॥ ५५॥

हस्तानि शतधाराणि पुष्टानि समयानि तु।

अस्त्राण्येतानि दीप्तानि कंजे दलगतानि तु॥ ५६॥

हृदा संपूज्य विधिवत् ततः कर्म समाचरेत्।

गोप्यकौशेयगेशानः पीतनेपथ्यधृङ् मुनिः॥ ५७॥

अनन्तदृढवन्धांतमासनं कल्प्य संहतम्।

आत्मानमात्मरूपन्तु कल्पयेद् ध्यानविद्यया ॥ ५८ ॥

पद्मना ष्तं दन्तिनास्कन्दविग्रहे ।

ततस्तु सकलीकरणं कृत्य मन्त्रं परापरम् ॥ ५९ ॥

भोगेङ्गसहितं न्यस्य परि दत्वा सटानलम् ।

ध्यानेन च जपेद् बीजं मनोर्चिषा ॥ ६० ॥

यावत् सहस्रमेकन्तु तावत् काष्ठा ज्वलन्ति हि ।

प्रोल्लसन्तीन्द्रचापानि स्फुरते विद्युतां लताः ॥ ६१ ॥

पिप्पलालपिनां माला ः गर्जन्ति च समन्ततः ।

आसां दिशोऽन्धकारेण स्वस्वरूपा विभाविताः ॥६२ ॥

अयुतेनाचलद् वज्रं दिग्बन्धेन गजोऽकरोत् ।

मत्ताम्बुधरनिर्घोषगम्भीरं कण्ठगर्जितम् ॥ ६३ ॥

रमन्ति सुचिरं विद्धा ः यावत् ते परमां गतिम् ।

तस्मिन् कालेऽब्जशृङ्गाग्रस्थितमस्त्रकदम्बकम् ॥ ६४ ॥

क्षरत्प्रज्वालनाभासि बभूव तडिदंशुवत् ।

तद्गृहीतकरा वीरा भवन्ति व्योमचारिणः ॥ ६५ ॥

स्वच्चन्दाः सर्वगा नित्या महामोदविजृम्भिताः ।

न शक्तिः सुचिरं सिद्धा यावदन्ते परा गतिः ॥ ६६ ॥

सदा च वीरमार्तण्डो वज्राब्जगजचक्रिणः ।

स्पन्दनेन जगत्कृत्स्नमभ्रमद्दीप्तमण्डलम् ॥ ६७ ॥

अनस्तमितसूर्यस्तु स्वभासास्तमहत्तमाः ।

अनायद् रागहीनश्च अनायत् स धनोज्वलः ॥ ६८ ॥

वपुषा वज्रधारिण्या लीलायतजगद्गिरः ।

प्रयाति परमां काष्ठां स्वेच्छया लब्धभोजनः ॥ ६९ ॥

महोदयादेर्देवीनां देवीनां साधनाराधनैर्नृपः ।

उक्तेयं तत्क्रमाद् देवि तदुक्तार्थं प्रसाधयेत् ॥ ७० ॥

जयद्रथ उवाच ।

देव्या वज्राब्जधामानि श्रोतुमिच्छामि शङ्कर ।

साधकानां हितार्थाय संदेहविनिवृत्तये ॥ ७१ ॥

श्रीभैरव उवाच ।

षट्त्रिंशदङ्गुलं सूत्रमस्य कल्पोक्ते महीतले ।

दशाष्टाङ्गुलकं तत्र कुर्याद् वृत्तद्वयं ॥ ७२ ॥

कदलीकृत्य तत्र रेखां प्रपातयेत् ।

जीवसङ्गमतोधोर्ध्वमष्टभागैर्विभाजयेत् ॥ ७३ ॥

मूलबिन्दोश्चतुर्भागे समं वृत्तं तु भावयेत् ।

न तत् पद्मं वृत्तान्तं संप्रकल्पयेत् ॥ ७४ ॥

ततोऽम्बु जीवसाने तु भागेनैकेन मन्त्रवित् ।

भ्रामयेन्नाभिवृत्तन्तु मध्यं तद्वृत्तयोर्द्वयोः ॥ ७५ ॥

नाभ्यूर्ध्वं जीवपार्श्वे तु तयोर्मध्येन लाञ्छयेत् ।

नाभ्यङ्गनिर्णसूत्रे तु तयोर्मध्ये प्रपातयेत् ॥ ७६ ॥

तन्मध्योल्लेख्य यत्नेन ततोऽग्रान्मूलजीवनम् ।

कृत्वा सूत्रं व सूत्र लिखेच्छृङ्गे शृङ्गे लिखितोल्लेखमानगे ॥ ७७ ॥

शृङ्गबाह्ये तु या रेखा संसक्ता नाभिमण्डले ।

नाभोर्ध्वे तु तयोश्चिह्ने नाभिमाने कृते सति ॥ ७८ ॥

चिह्नजीव्यग्रमध्येनोल्लेखः कार्यश्चतुष्पथे ।

शृङ्गाणां बाह्यमूले तु षट्कण्टकविधायिकः ॥ ७९ ॥

ततस्तु वर्तयेच्छृङ्गे मध्यमे पार्श्वयोर्द्वयोः ।

नाभ्यूर्ध्वबिम्वभागस्थं भागं भागन्तु पार्श्वयोः ॥ ८० ॥

ऊर्ध्वमास्फालयेत् सूत्रे ह्यधो ह्येवं प्रयत्नतः ।

नीत्वा नित्या स्वस्वरूपोपमानगा ॥ ८१ ॥

एवं निर्णीतकुलिशः प्रोक्तमब्जं विसर्जयेत् ॥ ८२ ॥

प्रोक्तस्थानेऽष्टपत्रं तु केसरालं सकर्णिकम् ।

संस्मृता माया विसर्गोमल चोदितैः ॥ ८३ ॥

जातरूपस्वरूपन्तु कृत्वा पङ्कजमुज्ज्वलम् ।

कीराभां कारयेन्नाभिशृङ्गधाराः सितान्शुगे ॥ ८४ ॥

धुरिध्वांधमशेषं तु प्रपञ्चवलयोपमाः ।

दाडिमीकुसुमाभांसि शृङ्गमध्यानि कारयेत् ॥ ८५ ॥

घृतप्रवाहिनी सिद्धा भाति योज्य संततिम् ।

पततो ज्ञानिभिः --स तत्रैव गुणावहः ॥ ८६ ॥

विधायत्वात् तु वज्रेश्या ः आसनस्य श्रियं पराम् ।

अथवाम्बुजनिर्मुक्त ह्यवते दधुतिका -- ॥ ८७ ॥

धून्यानिधून ख वर्त्तितं देशिकेच्चया ।

दक्ष्योदक्कण्ठकं वर्त्य वज्राधिष्ठानमादरात् ॥ ८८ ॥

तत् परिवज्रवर्णन्तु व ।

वज्रवर्तनभागवत् ॥ ८९ ॥

ततस्तस्मिन् यजेद् देवीं निर्णीतक्रमयोगतः ।

यष्टे त्रिकन्तु विन्यासः-------- ॥ ९० ॥

काल शालिनीयं व्रजेश्वरी वज्रविधानतुष्टा ॥ ९१ ॥

चकारवीरावरवज्रकायां निसर्गतत्त्वाच्युत ॥ ९२ ॥

इति श्रीभैरवस्रोतसि विद्यापीठे शिरश्चेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसंकर्षण्यां विधिः अष्टाविंशतिः पटलः ॥ २८ ॥

उनतृंशः ः पटलः

श्रीदेव्युवाच ।

निसर्गार्थो महादेव कीदृगर्थं ------ ।

-----------निर्भ्रान्तं वक्तुमर्हसि ॥ १ ॥

श्रीभैरव उवाच ।

विलयोत्पत्तिहीनं यत्स्वस्वभावाच्युताक्षरम् ।

------------------------- ॥ २ ॥

चानुभवाद्यैश्च वहिःस्थमिव भासते ।

तस्याधिकारतो व्योमरूपयोऽन्तप्रतिष्ठितः ॥ ३ ॥

अव्युच्छिन्नप्रवाहा ।

तानन्तस्वरूपैश्च वहिःस्थितम् ॥ ४ ॥

चित्स्वभावमयं दुर्गं सदोदितमखण्डितम् ।

स्वप्रतिष्ठमसंगूढं---------- तत्व ॥ ५ ॥

चित्रगुणदर्शकम् ।

बाह्यस्थं तद्धि मार्गस्थं नैसर्गमितरं मतम् ॥ ६ ॥

श्रीदेव्युवाच ।

महाविनो ।

दग्धजनानां तद्योग्य व ख तयोग्य पद्मदिवाकरः ॥ ७ ॥

नीलग्रीवो मनो जन्मादेवं विध्वंसकेश्वरः ।

भूयोऽपि ॥ ८ ॥

सर्वजन्तूनां किमन्तः स्पन्दते मतम् ।

किं ज्ञेयं सर्वविद्यानां कर्तव्यानाञ्च का क्रिया ॥ ९ ॥

अपेक्ष---------------------- ।

त्वत् प्रसादतो ब्रूहि सन्देहविनिवृत्तये ॥ १० ॥

श्रीभैरव उवाच

कालसङ्कर्षणी देवी सकला ।

करविभागगा - ॥ ११ ॥

स्थूलाकारकृताधारा सूक्ष्मदेहत्वमाश्रिता ।

मुमुक्षोर्भोगसन्तानं लोपयित्वा ॥ १२ ॥

--------------------त्रिवलोत सूर्यमण्डलम् ।

स सोमः कण्ठबाहुस्थो घण्टिकाभमजं मुखम् ॥ १३ ॥

निरोधिका भ्रुवोर्द्धे तु ।

बिन्दुं खण्डेन्दोरुपरि स्थितम् ॥ १४ ॥

द्वादशाङ्गुलकोदण्डे ऋजु ऊर्ध्वे सकुण्डलम् ।

कृत्य विस्फूर्जिते ॥ १५ ॥

यः शेषव्रीह्याः व शेषं व्रीह्या शरीरकम् ।

हंसाक्षरद्वये क्षीणे विसर्गे च लयं गते ॥ १६ ॥

रेखा बाह्यशरीरन्तु तल्लक्षणमिदं स्मृतम् ।

--------------------तद्बाह्यशरीरकम् ॥ १७ ॥

स शिवः शक्तियुक्तस्तु शरीरं परमं स्मृतम् ।

चारे हंसाक्षरं याति शक्तौ स च ॥ १८ ॥

तीता च रेखिका ।

स्वभावः कृतको यन्नो यत् तद् रेखा वसानिकम् ॥ १९ ॥

मायेयं तद्गतं सर्वं मत्स्यजालमिवाङ्भ ।

मदः सृष्टिकुण्डलम् ॥ २० ॥

तन्मनोन्मनसंवित्तिरेखा चात्मन इष्यते ।

हंमनोन्मन ख हंसनोन्मन इत्युक्तं सोन्मनः स ॥ २१ ॥

सर्गगुणलक्षणा

कालसंकर्षणी ह्येषा स्वभावस्था वधूतिका ॥ २२ ॥

उच्चुष्मा तु निराचारा निसर्गा पुत्रवाहिनी ।

अघोरामृतवर्णा या विज्ञप्तिस्था निरामया ॥ २३ ॥

श्रीदेव्युवाच ।

कालसङ्कर्षणी पूर्वपदानां संप्रयोजनाम् ।

स्यु ख स्फु-------------------ते ॥ २४ ॥

श्रीभैरव उवाच ।

कालरूपस्त्वहङ्कारः कलाषोडशकान्वितः ।

सनादो मरुदाकीर्णे---------------- ॥ २५ ॥

एकसर्गस्तुटी द्वे तु रेखा तु द्यन्तमिष्यते ।

एवं सर्वेषु देहेषु हंसः कालस्वरूपतः ॥ २६ ॥

सम्यक् कर्षयते जीव ------- ।

------ माश्रित्य निर्व्यापारो भवत्यपि ॥ २७ ॥

वसर्गः प्रोच्यते मन्त्रो व मन्त्रः मननत्राणधर्मतः ।

मन्त्रातीतदशा रेखा -------------- ॥ २८ ॥

कालरूपेण सा रेखामृतवाहिनी ।

जीवकायसमाकर्षात् परिणामयते ततः ॥ २९ ॥

अतो सोऽहं ------------------ ।

उच्यते परमा शक्तिः प्रागुक्ता तु परापरा ॥ ३० ॥

स्वभावो कृतकः सत्ता सर्वसत्तासमालया ।

सुप्रतिष्ठामला नित्या स्वस्वरूपोपमानगा ॥ ३१ ॥

कर्मशुद्धिकलाधारा वल्लीयं त्रिस्वरूपगा ।

अपशब्दपदावस्था हंसशक्तिप्रतिष्ठिता ॥ ३२ ॥

हं कर्मसंस्मृता माया विसर्गो मल उच्यते ।

एतत् सर्वं ध्वनेर्यस्माद् यस्माद् द्वये रेखावसानिके ॥ ३३ ॥

अवधूता तु सा तस्माद् गीताशक्तिप्रवाहगे

धुरि वाधमशेषन्तु प्रपञ्चं चिद्विलोमदम् ॥ ३४ ॥

चित्स्वभावं स्वभावस्थं कुर्यात्तेनावधूतिका ।

अवते प्रयोजकेभ्यो धुनित्वा योज्य सन्ततिम् ॥ ३५ ॥

या ततोज्ञानिभिर्धीररवधूता प्रगीयते ।

हंसशक्तिः सरेखान्ता धुनित्वा लयसंस्थिता ॥ ३६ ॥

स्थित्युत्पत्तिविनाशिन्यो ह्यवते तेऽवधूतिका ।

धून्या निधूनते यस्मादध्व्या निर्वर्द्धते यतः ॥३७॥

अतोऽवधूतिका देवी कालसङ्कर्षणी मता ।

अवपालनमित्युक्तं धुनने क्षपणं मतम् ॥ ३८ ॥

अवनात् तेन धून्याच्च सावधूताभिधीयते ।

यो यस्य तु समुद्धारः स तस्योच्चुष्म उच्यते ॥ ३९ ॥

संसारोच्चुष्मरूपोऽयमुच्चुष्मा सोदिता ततः ।

स हंसस्तस्य सोच्चुष्मा शब्दशक्तिशरीरगा ॥ ४० ॥

उच्चुष्मा प्रोच्यते तज्ज्ञैःरुच्छ्वासार्थविचिन्तकैः ।

उद्गमः पूर्वजस्थानं हकाराक्षरमुच्यते ॥ ४१ ॥

सोच्चुष्मा स विसर्गस्तु स्थूलोच्चुष्मः प्रकीर्तितः ।

रेखा सूक्ष्मा समाख्याता तदन्तममृतं मतम् ॥ ४२ ॥

उच्चुष्माकृतकं चित्त्वं भावनामयमुच्यते ।

रेखोपलब्धिकं तच्च मायारूपमुदाहृतम् ॥ ४३ ॥

स्वभावो योऽधिकारस्तु स्वस्थोऽन्यैरविभेदतः ।

रेखान्तममृतं तद्धि सूक्ष्मोच्चुष्मावसानगम् ॥ ४४ ॥

निमित्तरूपतः शक्तेरुच्चुष्मोऽयमुद्गतो यतः ।

उच्चुष्मादुच्यते शक्तिर्मामकीयमनोर्थतः ॥ ४५ ॥

निरस्याज्ञानमखिलं तेनेत्यं ज्ञानमात्मनः ।

या चारान्तरविज्ञाना निराचारा ततः स्मृता ॥ ४६ ॥

Sampath_eBooks

निर्निरस्यपदोक्तिस्तु आसमन्तार्थनिश्चयः ।

चरार्थों गतिमक्षोभ्यामर्थदानप्रतिष्ठितः ॥ ४७ ॥

आसमन्तान्निरस्ते तु चारेऽस्मिन्नातिलक्षणे ।

स्तिमितानुगताशक्तिर्निराचारोच्यते वुधैः ॥ ४८ ॥

निःशब्देन हकारस्तु आसकारः ससृष्टिकः ।

चारे रेखा समाख्याता तत्परे शक्तिमात्मनः ॥ ४९ ॥

चारो नादः समाख्यातो योऽयं मन्त्राणि वाहयेत् ।

अप्रयत्ननिरस्तोऽसौ निराचारेति घुष्यते ॥ ५० ॥

आनन्दयति भूतानि निरस्वां निर्गलार्गलाम् ।

निःस्वरूपा यतः शक्तिर्निराचारोच्यते ततः ॥ ५१ ॥

आचारिणश्चरित्वा तु निःशेषवशमार्गगाम् ।

यतो निर्वाणदां देवी निराचारा ततो मता ॥ ५२ ॥

नैसर्गं शाश्वतं रूपमाचारः परमार्थगः ।

निराचारस्तु यः प्रोक्तो विज्ञानादमृतप्रदः ॥ ५३ ॥

निसर्गः शाश्वतं रूपं स्वाभाविकमुदाहृतम् ।

तद्यस्या : मोक्षदं ज्ञानं सा निसर्गाभिधीयते ॥ ५४ ॥

यन्त्राणि तनवोऽन्यूनां तां निर्वाहयते यतः ।

प्रगुणात् प्रगुणाद् योगात् प्रोक्तातो यन्त्रवाहिनी ॥ ५५ ॥

यंत्रं षोढागताध्वोक्तमधुगं त्रियुतं ततः ।

महदाधाररूपस्था प्रोक्तेयं यन्त्रवाहिनी ॥ ५६ ॥

अघोरं शान्तमित्युक्तं निःशेषोपशमं स्थितम् ।

तत्स्वरूपं यतस्तस्यास्ततो घोराख्यया मता ॥ ५७ ॥

नमृता या कदाचिच्च नित्यत्वगुणयोगतः ।

अमृता सामृता शक्तिरमृता चामृतात्मनः ॥ ५८ ॥

आनन्दो नाम निर्वाणः सुखं यत्तन्निरन्तरम् ।

तत्स्वभावा यतस्मातु निर्वाणोक्ता ततो मया ॥ ५९ ॥

ज्ञायंते ज्ञेयसंवित्तिर्ज्ञप्तिरुक्ता ज्ञप्तिरूक्ता तु सूरिभिः ।

तद्रूपे तु यतः शक्तेः सा ज्ञप्तिश्चोदिता ततः ॥ ६० ॥

आमया नामदोषास्तु मायित्वाणूद्र्ध्वलक्षणाः ।

तैर्मुक्तातो यतः शक्तिः सूत उक्ता निरामया ॥ ६१ ॥

रेखान्तं भैरवं तत्वं रेखा देवः सदाशिवः ।

विसर्गमीश्वरं विद्धि सकारं मां त्वया सह ॥ ६२ ॥

हकारः पद्मजन्मा तु तद्बिन्दुः सौरिरुच्यते ।

निवृत्तिश्च प्रतिष्ठा च महद् बिन्दुगते विदुः ॥ ६३ ॥

सविद्यान्तो द्विसर्गस्तु शान्तिर्नाम कला मता ।

शान्त्यतीता तु सा रेखा योन्मनी परिकीर्तिता ः ॥ ६४ ॥

तदन्तस्तन्महाभूतमप्रयत्नस्वभावगम् ।

स्वभाववचनं रेखा विसर्गश्च मनोन्मनः ॥६५ ॥

सकारोमन इत्युक्तोऽहङ्क्रिया यन्त्रवाहिनी ।

भूब्रह्मप्राणजाग्रादि हकारादिषु संस्थितम् ॥ ६६ ॥

प्रपञ्चाक्षरमेतद्धि बुध्वा तिष्ठ सुखं प्रिये ।

प्रोक्तमेतत् सर्वगतं बहिरपि स्थितं तत्वं रूपगुणमक्षरम् ॥ ६७ ॥

निष्प्रपञ्चं मायात्मकं सकलनिष्कलं निष्प्रपञ्च संविन्मयं न

चिद्रुपागतम् ।

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां देवीनां मन्त्रवर्णस्वपनिरूप

णं नामैकोनत्रिंशः ॥ २९ ॥

त्रिंशतिः पटलः ।

श्रीदेवुवाच ।

किं ज्ञेयं सर्वविद्यानां चन्द्रचूडामणिर्मम ।

कथयस्व मया पृष्टं सन्देहविनिवृत्तये ॥ १ ॥

श्रीभैरव उवाच ।

निमन्त्रो न जानाति कश्चित् प्रश्नं नगात्मजे ।

न च वक्तुं महादेवि मम तुल्योऽपि यो भवेत् ॥ २ ॥

बहुभिस्तीर्णगहनैः कल्पनान्तां प्रतिक्रिया ।

नाति निश्चयीकर्तुं पृथक्तया प्रदर्शनात् ॥ ३ ॥

वस्तु ज्ञेयं समाख्यातं ज्ञानं तस्य विवेचकम् ।

विवेचको विकल्पस्तु स च चिद्रूपमाश्रितः ॥ ४ ॥

चित्रागमविभागस्थो व्यवहारः सुनिश्चितः ।

चिज्ज्आनस्य नियोक्तात्र चित्तं ज्ञेयं विवेचने ॥ ५ ॥

विज्ञानञ्च तथा ज्ञेयं त्रिकमेतत् पृथक् पृथक् ।

एकीभावं यथा याति ज्ञेयं तत् किल मोक्षदम् ॥ ६ ॥

विज्ञाने विमलं याति ज्ञानें ज्ञेयं विलीयते ।

ज्ञेयस्वरूपको योगी मुच्यते भवबन्धनात् ॥ ७ ॥

भावयित्वा च भाव्यञ्च भावना च त्रिकस्य तु ।

अस्मादवयत्वाद् यो मोक्षः स मोक्षो भावनामयः ॥ ८ ॥

ज्ञानेन ज्ञेयरूपाणां हेयोपादेयभेदतः ।

श्रुतार्थान्निश्चयस्तेषां मोक्षः श्रुतिमयोमयः ॥ ९ ॥

सत्संविन्मयदं मोक्षं विन्दते पदयोगिनः ।

योगिनस्तं न जानन्ति स्ववार्तामिव मानुषाः ॥ १० ॥

न स श्रुतिमयोमोक्षस्तदा तद्भावतामयः ।

मुख्यः संविन्मयः प्रोक्तः संविदर्थविशारदैः ॥ ११ ॥

श्रीदेव्युवाच ।

किल मुक्तास्मि देवेश सन्देहः प्रोज्झितोमया ।

सन्देहादपि सन्देहों न परं योजितः प्रभो ॥ १२ ॥

एकमेकस्वरूपन्तु मोक्षस्येच्चन्ति सूरयः ।

परत्वस्य तु तत्त्वज्ञो विरूपप्रतिपत्तितः ॥ १३ ॥

भावनाश्रितसंवित्तु यन्मे बन्धुविनाशकम्।

यया तथ्यन्तु तद् ब्रूहि मया तद्बन्धविग्रहः॥ १४ ॥

श्रीभैरव उवाच।

अयत्नसंविदो मोक्षो योऽयं स परमार्थतः।

शेषा प्रयत्नसंसिद्धिः सविकारा न मोक्षदा॥ १५ ॥

वेत्तृवेदनवेद्योक्तक्रमतो वर्जिता मया

मृतास्ते शैवसिद्धान्तस्थिता यन्न पदोज्झिता ॥ १६ ॥

श्रीदेव्युवाच।

स्वभावस्यान्ययत्नस्य निर्विकारस्य शङ्कर।

उदेशाय प्रसादेन देहि मे ज्ञानविग्रहम् ॥ १७ ॥

प्रालेयमिषुबिम्बार्द्धमौलिमण्डलभाषितम् ।

प्राहेशोऽनन्यजा पूर्णा दृगवेक्ष्य प्रियामुखम् ॥१८ ॥

स्वभावरंगमध्ये तु नृत्यते नटवज्जगत् ।

वृत्तित्रय समालंब्य नानाभावरसाश्रयैः॥ १९ ॥

एतदिच्छादिकं तस्य न वाचकमुदाहृतम्।

स्वभाव एव निर्दिष्टो वाच्यवाचकरूपतः ॥ २० ॥

बोध्यबोध्ये चले येषां मोक्षो मोक्षार्थवादिनाम् ।

तेषां प्रयत्नसन्तापप्रयत्नं ह्येव बन्धनम् ख वर्धनम॥ २१ ॥

ते यास्यन्ति परां काष्ठां भावो येषां न चेतसि ।
परान्तरात्मबाह्यात्मचिन्तया ये च वर्जिताः ॥ २२ ॥
मुक्तामुक्तिगमार्गं स्वमार्गणं ह्येव बन्धनम् ।
तत्र चित्तादिसंकल्पो निर्विकल्पं हि तत्परम् ॥ २३ ॥
निर्गुणस्य हि नैर्गुण्यं विकल्पो गुणवद्यतः ।
अतो न वाचकस्तस्य वाचकः किन्त्ववाचकः ॥ २४ ॥
उपादेयमिदं ह्यत्र स्थितिं को वेत्ति यान्वितम् ।
विकल्पोच्चूनता नुतामनुभावप्रसाधिता ॥ २५ ॥
ज्ञेयानां भिन्नरूपाणां यज्ज्ञानमुपलब्धिकम् ।
विभुर्ज्ञेयस्य तद्रूपं शब्दस्येव रसेन्द्रियम् ॥ २६ ॥
प्रश्नोत्तरप्रयोगेन आसीत् स्वच्चस्वभागम् ।
हृतं भवत्या प्रश्नेन मया चाप्युत्तरेण तु ॥ २७ ॥
योगादिकमशेषन्तु योगं भूतलगोचरम् ।
जाग्रत्स्वप्नसुषुप्तान्तं प्रवेदिनाम् ॥ २८ ॥
लयोत्पत्तिस्थितिर्यस्य तदनित्यमिहेष्यते ।
तदा भावः स्मृतो नित्यो ह्यनित्यो तथ्यता स्मृता ॥ २९ ॥
वाच्यवाचकता वाच्य शब्दाद्यैर्भवते यदि ।
तदा तदर्थरूपं स्यादर्थोऽपि हि घटादिवत् ॥ ३० ॥
बृहद्वस्तुप्रतिष्ठायां सा स्वभावैकगोचरा ।

शेषात्मज्ञानशास्त्रेभ्यो ज्योत्स्नेव प्रविजृम्भते ॥ ३१ ॥

अनाकृष्टमहास्वापो विमुक्तस्वान्तमार्गणः ।

निर्लक्षं लब्धलक्षो यो विव्याध स धनुर्धरः ॥ ३२ ॥

उपेयुषं स्वां परमामवस्थां किं शास्त्रजालेषु मनो ददध्वम् ।

शास्त्राणि मायार्थविशारदानि प्रपञ्चशून्यस्तु पुनर्निसर्गः ॥ ३३ ॥

निर्विवेकनिरारम्भसुप्रतिष्ठस्वभावगे ।

उपदेशे गुरुरहं शेषान्ये मोक्षवादिनः ॥ ३४ ॥

वाच्यमवाचकमस्वरमजमत्तपमगुणसमलबलसंवेद्यम् ।

तद्वदुपदेशवेद्यं वक्तुं शक्नोति कोऽत्र हिमगिरितनये ॥ ३५

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्त्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां निसर्गनिर्णयस्त्रिंशतिः

पटलः ॥ ३० ॥

एकतृंशतिः पटलः ।

श्रीभैरव उवाच ।

प्रपञ्चेन तया मुक्तः प्रविभागनिबोधितः ।

कर्तव्यानां क्रिया ह्येषा मुक्तेः साधनभावतः ॥ १ ॥

प्रपञ्चोऽयमयं शम्भुरुभयोरन्तरं स्फुटम् ।

आत्मतत्वक्रिया ह्येषा सदाशिवपदानुगा ॥ २ ॥

श्रद्धयानुभवाविष्टं परमेतद्धि तत्पदम् ।

विद्याविधानमेतद्धि बिन्दुतत्वस्वरूपदम् ॥ ३ ॥

अवधानविनिर्मुक्तमुपलब्धैकगोचरम् ।

शिवतत्वं स्वभावस्थं स्वस्वभावप्रकाशकम् ॥ ४ ॥

संसारदुःखविच्चेदं कर्तव्यं साध्यमिष्यते ।

यत्साधनक्रिया या तु निर्मथ्या सा क्रिया मता ॥ ५ ॥

आविर्भावतिरोभावविनाशस्थित्यनुग्रहः ।

कर्तव्यमस्य च क्रिया स्वभावपरभावना ॥ ६ ॥

प्रेरकत्वं हि यच्चंभोरिच्चामात्रप्रसिद्धिगं ।

हृत्यनिष्पत्ति दृष्टेन सा क्रियेत्युपचर्यते ॥ ७ ॥

बद्धानां बन्धविश्लेषो यत् यः स्वभावप्रबोधना ।

सा क्रियाणां क्रियार्थाय परमाणुः कृतो यया ॥ ८ ॥

भोगो नाम समास्वादः पुंसामनुभवात्मकः ।

स प्रपञ्चोऽप्रपञ्चश्च प्रयत्नश्चाप्ययत्नवान् ॥ ९ ॥

त्रियोगात् मानवः सिद्धः स्वभावश्च निसर्गजः ।

बन्धक्रियानियोगस्तु मोक्षः स्वाभाविकी क्रिया ॥ १० ॥

बन्धमोक्षान्तरं ह्येतदबुध्वा कुत्र निर्वृतिः ।

सूक्ष्मयिाधिगतमद्भुत बन्धमोक्षमित्थं नवाः शिवमहागमादर्शितार्था ।

येनापकृष्य रुजमुग्रमनदिसिद्धः तच्चाप्य वाप्यविपुलं भवताच्चयुतौजाः ॥

११ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां क्रियाशक्तिस्वरूनिरूपणं

नामैकत्रिंशतिः पटलः ॥ ३१ ॥

द्वात्रिंशतिः पटलः ।

श्रीभैरव उवाच ।

यत् तत् स्वभावरूपन्तु तत्त्वं शान्ततमं स्थितम् ।

तद् ज्ञायते तत्क्रियया यतोऽङ्गं तस्य न क्रिया ॥ १ ॥

अनङ्गत्वाच्च तत् तत्वं तत् तत्वमुक्तं मुक्त येन हि ।

शक्तिगोचरगं तद्धि सप्रपञ्चं क्रियात्मकम् ॥ २ ॥

सूक्ष्मात् सूक्ष्मविभागेन भोगालयमुदाहृतम् ।

मन्त्रस्थं सप्रपञ्चन्तु उभयार्थप्रसाधकम् ॥ ३ ॥

निष्प्रपञ्चा प्रयत्ना या रुपलब्धेरनन्तरम् ।

निर्वाणविभवा सिद्धिः शेषं क्रीडाविधायकम् ॥ ४ ॥

स्वाभाविकं स्वतन्त्रन्तु क्रीडाख्यं भावनामयम् ।

सूक्ष्मक्रियामयं ज्ञानं यत् तच्छ्रुतमयं क्रिये ॥ ५ ॥

ज्ञानायत्ता क्रिया देवि तत् तन्त्रं तत् कथं भवेत् ।

तस्मात् स्वविषयोपान्तं धत्ते स्वविषयं फलम् ॥ ६ ॥

येषु येषु यथायातं मुक्तिसाधनवस्तुषु ।

तेषु तेषु तथा वीर्यं तत्तु योग्यत्वसंस्थया ॥ ७ ॥

वासनाकर्मविद्याभिर्मन्त्रैर्दीक्षाख्यकर्मणा ।

चर्यायोगचरुप्राणिकायसंभवप्राशनैः ॥ ८ ॥

क्रियामार्गगतं तत्त्वं जन्तुर्निर्वापयत्युमे ।

न कश्चिद् बलवांल्लोके यज्ज्ञानमतिवर्तते ॥ ९ ॥

तन्मूलानि फलान्यत्र निश्चयः सर्वसूरिणाम् ।

प्रालेयाचलसम्भवे स्फुटतराः प्रश्नास्तदीयाखिलाः ॥ १० ॥

व्याख्याताः सुरवृन्दमौखरितटे रूढ्दृष्टपादाम्बुजे ।

चर्या त्वं शृणु सांप्रतं स्मर तनोर्भोगात्मनां भोगदाम् ॥ ११ ॥

स्वांशोद्देशविभागपाटनविधेरन्योन्यशर्मात्मिकाम् ।

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदेव श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्त्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां सन्धिनिवारणो नाम द्वात्रिंशतिः पटलः ॥ ३२ ॥

त्रयस्तृंशतिः पटलः ।

श्रीभैरव उवाच ।

एवं निःशेषचक्राणां विज्ञानाशेषलक्षणः ।

ऋत्विगे कतमे चक्रे चतुर्थांशमयात्मनाम् ॥ १ ॥

श्रावयेत् समयान् भूत्यै यावतश्च यथास्थितान् ।

गुणदश्च गुणातीतं गुणिनं गुणसंपदः ॥ २ ॥

शान्तघोरविमूढाश्च मिश्रामिश्रात्मकात्मिकाः ।

Sampath_eBooks

सदाभिवन्दयेत् प्राज्ञो निन्दयेन्न कदाचन ॥ ३ ॥

कन्याङ्गेषु विध्वम्सं भैरवस्नातकर्मणाम् ।

न कुर्याच्च विलोमस्थो ह्यन्येषामपि लिङ्गिनाम् ॥ ४ ॥

देवतानां गुरोश्चैव यद् द्रव्यं स्वीकृतं क्वचित् ।

न कुर्याल्लोपयोगन्तदकर्मी तु कदाचन ॥ ५ ॥

नारुहेद् गुरुतल्पञ्च वीरपत्नीं न कामयेत् ।

जटाभस्मधरां नारीं शङ्खभूषां तथैव च ॥ ६ ॥

नवा तद् द्वैतमन्त्रांगः प्रणमेद् द्वैतमन्त्रिणाम् ।

नाधिकारकृतिं कुर्याच्चुम्बकः साधकोऽपि हि ॥ ७ ॥

आह्निकस्य महादेवि स्थित्यैषा वामचारिणाम् ।

श्रीदेव्युवाच ।

गुरुनिन्दादिकैर्दोषैः राजसानेन्दुभूषणः ॥८ ॥

कीदृक्फलं ललाटाक्ष अग्निदग्धमनोभव ।

श्रीभैरव उवाच ।

गुरौ गुरुतरे तत्त्वे स्थानं साधारणं मतम् ॥ ९ ॥

निन्दिते वीचिपूर्वन्तु कूष्माण्डान्तमनुक्रमात् ।

गुरूणां गुरुतरो ज्ञेयो यच्चक्यंजितचेतसः ॥ १० ॥

प्रयान्ति परमां काष्ठां सदाविध्वस्तकल्मषः ।

सा परापररूपेण जगत्यत्र विसर्पिता ः ॥ ११ ॥

Sampath_eBooks

पर स्वाभाविको ज्ञेयः क्रीडावस्थः स मन्त्रराट् ।
क्रियाशक्त्याश्रितः सो हि गुरुरित्यभिधीयते ॥ १२ ॥
त्रिरूपोऽप्येकरूपोऽयं निर्मितो यैर्दुरात्मभिः ।
न तेषां न तनुध्यानं तेनैते यान्त्यधोगतिम् ॥ १३ ॥
योग्याशुचिर्मयारोध कूष्माण्डाधिपतिर्भवेत् ।
त्रयाणां कन्यकादीनां समयानां विलोपिनाम् ॥ १४ ॥
दुन्दुभादित्रिकस्थानं स्थितेः स्यादीश्वरस्थितिः ।
व्यापादिते तथा शैवे त्रिस्वरूपेऽपि च सुन्दरि ॥ १५ ॥
चतुर्थस्थानसंप्राप्तिर्भवेद् बोधादिसंस्थया ।
विद्यालये विमुच्यन्ते कामिकाप्तनिरोधिनः ॥ १६ ॥
कापालिकीं प्रपञ्चस्य संख्याकर्तुश्चलाकुलाम् ।
दण्डधृक् सूचकानां च लिङ्गिनां हास्यहिंसया ॥ १७ ॥
दण्डाः कोलाहलाःकङ्का हि द्युपातालवासिनः ।
भवन्ति प्राणिनः स्थित्या कालाग्नेर्मम च प्रिये ॥ १८ ॥
देवतानामयादीनां कृतया द्रव्यहिंसया ।
प्रेतादिषु हि लोकेषु निरोधस्तत्स्थितिर्भवेत् ॥ १९ ॥
गुरुष्वेवज्ञया दृष्टे गतिर्देवस्ववद् भवेत् ।
कामतो हिंसितेऽत्रापि नंदीख्यं पदमाप्नुयात् ॥ २० ॥
प्रदत्तं कर्मणा भुक्तं गुरुस्वं न निरोधकृत् ।

प्राणैरपि हि तत्प्रायोऽद्योऽसौ प्राप्नोत्यभीप्सितैः ॥ २१ ॥

अपशुप्राणिमेतद्धि भविष्यति जगत् किल ।

जलचक्रे विवर्तन्ते कालाद् योगत्वसंस्थया ॥ २२ ॥

तत्रापि गुरुपत्नीगाः योग्या रौरवभूमिषु ।

निरयस्नायिनस्ते तु गुरुघ्ना ये च पापिनः ॥ २३ ॥

वीरजायाभिगामी च भवेद् बालो हलान्तगः ।

दण्डमण्डलमाप्नोति जटाभस्माङ्गिनीषु या ॥ २४ ॥

कापालिनीनिषेवी रोधमुच्चुष्मजं लभेत् ।

अतो द्वयानुसम्बद्धबन्धनात् स्वफलाच्च्युतम् ॥ २५ ॥

रुणद्धि वागतीतन्तु स्वलयान्तमनन्दिते ।

ऋत्विजां च पदं लेभे गुरुं स्वाधिकृतक्षितौ ॥ २६ ॥

साधकश्चापि शिष्याणामनैकान्तिकसंस्थया ।

इति भैरवस्रोतसि विद्यापीठे शिश्चेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं शतिसाहस्त्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां समयाचारविधिः त्रयस्त्रिंतिः पटलः ॥ ३३ ॥

चतुस्त्रंशतिः पटलः ।

श्रीभैरव उवाच ।

अथ चारं प्रवक्ष्यामि सिद्धये साधकात्मनाम् ।

विपुष्टपालिते लेभे येसदा वाञ्चितं फलम् ॥ १ ॥

भैरवाश्रयिणां देवि चुम्बकादि महात्मनाम् ।

अन्योन्यगोचरस्थानां क्षेमालापः प्रशस्यते ॥ २ ॥

अधिकारेऽधिकरणे विज्ञाते न च क्रियाः ।

श्रीदेव्युवाच ।

प्रणामं नाम यत् प्रोक्तं लिङ्गिभ्यः सकृतो हर ॥ ३ ॥

गुणायैव भवेन्नाथ न दोषाय कदाचन ।

अधिकाराधिकरणं किमर्थं तेषु मृग्यते ॥ ४ ॥

एतद् वदस्व सर्वज्ञ तत् तुष्ट्याम्नायमेव च ।

श्रीभैरव उवाच ।

यत्त्वयोक्तं हि तत् तथ्यं वन्दनालिङ्गिनं प्रिये ॥ ५ ॥

उत्तरोत्तरसामान्यमधिकारमजानता ।

प्रणामफलभेदेन परत्रापि निरोधकृत् ॥ ६ ॥

शिष्टाधिकरणे शून्ये स्वेच्छाव्रतनिर्धारणे ।

प्रणामात् प्रोदितं स्थानमाप्नुवन्ति गुणाः स्मृताः ॥ ७ ॥

चुम्बको भैरवः साक्षात् साधको गुह्यकेश्वरः ।

चुम्बको ज्ञानशून्यत्वाद् वामपीठाधिपोद्गतः ॥ ८ ॥

संमतो विग्रहः शंभोः स्थितिरेषामियं मता ।

न्यूनोत्तमपदस्थानां वामजायामजाधिका ॥ ९ ॥

अतोऽनुक्रमशः शस्तस्तनुतामेति वन्दनम् ।

चुम्बकस्तु त्रिभिर्वन्द्यः संयोगात् कः शिरोभुवम् ॥ १० ॥

तस्यापि च शिरोर्नामाद् वीक्षणानि शुभानि तु ।

चुम्बके चुम्बकेशानमधिकारं महत्तरम् ॥ ११ ॥

वन्दयेत् प्रसृतः मूर्ध्ना सोऽपि बाहुं प्रसारयेत् ।

श्रीदेव्युवाच ।

तपस्तप्तगुणायाश्च गृध्नः पश्चाभिषेचिता ॥ १२ ॥

अन्ये पूर्वाभिषिक्ताश्च निर्गुणा लघवोऽपि च ।

चुम्बकाः साधकेन्द्राश्च तेषामन्योन्यंमीदृशम् ॥ १३ ॥

वर्तनं गृजनं ज्वाला व्यापकत्वरमेव च ।

श्रीभैरव उवाच ।

बिन्दुनादं तथा शक्तिं स्वभावस्थं च तत् पदम् ॥ १४ ॥

मन्त्रात्मशक्तिविज्ञाननिर्भ्रान्तं यस्य सुन्दरि ।

मन्त्रार्थपदतुर्येऽपि यस्याध्यक्षस्य लक्ष्णः ॥ १५ ॥

स चुम्बकः प्राणं इह शिरश्चेदे प्रशंसितः ।

न चाधिक्यं तपोनिष्ठा नाभिषेकः प्रयुज्यते ॥ १६ ॥

यत् तत् स्थितं कुरङ्गाक्षिज्ञानं सर्वस्य मूर्धनि ।

समानज्ञानसंपृक्ते गरीयान् पूर्वसेवितः ॥ १७ ॥

स ख नास्ति पितृतुल्योऽथवा भ्राता यदि ज्ञातस्तु तत्वतः ।

तदा तं प्रणमेद् भक्त्या पूर्वोक्तक्रमयोगतः ॥ १८ ॥

साधकोऽपि प्रणामार्हः स्वगुरोरेकगर्भजः ।

स्वसंस्कारकनीयांसो ये गुरोरनुजाः सदा ॥ १९ ॥

ससंभ्रमसमुत्थानयोग्यास्तेऽत्र मया मताः ।

पुत्रकादियुगं यच्च दीक्षितं गुरुणा गुरोः ॥ २० ॥

तस्याप्ययं क्रमः कार्यो भ्रातुरप्यग्रजन्मना ।

अथ किं बहुनोक्तेन स्मृतेयं लोकसंवृति ः ॥ २१ ॥

गुरुं वन्द्य प्रयत्नेन मन्त्रविद्यां शिवप्रदां ।

यो गुरुं सगुणं त्यक्त्वा गौरवाय महत्तरम् ॥ २२ ॥

आश्रयते व ख आश्रयंते न तं वन्दे वासना न च्युता यतः ।

श्रीदेव्युवाच ।

दानक्षपणजो धर्मः किंक्रियातो न शङ्कर ॥ २३ ॥

वासनातो व ख वाशनातो भवेद्व येन स्तुतिस्तद्वन्धना भवेत् ।

निजगार्धेन्दुखण्डांशुमालालिङ्गितमूर्ध्वभृत् ॥ २४ ॥

धूर्जटिव्रतशैखण्ड किणितां सरोरुह ।

संस्पृष्टं व संस्पृंष्टं शुद्धशक्त्या तु एषां चैतन्यमादरात् ॥ २५ ॥

तेषां विहासनासाध्वी निश्चला मोक्षरागिणी ।

गुणवद्दत्विजे शोध्यं शोधितं शङ्कराध्वने ॥ २६ ॥

शिवयागः कृतः सम्यग् वासनातो विभाव्यते ।

सन्तोषवासनायेयं दीक्षा ज्ञानप्रतिष्ठिता ॥ २७ ॥

Sampath_eBooks

आघ्राताः शुद्धशक्त्या ते ते च मुक्तात्र शासने ।

विद्युद्वच्चपला येषां वसाना चुम्बकादिषु ॥ २८ ॥

ते भवान्तरिताः देवि मोक्षभाजो भवन्ति हि ।

यद्यणुः संस्थितः शक्त्या ह्येकदा गुरुरूपया ॥ २९ ॥

तदान्यगुरुसंस्थोऽसौ चुम्ब्यते नानिमित्ततः ।

तस्मादत्र विपुष्टेयं वासना चललक्षणा ॥ ३० ॥

मुक्तये या नरा सापि कलाखचितवर्त्मनि ।

विदितगुरुक्रमं स्फुटार्थं गुणविभवं गुणं समश्नुते ॥३१ ॥

यदि नियमं च वेत्ति युक्तं समयमपूर्वकं गुरोः पुरस्तात् ।

इति भैरवस्रोतसि विपीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यामाचारपटलश्चतुस्त्रिशतिः पटलः ॥ ३४ ॥

पञ्चत्रिंशतिः पटलः ।

श्रीभैरव उवाच ।

अथ सर्वविदुग्रांशुमार्गायातमराविलम् ।

वामेशानपदप्राप्तिकारकं दिव्यसिद्धिदम् ॥ १ ॥

वर्तनं देशिकादीनां अहोरात्रं प्रतिष्ठितम् ।

वचमध्याविभागेन शृणुष्वायतलोचने ॥ २ ॥

सर्वावाप्तावप्यवश्यं कुर्यादाम्नायपालनम् ।

आम्नायपालनाल्लेभुरभीष्टं मृत्तिकादयः ॥ ३ ॥
ज्योतिषां मण्डलाटोपलुलिते विमलाम्बरम् ।
विविक्तेषसि वीरेन्द्र समुन्नयसमाहितः ॥ ४ ॥
हरस्थानं व्रजेन्मौनी तत्रोत्सर्ग्युत्तरामुखः ।
नोत्सर्गी भूरुहादस्मद्वल्मीके दुर्गविश्मनि ॥ ५ ॥
रथ्यायतनसस्यान्तर्नवारिप्राणिमध्यतः ।
स्वर्भाग्निदुर्गकौबेरभस्ममालाशिरश्चये ॥ ६ ॥
पुष्पारामलताहर्म्यमनोरम्ये युधामसु ।
विण्मूत्र मैथुनक्रीडां वर्जयेत् साधकेश्वरः ॥ ७ ॥
कृतशौचो विविक्ताङ्गमुपस्पृश्योत्तरामुखः ।
न्यासं कृत्वा तु करयोः शरीरे च पुरोदितम् ॥ ८ ॥
आगमोक्तमतः कुर्याद् अन्तःकरण साङ्गवत् ।
ततो हृदंबुजावस्थं मन्त्रचक्रं प्रति प्रति ॥ ९ ॥
मन्त्रपूतेन पयसा तर्पयेत् परितोषितः ।
योगिनीसर्वमातृंश्च देवीं वीरान्मुनीनृतून् ॥ १० ॥
सव्यापसव्यतस्तर्प्य व्यतीर्णांजलिंनासुरा ।
सकुशेनाक्षतयुजा सतिलेन ससुभ्रजा ॥ ११ ॥
स्वधा स्वाहा नमोऽन्तेन हृदयेनोपचारिणा ।
मार्जनं प्रथमं कृत्वा तथा चैवाघमर्षणम् ॥ १२ ॥

Sampath_eBooks

हृदा प्रक्षेपणं कुर्यादायुधेनामलत्विषा ।

भास्वन्मण्डलमध्यस्थं मन्त्रधाम्नेऽमृतात्मने ॥ १३ ॥

ध्यात्वाम्बुकुसुमापूर्णमञ्जलिं विनिवेदयेत् ।

तत्रस्था यजनं कृत्वा विनिवेद्य वरीयी ॥ १४ ॥

मुद्रयात्मगतं कृत्वा प्रारसेच्चाह्निकं ततः ।

तच्चाप्येकतमं प्रोक्तमन्तःकरणं पूर्ववत् ॥ १५ ॥

पात्रलिङ्गपदस्थञ्च रूपस्थं वा हृदि स्थितम् ।

पात्रस्थं त्रिविधं तच्च लिङ्गस्थं चापि पञ्चधा ॥ १६ ॥

पदस्थं नवधा देवि मयोक्तं मन्त्रपूजनम् ।

पात्रस्थान्तर्गतं प्रोक्तं रूपं स्वाकारगं मतम् ॥ १७ ॥

स्वमन्त्रप्रतिमारूपं यच्च प्रोक्तं सलक्षणम् ।

कीदृशं द्रुमधारूनां कटाहोर्ध्वञ्च तत् स्मृतम् ॥ १८ ॥

अरूपालमहारत्नसंस्थितं तद् द्वितीयकम् ।

तृतीयं मन्त्रकाये तु स्वकीयेऽनन्यवासने ॥ १९ ॥

पार्श्वतः प्रकृतिं दत्वा भोगस्थां पूज्य यत्नतः ।

कृतोपचारमखिलं जपात् पूर्वाह्णगो भवेत् ॥ २० ॥

प्रतिष्ठा तत्र संसिद्धिर्मायीयादि प्रतिष्ठितम् ।

नवहस्तात् समारभ्य यावदेककरं प्रिये ॥ २१ ॥

तल्लिङ्गसंस्कृतं कृत्वा तत्र मन्त्रं प्रपूजयेत् ।

Sampath_eBooks

साधकोद्दिष्टरूपञ्च गर्भैर्त्विजं यथेच्चया ॥ २२ ॥

अन्यत्पुष्पमयं लिङ्गं पूजामूर्तिप्रतिष्ठितम् ।

स्थण्डिले यज्यते तच्च गन्धं गन्धं च गोलकम् ॥ २३ ॥

अङ्गुलैकात् समारभ्य धातुजं चतुरङ्गुलम् ।

भूतवत् तत्प्रतिष्ठादौ तत्कालं वा प्रपूजयेत् ॥ २४ ॥

मृण्मयं व मृन्मयं बिम्बकं कृत्वा सम्पूज्याणुं तदास्पदम् ।

तेन नैवृत्तिकाभोगा सुलभाः साधकात्मनाम् ॥ २५ ॥

स्वभावस्य वचो धार्य संवित् तावच्युतात्मवान् ।

तदाराधनमेवोक्तं मन्त्रस्य परमे पदे ॥ २६ ॥

यदेतन्निबिडं शून्यं सर्वव्यापकमूज्ज्वलम् ।

तद्रूपोऽहं मदीया वा मूर्त्तिरेषा निरामया ॥ २७ ॥

एवम्विधेन भावेन क्रियते च यदाह्निकम् ।

ज्ञानशक्तिपदस्थन्तु साधकानां सुखप्रदम् ॥ २८ ॥

संकल्पात् प्रच्युतं तद्धि विकल्पस्थितिगोचरम् ।

तस्मिन् क्रियापदे मन्त्रं कुण्डलाख्ये प्रपूजयेत् ॥ २९ ॥

पूजनं नाम यत् प्रोक्तं तत्तद्धर्मविचिन्तनम् ।

तद्धर्मलब्धलक्ष्याणां प्राप्तिस्तद्धर्मिणी भवेत् ॥ ३० ॥

विषयच्च्युतोन्तरं गवां श्रूयते ध्वनिः ।

चिञ्चिणी चीरवाकी च घण्टाख्यस्त्रिविधो बलः ॥ ३१ ॥

नादाख्यं तत् पदं देवि मन्त्राधिष्ठानमद्भुतम्।

शिखण्डिपत्रचण्डांशुतेजोभासि मणिप्रभम्॥ ३२॥

बिन्दुरूपस्य मन्त्रस्य पदं तत् स्वगुणप्रदम्।

त्रिकैकञ्च महाव्योम नादनैरोधनं हि यत्॥ ३३॥

तन्निरोधकसंज्ञन्तु चिद्बिन्दुशकलान्तगम् ।

पदं विद्याख्यमेतद्धि प्रोदितं चेश्वरादिकम्॥ ३४॥

तत्र चित्तं विनिक्षिप्य स्थिराक्षः शक्तिनिर्गमम्।

पश्यति प्रज्वलद्दं दीपं शिखावर्त्मनि रश्मिवत्॥ ३५॥

यदा तदाखिला ध्वस्ताः पदार्था ः यान्ति संविदम्।

भृकुटिं चार्द्धचन्द्रं तु तथा नेत्रान्तरे पदम्॥ ३६॥

मायेयं ध्यानतस्तत्र तद्व्याप्तिर्व्यज्यते स्फुटा।

प्राणापानसमायोगाद् द्वादशान्तपदद्वये॥ ३७॥

ध्यानेन पूजयेन्मन्त्रं मुख्यकल्पफलप्रदम्।

हृत्सरोजपदे शुभ्रे शुक्लपत्रविमालिनि॥ ३८॥

कर्णिकाकेसराकीर्णे बीजमण्डलमण्डिते।

वाच्यवाचकभेदेन ह्यभेदेनाथवा प्रिये॥ ३९॥

मनःसु पूजितो ध्यातो क्यत्र पुंस्तत्र भूतिदः।

एवमेकतमे ह्यस्मिन् पदमन्त्रकृताह्निकः॥ ४०॥

विलुप्तसमयाचारो न भवेत्त कदाचन।

अलुप्तसमयस्यापि स्वपदावस्थितं फलम् ॥ ४१ ॥

न त्वया न मया देवि कुपितेनाभिधार्यते ।

य इमं वेत्ति नो सम्यङ् न च यानविनिर्णयम् ॥ ४२ ॥

नात्मा शुद्धो न संकीर्णो न चार्घफलभाजनः ।

उक्तेनैकतमेनैव शुचिस्नानेन मार्जितः ॥ ४३ ॥

रूपस्थं वा सदा कुर्यादाह्निकं वीरवन्दिते ।

रूपमग्निर्महेशस्य तत्र चक्रं प्रपूजयेत् ॥ ४४ ॥

कृतान्तकरणे नित्यमस्थण्डिलममण्डलम् ।

अभिन्नं भिन्नरूपं वा प्रोक्तयुक्त्या गणाम्बिके ॥ ४५ ॥

कृतेऽन्तःकरणे कृत्वा जपं तत्रं निवेदयेत् ।

यतये कर्णिकास्थाय हृद्यागाह्नं समाप्यते ॥ ४६ ॥

एवमेकतमे स्थाने चुम्बकस्तु कृताह्निकः ।

तत्र संकीर्तनं कुर्यात् स्पन्दतेभ्यः क्रमागतः ॥ ४७ ॥

परामृतमहावीरविविक्तवपुषोऽमलाः ।

चुम्बकास्तत्र रक्षार्थं स्नाननिश्चयिनो मताः ॥ ४८ ॥

प्रभूतमूर्त्तिदोषाणां चारः प्रोक्तो विविक्तये व विविक्तंये ।

निखिलामयमुक्त्यर्थं समर्थं तत्वदर्शनम् ॥ ४९ ॥

तत्वाविकल्पगो मन्त्री गृही लिङ्ग्यथवा प्रिये ।

स्वाम्नायस्य निरूद्धे तु नेपथ्यं संप्रतिष्ठितम् ॥ ५० ॥

Sampath_eBooks

यदि संवृत्तिगो देवि विविक्तस्तु यथेच्छया ।
शिष्याभिलिखिते पूर्वं योगपीठे सलक्षणे ॥ ५१ ॥
सरोरुहकृताधारे तत्र हंसं व हसं प्रपूजयेत् ।
दिवि ग्रहवरं बन्द्यं गुरुं गुरुपदेन तु ॥ ५२ ॥
कृत्वैशानीं मनो ध्यात्वा शरयन्त्रैकसंस्थिताम् ।
पुस्तकं पूजयेद् भक्त्या सितमाल्यानुलेपनैः ॥ ५३ ॥
गुग्गुलुसृष्टधूपं वा दग्धा चापि पुनः पुनः ।
सम्बन्धादिक्रमं ब्रूयाद् गुरुर्भक्तजनस्य तु ॥ ५४ ॥
नापवादकृत्तोक्तिस्थं तत्र कंचित् प्रवेशयेत् ।
अनावेगास्त्वमी पापा ये चान्ये दृष्टमण्डलाः ॥ ५५ ॥
स्वयं गृहीतमन्त्रास्ते ये चान्याप्तफलैषिणः ।
तेषां तन्त्रमिदं गोप्यं श्रवसापि महात्मनाम् ॥ ५६ ॥
स्नेहाद् भयाच्च लोभाद् वा विलोमाचारवर्तिनाम् ।
तत् त्वं संकीर्तयेद् यस्तु सदुन्दुभिमुखं विशेत् ॥ ५७ ॥
पुरः समन्वितानान्तु श्रावकानां क्रियावताम् ।
आरभ्यत एति वक्तव्यं चुम्बकेन्द्रेण धीमता ॥ ५८ ॥
आरम्भस्यावशिष्टाश्च सर्वारम्भसमानता ।
प्राप्ता भवत्यतोर्थं हि शास्त्रिमारभ्यते वदेत् ॥ ५९ ॥
शास्त्रं किं मुच्यते ह्येवं शिष्यवाक्ये कृते सति ।

Sampath_eBooks

भीतानां सरुजार्तानां दुष्टानां चापि शासनात्॥ ६० ॥

त्रयाणां च परित्राणाच्चास्त्रमुक्तं हि सूरिभिः।

कुमार्गाच्चित्तमाश्रित्य नरं श्रेयसि योजयेत्॥ ६१ ॥

शासनं तस्य हि त्राणं कुर्वन् शास्त्रं प्रशस्यते।

पत्युः शासनमाज्ञोक्ता त्रायते च तयोर्जगत् ॥ ६२ ॥

शब्दशक्त्यात्मिका सा तु विभिन्ना फलभेदतः ।

इत्येवं शास्त्रमुद्दिष्टं तत् स्थित्यंतर्यथा पुनः॥ ६३ ॥

सामान्यं च विशेषं च साधारणविशेषतः।

विशेषतरमन्यच्च शास्त्रमुक्तं चतुर्विधम्॥ ६४ ॥

इतिहासपुराणानि गणितं काव्यनाटकम्।

चन्दांसि शब्दशास्त्राणि सामान्यविषयाणि तु॥ ६५॥

सर्वेषां वर्णिकानान्तु सामान्यश्रवणादिह।

श्रुतिस्मृत्युपनिषदो मन्त्रसूत्रं प्रकल्पकम्॥ ६६ ॥

आन्वीक्षिकं च विज्ञानं साधारणविशेषगम्।

द्विजं ते नयतस्तत्र जायन्ते नाधिकारिणः॥ ६७ ॥

सौरं शैवं पाञ्चरात्रं प्रमाणं वैमलं मतम्।

अथर्वं साङ्ख्ययोगं च बौद्धमारहतादिकम्॥ ६८ ॥

विशेषाख्यं यतस्तन्त्रं विशेषसमयात् स्थितिः।

भैरवं वज्रयानं च गुह्याद्युक्तं सगारुडम्॥ ६९ ॥

भूततन्त्रादितन्त्रञ्च विशेषतरमुच्यते ।
वैशेषिके तु समयी यतोऽत्रैवाधिकारकृत् ॥ ७० ॥
निश्शेषतरमेतद्धि शास्त्रजालमतो मतम् ।
एवं चतुर्विधं शास्त्रं लौकिकाद्यं च पञ्चधा ॥ ७१ ॥
लौकिकं वैदिकाध्यात्ममविमार्गमथाणवम् ।
फलभेदविभिन्नञ्च शास्त्रमेवं तु पञ्चधा ॥ ७२ ॥
ध्रुवानणिजनस्थानमुख्यपञ्चाष्टकादिषु ।
प्राप्तिर्लोकादिशास्त्रेषु रतानां स्यादनिन्दिता ॥ ७३ ॥
एवमेतानि शास्त्राणि सामान्यादीनि यानि तु ।
न चाभिधातुं युगपच्चक्यं तेनापि केनचित् ॥ ७४ ॥
युगपद्वक्तुमशक्यत्वाच्चतुर्णामथ तत्स्थितम् ।
वाच्यमेकतमं शास्त्रं सामान्याद्यमनुक्रमात् ॥ ७५ ॥
लक्षणाद् यस्य शास्त्रस्य गणिताद्यन्यमस्य वा ।
भेदोपभेदकथनं व्याख्यानं क्रियते बुधैः ॥ ७६ ॥
शेषाणि च वदाम्पादौ ग्रन्थग्रन्थान्तराणि तु ।
अथ सामान्यवैशेषसाम-ऋग्यजुषः प्रिये ॥ ७७ ॥
शाखावरण भिन्नस्य स्मृत्यन्तरगतस्य तु ।
अथ वैशेषशास्त्रस्य शैवसिद्धान्तरूपिणः ॥ ७८ ॥
शिवरुद्रभेदसंज्ञः क्रमो वाच्यो विपश्चिता ।

विशेषतरशास्त्रस्य चतुःपञ्चगतस्य तु ॥ ७९ ॥

स्रोतस्त्रयनिबद्धस्य चतुर्भेदगतस्य तु ।

अन्तर्गतं हि तत् सूत्रं ग्रन्थान्तरमथापि वा ॥ ८० ॥

प्रारम्भे ते तु चोद्यादौ पीठभेदं भवेत् ततः ।

श्रीदेव्युवाच ।

प्रारम्भे योऽयमुक्तस्तु शास्त्राणां पृषवाहनः ॥ ८१ ॥

स सम्वन्धादृते नाथ प्रतिपत्तिकरः कथम् ।

कस्मात् तदागतं शास्त्रं केन चात्रावतारितम् ॥ ८२ ॥

अष्टकोस्य महेशान सृष्टं वा केन हेतुना ।

श्रीभैरव उवाच ।

अनादिमति संसारे हेतुरत्र महेश्वरः ॥ ८३ ॥

स स्वभावेन जन्तूनामनुग्रहपरायणः ।

जन्तवश्चाप्यनुग्राह्याः स्वदोषवशवर्त्तिनः ॥ ८४ ॥

तेषामनुग्रहोपायं वेत्त्यसौ सर्वविद्यया ।

सद्योपायो नु मुक्तोऽत्र तेन शास्त्रात्मकात् प्रिये ॥ ८५ ॥

ग्रस्तस्याभिरुजा यद्वद् भिषगौषधयोगतः ।

निर्वाणं कुरुते तद्वद् दीपः शास्त्रार्थदर्शनात् ॥ ८६ ॥

निपातः शिववीर्यस्य मूलं वै मुक्तियोनिषु ।

संवित्तोपदिशेच्चास्त्रं तदा दीक्षा प्रवर्तते ॥ ८७ ॥

Sampath_eBooks

निमित्तमुभयाख्यन्तु भूक्तिमुक्तिविलक्षणम् ।

तदुपेयस्तथा योऽपि सम्बन्धस्तस्य शास्त्रजः ॥ ८८ ॥

सम्बन्धश्च निमित्तञ्च वीजाङ्कुरव्यवस्थया ।

संस्थितं यो विजानाति व्याकर्तासौ विशारदः ॥ ८९ ॥

सम्बन्धो हि निमित्ताय सम्बन्धाय प्रयोजनम् ।

विहितं सर्वविज्ञानसूरिणा ज्ञानमूर्तिना ॥ ९० ॥

यत्तदत्यन्तगम्भीरमचलं सर्वतोमुखम् ।

स्वभावस्थमकाङ्क्ष्यैव तत्प्रवृत्तिमुपागतम् ॥ ९१ ॥

प्रवृत्त्यापूरणक्षुब्धं व प्राक्रुध्वं प्रसुप्तं योनिकुण्डलम् ।

तद्दजुत्वमुयायातमव्यक्तं स्वरतां ययौ ॥ ९२ ॥

सद्दशापूरितो देवः शब्दराशि सदाशिवः ।

सदारूपशिवत्वन्तु न हि भोगपतेर्यतः ॥ ९३ ॥

अतः सादाशिवः प्रोक्तः सदोर्ध्वे स्थानभेदतः ।

तेनार्थ दर्शनाच्चापि शास्त्रजालमनन्तकम् ॥ ९४ ॥

श्रोतृवक्तृविभेदेन तच्च विश्वेशमर्पितम् ।

सम्बन्धोऽयमभिन्नोऽपि स्थानभेदाद् विभेद्यते ॥ ९५ ॥

महच्चानन्तराख्यं च तथावान्तरमेव च ।

दिव्यं मिश्रमदिव्यञ्च षोढा सम्बन्धलक्षणम् ॥ ९६ ॥

चिदचिचक्तिसम्बन्धसर्गानुक्तो दृगात्मभिः ।

क्रियाधर्मप्रदेशात्मानंतराख्यः प्रकीर्तितः ॥ ९७ ॥

सदाशिवस्य वीराणां समादेशविवर्तिणाम् ।

बोध्यबोधकसम्बन्धः प्रोच्यते चान्तररात्मवान् ॥ ९८ ॥

सदाशिवपदावस्थो बोधकाद्यो मदन्तिकः ।

सम्बन्धो दिव्यसंज्ञस्तु मिश्रश्च मुनिदैविकः ॥ ९९ ॥

आदिव्यो मुनिमानुष्यसम्बन्धोऽयं गुरुक्रमात् ।

योऽसौ परापरः प्रोक्तो देवदेवः सदाशिवः ॥ १०० ॥

योगात्मानं तु वीर्यन्तु पञ्चमन्त्रमहातनुः ।

व्यक्ताव्यक्तमयं तस्य व्यक्तानां तु चतुष्टयम् ॥ १०१ ॥

ज्ञात ज्ञेयमयं चास्य व्यक्ताव्यक्तं च पञ्चमम् ।

पञ्चवक्रस्त्वसौ वीरः प्रसन्नस्रोतसां स्थितः ॥ १०२ ॥

मन्त्रपीठाधिपः सो हि चतुर्वक्रो हरोपरः ।

दिव्यपीठं प्रति प्रोक्तं मुद्रामण्डलपीठयोः ॥ १०३ ॥

उभयाख्योऽप्यसौ स्वामी क्रीडत्यमितविक्रमः ।

पञ्चभ्यस्तस्य चक्रेभ्यः शुद्धविद्याननो नृप ॥ १०४ ॥

बिन्दुनादमयः शुद्धः शास्त्रोद्धारो विनिर्गतः ।

चन्दोभिनमितैर्दिव्यैरनुष्टुबाद्यैरनिन्दितैः ॥ १०५ ॥

संस्थानमीशमन्त्रस्य तज्ज्ञशास्त्रस्य तच्च हि ।

न देवतार्थं चन्दोभिर्विद्यते तत्पदेऽमले ॥ १०६ ॥

Sampath_eBooks

उपचाराय बोधस्य तस्य मंत्रत्वमीरितम्।

चतुर्णां कारणं चैव कारणानां यशस्विनि॥ १०७॥

परा लीला समाख्याता नेतुर्भोगमयस्य च व सा।

यस्तांबुध्वा विजानाति कारणानाञ्चतुष्टयम्॥ १०८॥

स कारणगुणः प्राप्तो महाकारुणिको भवेत्।

चन्दस्यानुष्टभे घोरो वामः सद्यः प्रतिष्ठितः॥ १०९॥

गायत्रीच्चन्दसि नरः सद्योनुष्टुब्पदाश्रितः।

ईशानो रूपगुह्यानां नामजातिक्रमेण तु॥ ११०॥

देवता ब्रह्मरूपास्तु ऋगाद्यास्त्वर्थमुच्यते।

स्वविभुः शोरिविमलस्तुम्बुरुर्गुह्यकेश्वरः॥ १११॥

ऋग्यजुःसामसाथर्वञ्चतुर्णामन्तमेव च ।

देवतास्त्वर्थमेतद्धि चन्दः पूर्वप्रकाशितम्॥ ११२॥

यद्यप्यसौ सदेशान विक्रमात्मातिवीर्यवान्।

कलानिकायसम्बन्धात् तथापि हि सविग्रही॥ ११३॥

विग्रहे च त्रिलिङ्गस्य स्थितिः केन नधार्यते।

आतिवाहिकलिङ्गं हि यत् प्राणस्य वशात् स्थितम्॥ ११४॥

गतिमगतिं प्रकुरुते शुद्धशुद्धतरौ ।

तस्य सव्यापसव्येन स्त्रोतसा च रतः प्रिये॥ ११५॥

अग्नीं देवेन यज्ज्ञानमुक्तं तद् विस्तरात्मकम् ।

चतुःकरणसंयोगात् शृतः श्रोतरि वक्तरि ॥ ११६ ॥

सर्वशास्त्रेषु तन्वङ्गि व्याख्या ममेष्टारिन्दम् ।

मनोऽहङ्कारबुद्धिर्वाग्वक्तुः करणतुर्यकम् ॥ ११७ ॥

तदेव स्रोतयुक्तं तु श्रोतुर्वाचा विवर्जितः ।

स्रोतसोरवतारोऽयं वामदक्षिणयोस्तव ॥ ११८ ॥

मिश्रत्वावनयोरुक्तो ग्रामलाख्यश्च गीयते ।

मन्त्रमूर्तिरघोराख्यवक्राद् वाध्येति भास्वरा ॥ ११९ ॥

अप्रसन्नातिदुर्धर्षा दक्षिणार्धात्मिका तु सा ।

वामवामेश्वरोद्गीर्णा वामवामा विलासगा ॥ १२० ॥

प्रारम्भे विषुवाख्यस्य शैवं शैवे च यामलम् ।

तद्वैरोमे च निर्वाण पदनिर्लोमसूत्रकम् ॥ १२१ ॥

वामदक्षिणमिश्रेषु भिन्नं पीठचतुष्टयम् ।

व्यपदिश्यते मुखवत् शाखा शाखान्तरे स्थितम् ॥ १२२ ॥

इति भैरवस्रोतसि विद्यापीठे शिचेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां

नियताह्निकाचारषोढासम्बन्धावतारव्यावर्णनं नाम पञ्चत्रिंशतिः

पटलः ॥ ३५ ॥

षड्तृंशतिः पटलः ।

श्रीभैरव उवाच ।

Sampath_eBooks

मन्त्रविद्या सुहर्म्याणां सङ्घस्तोमकदम्बकम् ।
व्रातवृन्दं च निकरसमूहः संहतिर्बलम् ॥ १ ॥
विच्चिन्दोमण्डलं पीठं पर्यायैरुपशब्दितम् ।
पुल्लिङ्गवाचकाः शब्दाः पुंवाच्ये मुख्यलक्षणे ॥ २ ॥
तेषां पीठं महादेवि मन्त्रपीठं हि तत् स्मृतम् ।
स्त्रीलिङ्गवाचकास्त्रयाख्ये चाद्येऽर्घे संप्रतिष्ठिता ॥ ३ ॥
तेषां सङ्घस्मृतिस्तद्धि विद्यापीठं महेश्वरि ।
त्रिस्वरूपा स्मृता मुद्रा मनोवाक्कायसम्भवा ॥ ४ ॥
प्रधानासनवेद्योक्ता ह्युपसर्जनसंस्थिता ः ।
तासां संहस्मृतं घोरं मुद्रापीठं महेश्वरि ॥ ५ ॥
त्रिपीठं यत्र वा हूय यज्यते फलकाङ्क्षिभिः ।
मण्डलं मलमित्युक्तं मलं पर्याप्तिरुच्यते ॥ ६ ॥
विद्यादिमन्दभोगानां मलं तत् कुरुते यतः ।
अतो मण्डलमुद्दिष्टं तेषां वृन्दशतात्मकम् ॥ ७ ॥
तत् पीठं मण्डलाख्यन्तु यष्टमर्घप्रतिष्ठया ।
यत्र तत्रानुविद्यानां गुणत्वं संप्रयुज्यते ॥ ८ ॥
यत् तद्धि परमं तेजो मन्त्रपीठं हि तत् स्मृतम् ।
तस्य भोक्तृस्वरूपस्य विद्याख्यं भोग्य इष्यते ॥ ९ ॥
उभयस्यापि मुद्राख्यं मण्डलं त्रिष्वपि स्थितम् ।

भूयो भेदं त्रिपीठन्तु मण्डलं चाप्यभेदगम्॥ १० ॥

सप्तकोटिसहस्राणि दशकोटिशतानि च।

मन्त्राणां दक्षिणाद् वक्राद् अघोरान्निर्गतानि तु॥ ११ ॥

अन्यद् भेदप्रभेदेन भैरवाश्च यशस्विनि।

सहस्रैर्द्वादशैर्मन्त्रयं मन्त्रपीठमुपागतम्॥ १२ ॥

स्वच्चन्दभैरवं चण्डं क्रोधमुन्मत्तभैरवम्।

ग्रन्थ्यन्तराणि चत्वारि मन्त्रपीठे स्थितानि च॥ १३ ॥

सर्वाणि शतसार्धानि शताष्टादशकानि तु।

मन्त्रपीठं समाख्यातमत ऊर्ध्वं न विद्यते॥ १४ ॥

कोटित्रिंशच्च संख्यानमेकलक्षैकषष्टि च।

सहस्राणि च पञ्चाशशतिकानि ग्रहप्रिये ॥ १५ ॥

ग्रन्थान्तराण्यसंख्यानि विद्यापीठे स्थितानि तु।

पञ्चाशद्दशसिद्धानि मूलमन्त्राणि सुन्दरि॥ १६ ॥

विद्यापीठप्रसिद्धानि नामभिः कथयामि ते।

सर्ववीरसमायोगं सिद्धयोगेश्वरीमतम् ॥ १७ ॥

पञ्चामृतं च विश्वाद्यं योगिनी जालशम्वरम्।

विद्याभेदं शिरश्चेदं महासंमोहनं तथा॥ १८ ॥

नयोत्तरं महारौद्रं रुद्रयामलमेव च।

ब्रह्मयामलसंज्ञञ्च तथान्यं विष्णुयामलम्॥ १९ ॥

Sampath_eBooks

दशतुर्यं स्मृतं स्कान्दमर्मं पञ्चदशं मतम्।

रुद्रभेदो हरिस्कन्दगौतमीयामलान्वितः ॥ २० ॥

पञ्चैतानि विभिद्यन्ते भेदैरष्टादशैः प्रिये।

मातृकृत्यां कुलाह्वाने सप्तषट्पञ्चभेदतः॥ २१ ॥

योगभोगोपभोगेन वेदितव्यानि सूरिभिः।

ब्रह्माणीमादितः कृत्वा यत्पूर्वाया यजुर्भवेत् ॥ २२ ॥

तद् यामलं तदाख्यं स्यात् सप्तधा मातृयामलम्।

कृत्याः प्रोच्यन्ति योगिन्यो जपाद्याः षट्कमाश्रिताः॥ २३ ॥

यामलेन विभागेन षट्कृत्या यामलानि तु।

यथा सप्तसु तद्वच्च वाराद्यन्तमनुक्रमात्॥ २४ ॥

पञ्चस्वपि महादेवि पञ्चधा मातृयामलम्।

दाम्पत्ययोगतः ऊजायामलेति निगद्यते॥ २५ ॥

अनेन क्रमयोगेन यामलानि दशाष्ट च।

ग्रन्थान्तरगतान्यत्र सूत्रमध्यगतानि तु॥ २६ ॥

सुविस्तरमिदं देवि विद्यापीठं स्वभावतः।

विद्यानां योगिनीनाञ्च मनानन्द्यात् सुरार्चिते॥ २७ ॥

विद्यापीठं स्मृतं देवि मुद्रापीठमतः परम्।

मुद्रापीठं त्रिधा भिन्नं सहस्राष्टादशान्वितम्॥ २८ ॥

मन्त्राणां संख्यया देवि शताष्टोत्तरकल्पगम्।

हृद्भेदो मातृभेदश्च तथान्यं कुब्जिकामतम्॥ २९॥

मुद्रापीठन्तु सूत्राणि त्रीणि भिन्नान्यनेकधा।

मण्डलानां शतेनैव मुद्रितं मण्डलात्मकम्॥ ३०॥

पीठभेदविभिन्नन्तु मूलसूत्रं प्रतिष्ठितम्।

न च त्रिकंटकाये तु मण्डलाख्ये व्यवस्थिताः॥ ३१॥

तेषां दशसहस्राणि तदूर्ध्वन्तु न विद्यते।

एवमेतानि तन्त्राणि पीठतुर्यगतानि तु॥ ३२॥

एतेष्वन्तर्गतं सम्यक् ते च देवि निगद्यते।

अष्टाष्टकविभागेन यद्यस्मिन् संस्थितं प्रिये॥ ३३॥

मन्त्रपीठं द्विधारूपं भैरवैरष्टभिः कृतम्।

तेषां नामानि वक्ष्यामि सदेशोत्सङ्गवर्त्तिनाम्॥ ३४॥

स्वचन्दोन्मत्तनामा च असिताङ्गोरुरुस्तथा।

चण्डक्रोधोऽथ झङ्कार कपालीशोऽष्टमो मतः॥ ३५॥

स्वच्चन्दभैरवं सूत्रं द्विस्कन्धमिव आगतम्।

असिताङ्गेन भेदेन स्वच्चन्देन च भैरवि॥ ३६॥

स्वच्चन्दो यः स्मृतो भेदः सविभेदोष्टकं गतः।

स्वच्चन्दभैरवाज्ञातः कङ्कालदिशितान्तिकैः ॥ ३७॥

अष्टभिर्भैरवैस्तेभ्यस्ततोऽनन्तेन वेदितम्।

शुद्धाद्ध्वततस्ततस्तस्माद्द् तस्ततस्तस्माद्द् योगशक्तिसमीरणात्॥

३८ ॥

श्रीकण्ठलकुलीशाभ्यां धृतं योगसमीक्षया ।

सिननिर्जलसन्दीशमहाकालीविकादिभिः ॥ ३९ ॥

नीलरुद्रमुखोद्गारविज्ञातं विप्लुषोमतम् ।

गौतमादिमुनीन्द्रेभ्यो वेदविद्भ्यो यथास्थितम् ॥ ४० ॥

विस्तृतं ज्ञानमेतद्धि प्रोक्तं लकुलपाणिना ।

तन्मध्येऽपि स्वशिष्याय मुसलीन्द्राय धीमते ॥ ४१ ॥

संहृत्य सारभूतं तु निजगाद स एव तु ।

यद्येवं संश्रुतं तन्त्रं यच्च येनावधारितम् ॥ ४२ ॥

तस्य तस्य हि नाम्ना तत् तत् तन्त्रं परिगीयते ।

असिताङ्गात्मको भेदो यो द्वितीयोदितः ॥ ४३ ॥

असितादिकपालान्तवरेभ्यस्तेन सम्स्मृतः ।

तैरप्यनन्तवीर्येभ्यः स्वाभासिभ्यः प्रकाशितम् ॥ ४४ ॥

विभोरधस्तात् सप्तेभ्य इन्दुभृद्भ्यो मदन्तिकाम् ।

कल्पानुकल्पलक्षैश्च प्रवाह प्रविसर्पितः ॥ ४५ ॥

द्विर्बर्द्धशतिकाद्यस्तु द्विसाहस्त्रायुतान्तिकः ।

असिताङ्गमहानादमेकपादं महोदयम् ॥ ४६ ॥

तथा बिन्दुकपालञ्च नादेन्दुमपि च शेखरम् ।

चर्यामृतं कलाजालं कालकूटं महामृतम् ॥ ४७ ॥

महाघङ्घलसंज्ञञ्च तथा भैरवघङ्घलम्।

महानिर्वाणयोगञ्च योगनिर्वाणदं परम्॥ ४८॥

विचित्रभैरवं भीमं महावीजं परं पदम्।

एवं विचित्रशाखाभिर्भिन्नं तन्त्रान्तरैः प्रिये॥ ४९॥

असिताङ्गोन्मत्तकं सूत्रं किञ्चिन्मात्रं तवोदितम्।

साक्षात्सिताङ्गसूत्रस्य बन्धभेदादमी स्मृताः॥ ५०॥

नकङ्कालादिवीराणां तेषां ख्याता यतः स्थिताः।

स्वच्छन्दाद्यष्टकं ह्येतत् कथितं तव सुव्रते॥ ५१॥

लेशालाचण्डसंज्ञं तु वच्मि वीरेश्वरार्चिते।

इति भैरवश्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां स्वच्छन्दसूत्रविनिर्णयः षट्त्रिंशतिः पटलः॥ ३६॥

सप्ततृंशतिः पटलः॥

श्रीभैरव उवाच।

अथातश्च सूत्रन्तु द्विस्कन्धं तदपि स्मृतम्।

चण्डेन रुरुणा चापि द्वाभ्यां तदवधारितम्॥ १॥

विकरालसिंहकेशश्च पूर्वं तेभ्यः प्रकाशितम्।

अष्टभ्यश्चण्डनाथेन वीरेभ्यश्चण्डविक्रम्॥ २॥

तैरप्यतेकभेदैश्च सारुप्यस्थानवासिनाम्।

प्रकाशितं महाज्ञानमिच्चया यमनन्तकम्॥ ३॥

सिंहकेसरसटादिमनोहरविरोमिनाम्।

करिणा कीर्तितं तद्धि तन्मध्येन मनोहरम् ॥ ४॥

विष्णवे सारवत् तन्त्रं निजगाद गणाम्बिके।

विष्णुना कौसिकस्योक्ते श्रीवत्सस्याह कौशिकः॥ ५॥

श्रीवत्सः श्रीविनाशाय श्रीगर्भाय स चोक्तवान्।

विष्णोराश्रववासोश्च श्रीगर्भोऽवददात्मगम्॥ ६॥

शौरेश्चपि सुविस्तीर्णमवदद् विष्णवे श्रवाः ।

शौरेर्विवाददण्डोक्तं निध्वास्वामिनि विस्तरात्॥ ७॥

निध्वास्वामी सुभद्राय सुभद्रो मुञ्चकेशिने ।

अधोक्षजाय मुञ्जाख्यो मेधसे चाप्यधोक्षजः॥ ८॥

चण्डभैरवसूत्रस्य कल्पद्वादशकं प्रिये।

एतेषामभिधातैस्तु जगत्यत्र विसर्पिते॥ ९॥

अधस्त्यः शुद्धमार्गे तु विग्रहेशेन धीमता।

अधस्त्यगुरुर्वृडाय प्रदत्तं भूरिभोगदम्॥ १०॥

तेभ्यस्तुषुः शिवो ज्ञानं तेभ्यः श्रीकण्ठसूरिण ।

इच्चया तेन देवेन मयि संक्रामितं प्रिये व प्रि ॥ ११॥

मयापि हि त्वदादिभ्यःसुरेभ्यः प्रतिपादितम्।

तेषां मध्ये महेन्द्राणां योजितं शाकटायिने। १२॥

पिप्पलादाय सोऽप्यहसङ्कीर्णः शाकटायनः ।

ब्रूयादुद्दालकेशाय पिप्पलादो महामुनिः ॥ १३ ॥

उद्दालकोऽवदच्चैतन्नाचिकेताय सूनवे ।

नाचिकेतेन मर्त्येऽस्मिञ्चण्डं समवतारिकम् ॥ १४ ॥

विचित्राभिः सशाखाभिर्व्याकीर्णममलायतम् ।

दण्डाख्यं प्रथमं तन्त्रं द्वितीयं वीरसंज्ञकम् ॥ १५ ॥

महापीठं सुपीठञ्च चण्डपीठमथापरम् ।

सुश्रावणं पुराकल्पं चण्डोग्रं चण्डमण्दलम् ॥ १६ ॥

चण्डासिधारं भूतोग्रं भूतोग्रं भूतनिग्रहम् ।

विजयञ्च त्रिपादञ्च कर्णामोघार्द्धलोचनम् ॥ १७ ॥

पातालविजयं चैव त्रैलोक्यविजयं परम् ।

महाडामरसंज्ञश्च तथान्यं घोरडामरम् ॥ १८ ॥

एकविंशतितन्त्राणि निजस्थाश्चण्डभैरवात् ।

निर्गतानि वरारोहे कथितानि समासतः ॥ १९ ॥

एतेष्वन्तर्गताः कल्पा मुनिमन्त्रविधानगाः ।

श्रोतृवक्तृविभेदेन तेषां संख्या न विद्यते ॥ २० ॥

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्त्रे प्रथमषट्के श्रीकालसङ्कर्ष्ण्यां भैरवसूत्रनिर्णय सप्तत्रिंशतिः पटलः ॥ ३७ ॥

Sampath_eBooks

अष्टत्रिंशतिः पटलः।

श्रीभैरव उवाच।

अथातः क्रोधसूत्रस्य विकासं वच्मि तत्वतः।

परापरेण भेदेन महीतलमुपागतम्॥ १॥

स्कन्दद्वयगतं तद्धि क्रोधशङ्कारभेदतः ।

क्रोधाख्यः प्रथमो भेदः सभेदैरष्टभिर्गतः॥ २॥

कान्ति भैरवपूर्वस्तु शिखाशेहेखररोधितः ।

सङ्घातभैरवाख्यो यः सोऽपि भिन्नोऽष्टभेदतः॥ ३॥

शशाङ्कशेखराद्यैस्तु विरूपाक्षावसानिकैः।

धारकाः क्रोधतन्त्रस्य शतशाखो विसर्पितः॥ ४॥

स कान्तभैरवः प्राह रुद्रोङ्कारमहेशयोः।

संहितान्तु महाक्रोधान्निर्गतं क्रोधभैरवात्॥ ५॥

अनिलज्ञानिनो दद्यात् क्रोधात् स्वां कमलेश्वरः।

भीमो ज्ञानभृते दद्यात् तथा चांशुमते प्रिये॥ ६॥

क्रोधोग्रां संहितामुर्वीं शतकोटिप्रविस्तराम्।

चन्द्रापीडाय विमलां दद्याद् विमलभैरवः॥ ७॥

सुरापीडाय क्रोधेशो वेदिताख्यो ययच्च च।

दृष्टे निर्मलदेवोऽपि दद्यात् क्रोधमहोदयात्॥ ८॥

तारापीडाय तन्वङ्गि वितानां भिन्नतारकाम्।

भैरवः शेखरो नाम प्रदद्यात् क्रोधमालिनीम् ॥ ९ ॥

मुद्रागणसमाकीर्णाममलेशाय संहिताम् ।

ससङ्ग्राम महावीरशिखरास्या स्वभूषणे ॥ १०

तेऽप्यधोमार्गसंस्थेभ्यः स्वशिष्येभ्यो मितात्मनः ।

प्रायच्चन्त महाज्ञानं सदेशाज्ञां जिताज्ञया ॥ ११ ॥

असितेर्ध्वर्निर्गैस्तेभ्यो नानाभुवनवासिभिः ।

अवतार्यमिदं तन्त्रं कल्पकोटिशताकुलम् ॥ १२ ॥

मायापिण्डमलेशानज्ञानाक्रोधानलः प्रिये ।

संहितालक्षयुग्मन्तु पादोनं परमेश्वरि ॥ १३ ॥

मत्तः सा लक्षमेकन्तु संभिन्नायागजोढया ।

नन्दिना च महावीरो द्विसहस्रायुतेन च ॥ १४ ॥

अमरेभ्यो मया दत्ता त्वया मत्तोऽपि सुव्रते ।

नन्दिना च महादेवि दत्तात्रेयाय धीमते ॥ १५ ॥

तदा वै बालखिल्येभ्यः सरहस्यमुदाहृता ।

यत्रोक्ता नन्दिनाथेन सा त्वष्टादशभिः शतैः ॥ १६ ॥

सप्तादशभिरुदिष्टा दत्तात्रेयेण धीमता ।

तृतीयेऽप्यष्टके वीरो दद्याच्चीतांशुशेखरः ॥ १७ ॥

विशालाजाय झङ्कारं नानाझङ्कारमालिनीम् ।

क्रूराभिरवभेदाश्च कन्दर्पेणावधारिताः ॥ १८ ॥

Sampath_eBooks

संहिताकल्पसंकीर्णे नाम्ना क्रोधकरंकिणी ।

शशिभूषणाय वै बिन्दुविजयामदत् स्फुटम् ॥ १९ ॥

कलिकाह्लाददेवेन बिम्बकोटीरसंज्ञिने ।

सामन्तः क्रकचात् प्रापत् संहितां योगमालिनीम् ॥ २० ॥

क्रोधसंवर्त्तकामाच्च् शशिकान्तिर्महेश्वरः ।

महासामन्तदेवाय पुरं मन्त्रसमाकुलाम् ॥ २१ ॥

यथेच्चितो महानादां ताराय च गुणालयाम्

विषमाक्षो धाम नीलां महातारापतेः स्फुटम् ॥ २२ ॥

तारापतिः सुताराय पवनाय महात्मने ।

तामेव धामलीलाय अयुतैः पञ्चभिः प्रिये ॥ २३ ॥

लक्षेण च मनोजन्म जितलावण्यकेऽवदत् ।

विशुद्धैर्योगिभिर्वृत्तास्तेभ्यः शुद्धैर्महात्मभिः ॥ २४ ॥

यावद्धाटकनाथन्तु तस्मात् कालानलेन तु ।

क्रोधतन्त्रामृतं देवि ज्ञानवीचीं यथावहा ॥ २५ ॥

रक्षोसुरभुजङ्गानां त्रिषष्ट्या वा दधामसुम् ।

विसर्पितमिदं तन्त्रं प्रदीप्तं भैरवेच्चया ॥ २६ ॥

पाशबन्धनजालन्तु यद् विनाश्यं विवर्तते ।

ततः क्रुद्धमिवाहन्ति क्रोधतन्त्रमतं स्मृतम् ॥ २७ ॥

मोक्षावरोधकं यद्यत् तस्य तस्य हि वस्तुतः ।

Sampath_eBooks

निग्रहैकपरं येन तेन क्रोधमुदाहृतम् ॥ २८ ॥

क्रोधतन्त्रमिह संहिताशतैरागमं जगति शङ्करेच्छया ।

वस्तुसारमलिखं तवोदितं वेत्तिकोह्यवनताङ्कित तत्त्वः ॥ २९ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्चेदेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्त्रे प्रथमषट्के श्रीकालसंकंर्षण्यां क्रोधभैरवसूत्रम् अष्टात्रिंशति पटलः ॥ ३८ ॥

उनचत्वारिंशतिः पटलः ।

श्रीभैरव उवाच ।

अथातोन्मत्तसूत्रस्य ये भेदा भेदलक्षणाः ।

वक्ष्याम्यध्यासतस्तांस्तु निर्णीतो भैरवेच्छया ॥ १ ॥

सदाशिवमगाम्भोधादुन्मत्ते जलबिन्दुवत् ।

महाज्ञानामृतो योऽसौ विश्रमित्वा विसर्पितः ॥ २ ॥

कपालीशान्तिके तद्धि द्विरूपोन्मत्तपद्धतिः ।

आदिभेदोऽष्टधाभिन्नो विषमाक्षादिभिः प्रिये ॥ ३ ॥

महाफेत्कारनिधनैस्तेभ्यः स्वानन्ततां गतः ।

द्वितीयोऽप्यष्टधा भिन्नोऽनन्तभिरिव पूजकः ॥ ४ ॥

चण्डोग्रभैरवान्तैस्तु नानाकल्पगणाकुलः ।

येऽमी सञ्चोदिता : भेदादशेषा भूधरात्मजे ॥ ५ ॥

तेषां नामानि वक्ष्यामि तन्त्रसिद्धानि सुन्दरि ।

Sampath_eBooks

अनन्तानन्तविजया भैरवाख्या च या परा ॥ ६ ॥

वीणा शिखाचलोद्रीशा मार्तण्डा संहिता परा ।

चण्डोग्रा च कपालीशात् संहिताष्टौ विनिर्गताः ॥ ७ ॥

विशाललोचनाद्यैस्तु तारापतिपुरस्सरैः ।

अवतारिता महादेवि अनन्ताद्या यथाक्रमम् ॥ ८ ॥

मार्तण्डापि सुतारेण चण्डोग्रापवने तव ।

अमृता विनिर्याता अनन्ता ः यत् सुरेश्वरि ॥ ९ ॥

प्रमोदानन्दविजया शिखाटोपि विसर्पिता ः ।

संहितानन्दगम्भीरा जीवानन्दा शिखोत्तरा ॥ १० ॥

सुनन्दा नाचला तच्चामृतानन्दा तदन्ततः ।

मन्थरा विजयानन्दा सुरानन्दा तृतीयका ॥ ११ ॥

मार्तण्डतो विनिर्यातास्तिस्रो विस्तीर्णसंहिताः ।

सदानन्ताश्रितानन्दा मङ्गलानन्दमङ्गला ॥ १२ ॥

चतस्रः संहिता ह्येताश्चण्डोग्रातो विनिर्गताः ।

लेलिहाना महाज्वाला संहिता चाण्डमालिनी ॥ १३ ॥

करङ्किणी कराला च कर्णमूला कलेवरा ।

महाफेत्कारबीजा च चोदितात्राष्टमी मता ॥ १४ ॥

असमाक्षाद्युदासीना भैरवाभ्यो विनिर्गताः ।

अमृतामृतपूर्वैस्तु वृत्ता योगेश्वरैर्वरैः ॥ १५ ॥

एभ्योऽप्यत्रावनिर्याता नित्यानित्यादिनामभिः ।

गायन्ति शुद्धमार्गस्थैःस्वेभ्योऽप्यन्या विनिर्गताः ॥ १६ ॥

विघ्नभैरवपूर्वैस्तु भैरवैर्या श्रुता प्रिये ।

शिवपञ्चकेन तेभ्यस्तु तन्त्रमुन्मत्तकं श्रुतम् ॥ १७ ॥

नित्यानित्या ह्यनित्या च नित्या चैव तृतीयका ।

गुणक्रियासमाकीर्णा निर्याता लेलिहानतः ॥ १८ ॥

उमादेहा नीलकण्ठा योगनिद्रालुका परा ।

महाज्वालाविनिर्याता मन्त्रादाकल्पसङ्कुलान् ॥ १९ ॥

पूजोदया कुरङ्गाक्षी पद्माक्षी चित्रकन्धरा ।

तिस्रोऽत्र मालिनीतन्त्रान्निर्गताः संहिताः प्रिये ॥ २० ॥

द्वे च तेऽत्र करङ्किण्या संहितेऽत्र प्रविस्तरे ।

विघ्नच्युतस्य निर्विघ्ने कथिते तव सुव्रते ॥ २१ ॥

विघ्नहा ध्वस्तविघ्ना च करालातो विनिर्गते ।

विघ्ना सुदीप्तभावा च निष्क्रान्ता कर्णमूलतः ॥ २२ ॥

कडेचरा तत् समया क्षुद्रा चापि विनिर्गता ः ।

विमला च शिवा चैव फेत्कारातः परिच्युते ॥ २३ ॥

उन्मत्तभैरवे तन्त्रे विंशदेकोणसंहिताः ।

कथिताः कल्पमाहात्म्यकल्पसारसमाकुलाः ॥ २४ ॥

शिवपञ्चकादिदेवेभ्यः शास्त्रविद्भ्यो यथास्थितम् ।

Sampath_eBooks

नायातं शुद्धविद्यातस्तन्त्रमुत्तरभैरवम्॥ २५॥

शतत्रयं सपञ्चाशदुक्तं सूक्ष्मेण धीमता।

ध्यानाहाराय सोऽप्याह प्रपञ्चाय महात्मने॥ २६॥

प्रपञ्चः रु प्रपञ्च कुण्डसंज्ञाय कुण्डो भद्रशिखेशयोः।

भीरुभ्यो न मया प्राप्तं पञ्चश्लोकमिदं प्रिये॥ २७॥

ततो दाक्षायणी काली यदा दृष्टासि त्वन्मयी।

मन्मथोन्मादवातेन तदोन्मत्तोस्मि शैलजे॥ २८॥

उन्मत्तभैरवं बीजं संसृज्योन्मत्तभैरवः।

जातोऽहं घोररूपस्तु दृष्टश्चापि तदा त्वया॥ २९॥

ततो वृत्ते विवाहे तु जायया पृच्चितं प्रिये।

किं तज्ज्ञानं महादेवि यत्प्रभावं प्रभीषणम्॥ ३०॥

वृत्तं मे तत्महाघोरं रूपमुन्मत्तभैरवम्।

ततो मया सुतुष्टेन त्वत्प्रियस्य मम प्रिये॥ ३१॥

प्रोक्तं द्वादशसाहस्रं जायायाः सुरसुन्दरि।

ततस्तत्पञ्चभिः कल्पैर्भूर्यण्डान्तःप्रसर्पितम्॥ ३२॥

षट्साहस्रं तदर्धञ्च सहस्राष्टं शतं परम्।

अद्ध्युष्टकशतं चान्यं पञ्चश्लोकं तथा परम्॥ ३३॥

इत्येतानि च तन्त्राणि भैरवाष्टाधिकानि तु।

प्राप्तानि मानुषैर्येभ्यस्तान् वक्ष्याम्यवतारकान्॥ ३४॥

दुर्व्यासाः सनको जिष्णुः कपिलः काश्यपः कुरुः ।

संवर्तः शङ्खपालश्च भैरवाष्टावतारकाः ॥ ३५ ॥

अतिमहति विशाले मन्त्रपीठे च रौद्रे ।

शिवविभवनितान्ते कः सहस्रांशुमात्रम् ॥ ३६ ॥

तनुकरणकृता वै ज्ञानभाङ्गांगा च वक्तुम् ।

सुमतिरपि सुसूरिं शक्त्यास्मद् विधोऽपि ॥ ३७ ॥

इति भैरवस्रोतसि विद्यापीठे शिरेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां मन्त्रपीठविनिर्णयो

एकोनचत्वारिंशतिः पटलः ॥ ३९ ॥

चत्वारिंशतिः पटलः ॥

श्रीभैरव उवाच ।

अथातो मन्त्रविद्यानां पीठसूत्रप्रभेदतः ।

वच्मि संक्षेपतो देवि श्रोतृवक्तृक्रमेण तु ॥ १ ॥

सर्ववीरं त्रिशूलञ्च श्रीचक्रं विश्वपूर्वकम् ।

योगिनीजालसंज्ञञ्च विद्याभेदं शिरोहृतम् ॥ २ ॥

एतानि शक्तितन्त्राणि संन्ति शूलालयानि तु ।

सव्यस्रोतसि सिद्धानि शिरश्छिद्रं भयात्मकम् ॥ ३ ॥

नयोत्तरं महारौद्रं महासम्मोहनं तथा ।

त्रिकमेतन्महादेवि वामस्रोतसि निर्गतम् ॥ ४ ॥

Sampath_eBooks

विभिन्नं कोटिभेदेन शाखाकलिलविस्तरम् ।

याम्ये स्रोतसि सूत्राणि पञ्चकं वैमलानि तु ॥ ५ ॥

सन्ति विस्तीर्णशाखाभिः कथ्यन्ते तानि नामभिः ।

रौद्रोमं वैष्णवं चापि चतुर्थं स्कन्दयामलम् ॥ ६ ॥

अक्रव्याचारमेतद्धि चतुष्कमपि तत् स्मृतम् ।

ब्रह्मयामलसंज्ञञ्च पञ्चमं तत् पितुर्मतम् ॥ ७ ॥

द्व्यक्षरं मत्तसंज्ञञ्च क्रव्यादोच्चुष्मनिश्चयम् ।

निराचारं महाचारं सर्वतोभद्रसंज्ञकम् ॥ ८ ॥

द्विकं सर्वात्मकं चैव महादक्षिणमेव च ।

ब्रह्मयामलमेतद्धि सूत्रैर्भिन्नं तु सप्तमिः ॥ ९ ॥

सप्तमं च द्विधा भिन्नमतो ज्ञेयं मताष्टकम् ।

तेषां नामानि वक्ष्यामि पुरतः पर्वतात्मजे ॥ १० ॥

एवमेतानि सूत्राणि विद्यापीठे महेश्वरि ।

दशपञ्च च सिद्धानि मूलसूत्राणि सर्वतः ॥ ११ ॥

तेजोनिधेरनुध्यातान्महादेवेन धीमता ।

सर्ववीरं महातन्त्रमवतारितमद्भुतम् ॥ १२ ॥

ततो दक्षिणतस्माच्च महावीरेण कीर्तितम् ।

महावीरात् प्रचण्डेन कङ्कालेन ततः प्रिये ॥ १३ ॥

तस्माच्च नीलकण्ठेन मया तुभ्यं प्रकाशितम् ।

मत्तस्त्वया प्रतिज्ञातं त्वत्तो ज्ञातं गरुत्मता ॥ १४ ॥

दशकन्धरेण गरुडाद् रावणश्च बिभीषणः ।

बिभीषणात् पतङ्गेन पतंगाद् भवतापिता ॥ १५ ॥

तस्मात् प्राप्य नृभिर्देवि सर्ववीरं प्रकाशितम् ।

शतत्रयं सपञ्चाशतं मूलसूत्रमुदाहृतम् ॥ १६ ॥

सङ्ग्रहस्तु सहस्राख्यः कल्पो द्व्यष्टसहस्रकः ।

स्मृतं द्वादशसाहस्रं कल्पस्कन्धे महामते ॥ १७ ॥

चतुर्विंशसहस्रैस्तु संहिता तुर्यपारगा ।

द्वित्रिश्चतुर्गणा वाथ संहितातन्त्र इष्यते ॥ १८ ॥

लक्षोत्तरं स्मृतं शास्त्रं कोटयन्तममरार्चिते ।

वक्तृश्रोत्राभिधानश्च संहिताश्चाप्यनेकधा ॥ १९ ॥

शास्त्रव्यासभयाच्चक्रे तन्नामकथनं मया ।

अथोच्यते सुविस्तीर्णं सिद्धयोगेश्वरीमतम् ॥ २० ॥

नानाकल्पगणाकीर्णं योगिनीसिद्धसेवितम् ।

पराख्यममरेन्द्रेण भीष्मेण च परापरम् ॥ २१ ॥

अवतारितं तथा तन्त्रमपरं सिद्धयोगिना ।

मालाधरेण मालिन्यमन्नाघोर्यं करालिना ॥ २२ ॥

खेचरीविजयं चापि गजकर्णेन कीर्तितम् ।

महाशंखं महातन्त्रं कथितं शंखधारिणा ॥ २३ ॥

फेत्कारैकाक्षरीगर्भं फेत्कारेणावतारितम्।

विद्याधिपतिनाम्ना च विद्यालक्षमुदाहृतम् ॥ २४ ॥

विद्याप्रसूतिसंज्ञञ्च विद्योल्केन प्रकाशितम्।

सिताघोरमघोरेण रक्ता घोरेश्वरी भवेत्॥ २५॥

घोरेश्वरेण विद्युत्तं कृष्णकं कीटचक्षुषा।

कृष्णघोरेश्वरी प्रोक्ता विदिता भैरवेच्चया॥ २६॥

पीता घोरी महामाया पद्मरुद्रेण कीर्तिता।

संहितात्रयमन्यच्च भद्रकाली करङ्किणी॥ २७॥

निरञ्जनेच्चाज्जाता्‌ वै स्त्रिभीरुद्रैः प्रकाशिता।

दिवर्धशतसूत्राणि सर्वाण्येतानि सुन्दरि॥ २८

प्राक्क्रमेण तु विस्तारः स्मृतः शास्त्रावसानकः।

सिद्धयोगेश्वरीतन्त्रं श्रीकण्ठेनावतारितम्॥ २९॥

तस्मात् क्षुद्रेण संप्राप्तं क्षुद्राच्चामृतबिन्दुना।

बिन्दुः परापितेनैव ततो विप्रेण धारितम्॥ ३०॥

विप्राच्चापि मया ज्ञातं मया तुभ्यं प्रकाशितम्।

कृष्णाय च त्वया दत्तं तेन दत्तमुमापतेः॥ ३१॥

तेनापि वेदशिरसे सवाह्यङ्गिरसे क्रमात्।

उतथ्यायाब्रवीत् सोऽपि प्रददादूर्ध्वरेतसे॥ ३२॥

ऊर्ध्वरेतोमुखं बीजं मधुबिन्दु पिपासिते।

मनुष्यालिकुलैः प्रीतैर्विस्तीर्णे पृथिवीतले ॥ ३३ ॥

अथातो मद्वते शृण्वं श्रीचक्रस्य विनिर्णयम् ।

पञ्चामृताभिधानस्य परामृतविधायिनः ॥ ३४ ॥

अष्टौ विनिर्गतास्तमात् संहिताश्चक्रसंज्ञिताः ।

शिवेच्चयेश्वरात्तासां विद्या साधारिका मताः ॥ ३५ ॥

स्थाण्वन्तानन्तपूर्वास्तु स्वाधो वीरावबोधकाः ।

स्वरचक्रं वर्णचक्रं नाडीचक्रं तृतीयकम् ॥ ३६ ॥

गुह्यचक्रं कालचक्रं सौरं वाह्नेयसोमजम् ।

स्वरचक्रस्वरन्यासौ वर्णाख्यो मन्त्रनिर्णयः ॥ ३७ ॥

नाडीचक्रे सुताराख्ये गुह्याख्ये शक्तिनिर्णयः ।

आयुःप्रमाणं कालाख्ये सौरे बौद्धे शुभाशुभम् ॥ ३८ ॥

वाह्नेये मन्त्रदीप्तं च चण्डाख्ये मृत्युनाशनम् ।

आकर्षादर्षपञ्चार्थलक्षणा व्यूहगुह्यकाः ॥ ३९ ॥

हृदयाङ्कुशावसानास्तु क्रमशो धारका मताः ।

तेभ्यो विधानका वीरा वीरभद्रादयो मताः ॥ ४० ॥

तन्मध्ये भूतिकण्ठान्तमयज्ञानं महीव्रजे ।

भो संख्यं ततो ज्ञानं तन्त्रं पञ्चामृतं त्वया ॥ ४१ ॥

योगिनीभिरनन्ताभिर्गणैर्देवैर्महोरगैः ।

प्रह्लादमुख्यैर्दनुभिस्तस्मादौशनसेन तु ॥ ४२ ॥

भार्गवाद् देवलः प्रापदेवलाद् वेदपारगः।

कृष्णात्रेयस्तु वेदज्ञो कृष्णात्रेयात् कुशध्वजः॥ ४३॥

कुशध्वजात् सितोदेन सितोदात्तु वसद्गुणः व ख पतद्गुणाः।

पतद्गोर्दन्त्यमायातं मन्त्रं पञ्चामृतं प्रिये॥ ४४॥

सूत्रक्रमेण विज्ञेयः सूत्राद्यस्तन्त्रविक्रमः।

अतः शृणु महादेवि विश्वाद्यं तन्त्रमुत्तमम्॥ ४५॥

विश्वादियोगिनीजालस्वरूपप्रतिपादकम्।

योऽसौ विश्वेशान नमस्कृतः॥ ४६॥

विश्वमूर्त्तिरनन्तात्मा विश्वचक्रप्रवर्तकः।

गुणैश्वर्यप्रपूर्णाङ्गो नानागुणगणालयः॥ ४७॥

त्रिस्थानस्थं यदा यस्य शिवत्वं हि न हीयते।

अनन्तत्वादजत्वाच्च स तेनोक्तः सदाशिवः॥ ४८॥

विश्वाद्यमजगादासौ कल्पसूत्रमनाकुलम्।

विश्वात्मानं विधेयात्मा सोऽप्याह विमले दृशे॥ ४९॥

शुद्धदक् कान्तिचन्त्राय कान्तिचत्त्रोऽपि शौण्डिने।

तदाननं महाम्भोधेर्विशुद्धामलरत्नवान्॥ ५०॥

तन्त्रसारं विनिर्यातं धृतं तच्च मया प्रिये।

मया तत् कथितं तुभ्यं तया तद् गोपितं पुनः॥ ५१॥

किञ्चिन्मात्रं तु विज्ञातं त्वत्तस्तत्किल हेलिना।

तस्मात् तदास्यते सत्यमल्पकं सर्पिते भुवि ॥ ५२ ॥

प्रमाणं प्रोदितं पूर्वं सूत्राद्यमिति कथ्यते ।

सहस्रं तन्त्रमर्धञ्च तत्र बुध्वावधारितम् ॥ ५३ ॥

कल्पान्ते विमलाणूनां मलं प्रक्षालयिष्यति ।

सारार्थाः सर्वतन्त्रेषु येनोक्ताः शूलपाणिना ॥ ५४ ॥

विश्वाद्यैः कीर्तितास्ते तु विश्वेश्वरनमस्कृते ।

अथातः संप्रवक्ष्यामि योगिनीजालशम्बरम् ॥ ५५ ॥

द्वादशैव स्वतन्त्राणि निर्गतानि स्फुटानि च ।

महासंवर्त्तकं भीमं तिलकं नखसंज्ञकम् ॥ ५६ ॥

बिम्बञ्च चन्द्रलेखाख्यं तथा तिण्डामिलातकम् ।

शिलादं भगमालाख्यं भगिनीदशमं मतम् ॥ ५७ ॥

सुकेशिनं सुधामञ्च द्वादशं परिकीर्तितम् ।

एतेभ्यो निर्गताश्चान्या सन्ति देव्युपसंहिताः ॥ ५८ ॥

तासां नामानि वक्ष्यामि सन्देहविनिवृत्तये ।

तारकाक्षी च पाशघ्नी नन्दिनी चाभिगामिनी ॥ ५९ ॥

भृगुणी चैव सत्या च तथा दाक्षायणी सती ।

उमा माया महाकाली चण्डाली अचलश्रिया ॥ ६० ॥

भद्रकाली सुमेधा च तारार्कमणिनामनी ।

तारकाभरणा रौद्री ज्वालामालान्तिका ः प्रिये ॥ ६१ ॥

विंशत्युक्ता महादेवि संहिताः सुरसुन्दरि ।

महासंवर्तनाथेन भीमाय परिकीर्तितम् ॥ ६२ ॥

शम्बरं भीमनाथेन तिलकाय प्रकाशितम् ।

तिलको दीर्घनखिने नखी बिम्बाय सुव्रते ॥ ६३ ॥

विम्बोऽभिहितसुवृत्ते चण्डो वृद्धेन्दुसंज्ञके ।

चण्डाशिलातको देवो शिलादाय जगाद च ॥ ६४ ॥

निजगाद महावीरः शिलादो भगमालिने ।

भगमाली भगिन्याख्यवीराय निजगाद च ॥ ६५ ॥

सुकेशिने भगिन्याख्यः सुधाम्ने केशिसंज्ञकः ।

ज्वालामुखान्तिकानान्तु सुधामा कीर्तितो गुरुः ॥ ६६ ॥

ज्वालास्योऽपि महेशानि तवाहं सुरसुन्दरि ।

त्वमूर्ध्वरेतसो देवि सोऽप्यनन्तात् तपोधनात् ॥ ६७ ॥

बोधयामास महिमां तेभ्यो भुवि विसर्पितम् ।

अनन्तस्त्रोतोविभवं योगिनीजालशम्बरम् ॥ ६८ ॥

विद्या बेदेषु विस्तीर्णाः कीर्तिताः सप्त संहिताः ।

तासां नामानि वक्ष्यामि गुरवो ये च संस्थिताः ॥ ६९ ॥

विद्येशानेन सिद्धार्था पतिता सिद्धसङ्कुला ।

विद्यालया प्रलम्बेन विद्या राज्ञीपदद्रुणा ॥ ७० ॥

विद्यामणिः करालेन विद्याराशिरजात्मना ।

विद्या प्रसूतिसंज्ञा च विद्येशानेन कीर्तिताः ॥ ७१ ॥
यावदेषा च का पङ्क्तिर्गुरुणां परिकीर्तिता ।
तया ज्ञानप्रसूतिश्च विद्येशानां महातपे ॥ ७२ ॥
ततोऽपि हि मया ज्ञाता स्वल्पसूत्रा सुराम्बिके ।
मत्तोऽप्यसफला देवि तस्माद् वा पितृदण्डिना ॥ ७३ ॥
मातृदण्डितो तृणःप्रायसंहितां सप्तमां प्रिये ।
षट्संहितां न भूर्लोकमागता वीरवन्दिते ॥ ७४ ॥
अन्तिमे तु युगे तासां प्राप्तिर्मत्तो भविष्यति ।
सदाशिवेशयोर्व्योम्नि योऽसौ देवो निरञ्जनः ॥ ७५ ॥
स शान्तः केवलो ब्रह्म संपर्कामिश्रवोधगः ।
वामदक्षिणभेदस्थं शिरच्चेदं सुविस्तरम् ॥ ७६ ॥
वज्रकायाथ प्रोवाच संहितां वज्रमालिनीम् ।
घोरविद्यायुतप्राप्तां तापन्मुद्रागणाङ्कितान् ॥ ७७ ॥
नियुतेन च मुद्राणां मण्डलानां शतेन तु ।
सप्तमस्तां विभेद्यासौ वीरेभ्यो दत्तवान् क्रमात् ॥ ७८ ॥
ज्वलन्ताक्षस्य ज्वालाख्यां यमान्तां च यमान्तिके ।
कालान्तकाय कालान्तां प्लवनां प्लवनाय च ॥ ७९ ॥
संहितां चण्डवेगाञ्च चण्डवेगाय धीमते ।
तारानिधिं निधीशाय शत्रुघ्ने शत्रुमर्दनात् ॥ ८० ॥

Sampath_eBooks

एकाक्षाय च यस्यासौ शत्रुघ्नां शत्रुमर्दनः ।

एकनेत्रोऽपि कालाय मीनाय च यशस्विनि ॥ ८१ ॥

द्विस्कन्धां कृत्यतां प्राह घोरविद्यां ममालयाम् ।

कालभेदो मया प्राप्तः कालसंकर्षणात्मकः ॥ ८२ ॥

मयापि कथितस्तुभ्यं यातुधानाधिपाय च ।

वृन्दारकमुनिस्कन्धैस्त्वत्तोऽनन्तैर्विसर्पिताः ॥ ८३ ॥

प्रारब्धो योऽप्ययं भेदः सोऽपि यामलसंज्ञया ।

जयद्रथं तु भूर्लोके षट्साहस्रोऽभिधास्यते ॥ ८४ ॥

मीनभेदोऽपि यस्योक्तो ज्ञानस्यैकाग्रचक्षुषः ।

समीने नामसदृशो नरसिंहाय चैव तु ॥ ८५ ॥

योगिने दिव्यतपसे दैववत्स्यैकचक्षुषे

प्रकाशितं ततः शुक्रान्मयाद्यं शिष्यसन्ततिः ॥ ८६

संस्थिता धारकाद् यस्य शिरश्छेदस्य सुव्रते ।

सांग्रामिकमिदं तन्त्रं राजानास्याति दुर्लभम् ॥ ८७ ॥

तस्यावबोधमाविष्ट न सं यः स्ववशीयते ।

अथ स्वगुणमाहात्म्यसंज्ञयाद्धतगैः शिवैः ॥ ८८ ॥

सम्मोहमिति यद्गीतं भेदस्तस्योपवर्ण्यते ।

दैत्येन्द्रसंप्लने वृत्ते रणरागाहितात्मना ॥ ८९ ॥

मातृमण्डलयुक्तेन वीरेण प्रविजृम्भता ।

महामृतप्रमत्तेन प्रारब्धं दिव्यताण्डवम् ॥ ९० ॥

एतस्मिन्नन्तरे दिव्ये यास्ता ः लोकेशमातरः ।

तासां मार्गान् महादेवि या सा चक्रकरालिनी ॥ ९१ ॥

तया भक्षितुमारब्धं देवचक्रं सभैरवम् ।

ततस्तदाशयं बुध्वा देवदेवेन शूलिना ॥ ९२ ॥

विसृष्टो मदिराम्बोधिश्चलद्वीचीचयाकुलः ।

शक्तिपद्मे चतुष्पत्रे चतुष्के योगलीलया ॥ ९३ ॥

जयाद्यं भ्रातृयुक्तञ्च सवीणमसृजत् प्रभुः ।

ततस्तन्त्रीरवाध्वानमधुरस्वरमोहितम् ॥ ९४ ॥

परां प्रीतिमुपायातं अह्लायैवोग्रमण्डलम् ।

तुम्वं बिम्बं चलं कान्तं पीठं ब्रह्मकुलं चलम् ॥ ९५ ॥

योगो वीर्यं कला धर्मो दर्पो गर्वात् समादृतः ।

तेजःसंपत्प्रभावश्च स यत् श्रीर्लक्ष्मीर्ज्योतिषामथ ॥ ९६ ॥

मान्त्रैश्वर्य विभूतिश्च विभवाद्यो अनन्तकाः ।

पर्यायाः शक्तिमच्चक्रेर्गीतास्तन्त्रविशारदैः ॥ ९७ ॥

शाम्भवं हि चलं तुम्बं तद्दूरं जगति स्थितम् ।

सेव्यस्तु वाञ्छितार्थाय क्रियया शान्तरूपया ॥ ९८ ॥

चतुष्कादिविभागैस्तु गर्भे तुम्बुरुसंज्ञया ।

महासंमोहनं नाम तत्तन्त्रमवतारितम् ॥ ९९ ॥

Sampath_eBooks

तस्य धाता महेशानस्तस्मात् संमोहनं परम्।

सम्मोहताडनं तत्तु त्रिमूर्त्तिश्चाप्यनंततः ॥ १०० ॥

त्रिमूर्त्तिर्दुन्दुभिस्तस्मान्नीलकण्ठोऽवतारकः

नील रुद्रोद्भवाद्यन्या शिष्यास्तेष्टाष्टकाश्रिताः ॥ १०१ ॥

भार्गवोमाख्यभेदेन तद्विरूपेण सर्पितम्।

महासिंहासनं कल्पं कल्पानेकसमाकुलम् ॥ १०२ ॥

तं वक्ष्यामि समासेन यथावच्छृणु मोदित ।

भूरितन्त्रान्तरैर्व्याप्तं सूत्रानेकसमाकुलम् ॥ १०३ ॥

मायाबीजोत्तरं पूर्वं तथा संमोहनामृतम्।

जयामृतं विचित्रञ्च तारामृतमहामृतम् ॥ १०४ ॥

गुणामृतं कलासारं कालसारं परामृतम्।

त्रोटलं बिन्दुसारञ्च मायासारं महोदयम् ॥ १०५ ॥

विद्याजालं महाजालं मदनं मदनोदयम्।

मन्त्रोदयं प्रमोदञ्च विधिविद्याक्रियोदितम् ॥ १०६ ॥

रक्षो रक्षं सुरक्षञ्च त्रैगुणं भूतडामरम्।

त्रैलोक्यविजयं चैव भवते विजयं परम् ॥ १०७ ॥

नीलकेतुं वसोर्धारमङ्कप्रश्नप्रियोदयम् ।

महाबलं विप्रघ्नञ्च जम्भनं मोहनप्रभम् ॥ १०८ ॥

शिखाचूडामणिं कान्तं कर्कोटं करपूजितम्।

Sampath_eBooks

संमोहतिलकं कृत्वा विद्यातिलकमेव च ॥ १०९ ॥

तिलकं प्रयोजनानाञ्च दुर्वासामृतसुन्दरम् ।

कन्दर्पविजयालीलं ललितं रतिवर्द्धनम् ॥ ११० ॥

भोगिनेयं विशालञ्च भ्रातृतन्त्रादिकानि तु ।

महासंमोहजलधेस्तन्त्ररत्नानि कोटिशः ॥ १११ ॥

निर्गतानि महादेवि भुक्तिमुक्तिकराणि च ।

सुरैरपि दुराप्यानि किं पुनर्मनुजन्मभिः ॥ ११२ ॥

देवदानवगन्धर्वाः किन्नरोरगनायकाः ।

मुनयश्च तपोनिष्ठा एतेषां धारकाः स्मृताः ॥ ११३ ॥

मुनिभ्यो पुद्गलादिभ्यः शकुनिर्नरसत्तमैः ।

तन्त्राण्येतानि देवेशी शृण्वंश्च तनयोत्तरात् ॥ ११४ ॥

नयोत्तरं महातन्त्रमष्टभेदविसर्पितम् ।

ते प्रवक्ष्यामि प्रोत्फुल्लविषजन्मानने शृणु ॥ ११५ ॥

त्रैलोक्यमोहनं बिम्बं दानवारिविमोहनम् ।

तारकाभ्युदयं चैव संग्राम विजयं परम् ॥ ११६ ॥

नयसारं च मणिनां नयानां तिलकं तथा ।

कोलाहलाम्बुराशिश्च चापमाली मृगध्वजः ॥ ११७ ॥

नारायणो वषट्कारो वौषट्कारो समो गिराः ।

क्रमशो धारका ह्येते त्रिपदेष्ववतारकाः ॥ ११८ ॥

Sampath_eBooks

शुक्रश्चाङ्गिरसः प्राप तन्त्रमेतत् सुविस्तरम् ।

विस्तारितं जगत्यत्र नानाकल्पसमाकुलम् ॥ ११९ ॥

प्रस्फुरद् बलभूयिष्ठं विद्यामण्डलमालितम् ।

मन्त्रास्त्रवीर्यदीप्तांशुप्राकारोद्धतदानवम् ॥ १२० ॥

अमोघबलवाहुल्यं तारकोर्जाविवर्धनम् ।

दुर्द्धर्षं शार्ङ्गिणा ज्ञात्वा विज्ञप्तश्चन्द्रशेखरः ॥ १२१ ॥

स्तुतिपूर्वं मुनीन्द्रैश्च सनातनपुरःसरैः ।

विदिताशेषसद्भावभव्याभव्यहिते रतः ॥ १२२ ॥

भावनाभाव्यभूतेशभूरिभूरिभरावहः ।

भद्रपीठकभद्राङ्कभद्रचन्द्रार्धशेखरः ॥ १२३ ॥

सुभद्रभद्रया भद्रिभद्रिताभद्रविग्रहः ।

भृकुटीभङ्गभीमास्यभीमनादभयङ्करः ॥ १२४ ॥

भानुभाभास्पदीभूतभक्तानामभयङ्करः ।

बुधान्तकतमोभानो दुष्टद्विरदकेसरे ॥ १२५ ॥

विश्वहर्म्यमहास्तम्भविश्वग्योन्येकबीजगाः ।

कलाकलापसन्तान पूरितार्धोऽनुगोचरः ॥ १२६ ॥

नभोधुनीजलोल्लोलप्लाचितेन्दुकपालकः ।

चन्द्रस्यामृतसंकल्पः संजीवास्थिविभूषणः ॥ १२७ ॥

मुहुश्च सद्वन्द्वशुकमुखमारुतवीजितः ।

पिङ्गमूलजटाबन्धनभश्चन्द्रविराजितः ॥ १२८ ॥

योगियोगजयादेश्च योगियोग्यक्रियाश्रयः ।

योगयोने जगत्यत्र पञ्चक्रमविधायकम् ॥ १२९ ॥

भयहर्त्रे जगत्कर्त्रे विश्वयोने नमोऽस्तुते ।

दैत्येन्द्रविमलद्वेष्ट्रे नमस्ते द्विजचक्षुषे ॥ १३० ॥

भस्मिने धन्विने शूलिनेऽङ्गिने गुहधन्विने ।

असंप्रचायुषेरण्ये लिङ्गिने स्वर्णरेतसे ॥ १३१ ॥

त्रिचक्षुषे विधुधृते मृगेन्द्राजिनवाससे ।

पीतदेवान्नसे भद्रे भद्राया रुद्रवक्षसे ॥ १३२ ॥

मनोभवातिरम्याङ्ग दग्धदीप्ताग्निसदृशे ।

प्रेयोवरोधनस्पर्शसम्प्रीणीततनूरसे ॥ १३३ ॥

फलयोत्क्षिप्तशैलेन्द्र रक्षोधिप कृताधिपे ।

विद्यामन्त्रांशुसंप्राप्तविविधस्तोत्रसंपदे ॥ १३४ ॥

मनोभिलषितानन्तसन्तताशेषशर्मणे ।

नमस्ते लेलिहानेति प्रशान्तायास्यलिङ्गिने ॥ १३५ ॥

शक्तिरूपाय भगिने शक्त्यतीताय योगिने ।

नयोत्तराय त्रिगुणे तिस्रो गौर्यो महेश्वरः ॥ १३६ ॥

ज्वालिनी सपताका च तन्त्राण्येतानि शङ्कर ।

मन्त्रविद्यापरन्तान्तत्याजेन अव्याजेन बलेन तु ॥ १३७ ॥

स्फुरन्त्यप्यसुरास्तेषु तेषु साधका विहितास्त्वया ।

धनुर्धरागमावाप्तसंप्रदायाश्च दुर्धराः ॥ १३८ ॥

निघ्नस्तेन सुरानीकोववलीयाम्सोबलोत्कटः ।

अतिसन्धयितुं शक्तो नयनेन नयान्तरम् ॥ १३९ ॥

सुरनैगमोतिदक्षः श्रुतनानाशयोऽपि हि ।

अतिसौभाग्ययोगेन नित्या मन्त्रनि विभिः ॥ १४० ॥

मोहिता विश्वकामिन्यस्तापिता मन्मथाग्निना ।

प्राणात्ययादिभिः क्रूरैः कर्मभिस्त्रासितं जगत् ॥ १४१ ॥

ज्वालिन्याचक्रवर्त्तित्वं हृदये च विभोर्बलात् ।

विद्याधराणां महतां तपस्तोपितवेधसाम् ॥ १४२ ॥

श्रुत्वा शौरिमुखोद्गीर्णं वचः पन्नगभूषणः ।

स्तोत्रं सुप्रीतया वाचा प्राहैवं गरुडध्वजम् ॥ १४३ ॥

गच्च भौमगणं गृह्य स्वां स्वां अवसतिं सुखम् ।

योग्यमन्त्र करिष्यामि यद्धितं च विधासिनम् ॥ १४४ ॥

पक्षिपत्रादिदेवेषु गतेषु प्रभुणा ततः ।

नयोतरं महातन्त्रं श्रुतं देवेन शम्भुना ॥ १४५ ॥

चिन्ना च ज्वालिनी विद्या नित्या घोर्यश्च कीलिताः ।

उत्कीलनादिकाम् भेदान् सप्ततन्त्रेषु ये विदुः ॥ १४६ ॥

तत्र तेषु फलं लेभुरितरेऽपि परिश्रमम् ।

अन्तेऽवतारं वक्ष्यामि महारौद्रस्य तन्त्रजम् ॥ १४७ ॥

भैरवं ब्रह्मरुद्रं च षडङ्गायतमेव च ।

महारौद्रेण रुरुणा शर्वाय परिकीर्तितम् ॥ १४८ ॥

अथ रुद्राय संवर्त्तः सम्वर्त्ताच्चण्डशौण्डिनौ ।

शौण्डिनश्चार्द्धनारीशो ह्यवैशीन् तन्त्रसंग्रहम् ॥ १४९ ॥

संगृहितं ततः प्राह सभृङ्गे स्वल्पसूत्रकम् ।

भृङ्गिनो दिव्यसंबन्धः सोऽस्य तन्त्रस्य स्वल्पकः ॥ १५० ॥

अर्थसारा सुराधर्मा दैत्यघ्नीवीरवन्दिता ।

विरार्थिना वीरसारा रौद्री रुद्रान्तमालिनी ॥ १५१ ॥

कालोत्तरा च कालघ्नी महामृत्युञ्जयापरा ।

प्रचण्डभैरवश्चैव चण्डश्चण्डेश्वरोऽपरः ॥ १५२ ॥

तस्माच्चालातपाणिस्तु लोकेशः पञ्चसप्ततः ।

ईशानश्चावदत् पूर्णो रुद्रैकादशकोऽनु च ॥ १५३ ॥

दशैका संहिता ह्येताः क्रमशो रुद्रयामले ।

अथातः शिववक्त्रेन्दु मण्डलानां परिश्रुतम् ॥ १५४ ॥

परामृतबलोद्भासि श्रूयतां ब्रह्मयामले ।

नानाभेदसमाकीर्णं पञ्चस्त्रोतोविमुद्रितम् ॥ १५५ ॥

सर्वस्य जगतो ह्यस्य यदुपादानलक्षणम् ।

कीर्तितं प्राङ् महादेव सदाशिवशिखालयम् ॥ १५६ ॥

Sampath_eBooks

योनिरुपोऽपि शब्देन प्रोद्गीतं सर्वसूरिभिः।

नानाविद् विन्दुनाषीजासंज्ञाभिस्तद् व्यवस्थितम्॥ १५७॥

विद्युक्तं स च सर्वज्ञ आत्मत्वं तच्च दुर्मतम्।

तद्वीजमपरं प्रोक्तं परं सर्वज्ञतान्वितम्॥ १५८॥

पिकारः पिण्डरूपस्तु वुकारो बीज इष्यते।

उभयोर्योग कर्ता यश्चुङ्कारः परमो हि सः॥ १५९॥

पिकारस्य तु ये भेदा वुकारस्योभयस्य च।

व्याकरोति यतस्तान्स्तु पिचुतंत्र मतः स्मृतम्॥ १६०॥

पिकारं कामिनीपुष्पं रेतो नारं चुरुच्यते।

तेन मन्त्रक्रियाव्याजाद् यस्मात् फलकृते मतः॥ १६१॥

भूयसी देवदेवेन तस्मादेतत् पिचुं मतम्।

तदेकं सप्तधा भिन्नं ब्रह्माख्यं श्रावकेच्चया॥ १६२॥

रक्ताद्यं पेचिकाद्यञ्च मृगालीमतमेव च।

शाम्वरं नीलकेशाख्यं भारुण्डाख्यं च पिङ्गलम्॥ १६३॥

शाम्वरन्तु द्विधा भिन्नं भेदेनोत्फुल्लकेन तु।

एवमेतानि चाष्टौ च मतानि कथितानि तु॥ १६४॥

विस्तीर्णानि कुरङ्गाक्षि तन्त्रेऽस्मिन् ब्रह्मयामले।

अन्यभेदाश्च ये तेषां ते शृणुष्वावधुना प्रिये॥ १६५॥

रक्ताख्यं बिन्दुसारेण पेचिकाख्यं कपालिना।

Sampath_eBooks

हेतुयानं शिवाख्यन्तु शम्बरं शम्बराख्ययोः ॥ १६६ ॥

नीलकेशीमतं देवि नीलकेश्यावतारितम् ।

भारुड्या भारुडीसंज्ञं कौशिक्या पिङ्गलामतम् ॥ १६७ ॥

मूलावतारका ह्येते तेभ्यो भिन्नाश्च कोटिशः ।

नन्ताद्यादुत्पलं मैत्रं येविकाद्याच्च निर्गतम् ॥ १६८ ॥

हेडामताच्च निर्यातं करालीमतमेव च ।

लम्पटं नीलकेशाख्यात् कालाख्यं भारुडीमतम् ॥ १६९ ॥

सारस्वतविनिर्यातं विस्तीर्णाच्चम्बरामतात् ।

उत्फुल्लकात् कलासारं माकोटं च विनिर्गतम् ॥ १७० ॥

निर्गते पिङ्गलाख्याच्च पिचुसारनयोदये ।

एतेभ्यस्त्वनुतन्त्रेभ्यः पविशिष्टाष्टकं स्थितम् ॥ १७१ ॥

प्रोच्यते नामभेदेन यद्यस्मिन् संस्थितं प्रिये ।

पाञ्चालिकोत्पलाज्जातं मन्थानं वाग्वतीभवात् ॥ १७२ ॥

करालीमततत स्पष्टं तत्सूत्रं सारसंग्रहम् ।

कालाख्या निर्गता लक्ष्मी विमलं लंपटाद्यतः ॥ १७३ ॥

कच्चपिः कम्पकुट्टाच्च स्यात् सण्डपिकं मतम् ।

गर्भाप्रकरणं जातं परिशिष्टं नयोदयात् ॥ १७४ ॥

उपसूत्राण्यतः सन्ति परिशिष्टोद्भवानि तु ।

अश्वप्लुतं तु सारङ्गं गोजिकं भेदविप्लुतम् ॥ १७५ ॥

Sampath_eBooks

वैभङ्गं चैव मातङ्गं कुसुमालीसवित्रकम् ।
एवमादिरनन्तैस्तु स्रोतोभिः प्रविसर्पितम् ॥ १७६ ॥
जगत्यत्र वरारोहे विस्तीर्णं व्रह्मयामलम् ।
मूलावतारकेभ्यस्तुरुद्रैर्वसुदिवाकरैः ॥ १७७ ॥
योगिनीनां गणैश्चाथ विद्याधरमहोरगैः ।
मुनिभिश्चोर्ध्वरेतोभिर्मतश्च परिविदितुम् ॥ १७८ ॥
मूलानुपरिशिष्टोऽयं सूत्रेभ्यः सप्तसुंदरि ।
मिश्रसूत्राण्युत्तराणि निर्गतानि शृणु प्रिये ॥ १७९ ॥
मुष्टिकौ लवकौमारौ कालसाराम्बुका तथा ।
तिलकं चावधूनं च सप्तमं कीर्तितानि तु ॥ १८० ॥
कथितानि महेशानि पञ्चस्रोतोमयानि तु ।
मूलं गुह्यं नयं चैव उत्तरं चोत्तरोत्तरम् ॥ १८१ ॥
अर्थाविर्भावभेदेन पञ्चसूत्रोज्ज्वलं मतम् ।
अथातः शब्दमूलं तु सर्वतन्त्रार्थसूचकम् ॥ १८२ ॥
तन्मूलं स्वल्पसूत्रं च गुह्यं गुह्यविवेचकम् ।
निराचारावधूतार्थं नाडी नाडीगतिक्रमात् ॥ १८३ ॥
बिन्दुबीजकलायोगवर्णयागविवेचकम् ।
मन्त्रजीवामृताकर्ष योगिनीकुलकीर्तितम् ॥ १८४ ॥
गुह्यसूत्रं तदुद्दिष्टं बाह्याध्यात्मार्थवाचकम् ।

Sampath_eBooks

सिद्धासिद्धेषु सञ्चारक्रमव्याकरणे रतम् ॥ १८५ ॥

सिद्धहानिविचाराढ्यं प्रत्यानयनकीर्तितम् ।

गमागमविचाराढ्यंनयसूत्रविनिस्सृतम् ॥ १८६ ॥

सूचितं यत् त्रिभिः सूत्रैरनिर्णीतं च तत्त्वतः ।

स्फुटार्थमवदत् तत्र सूत्रमुत्तरमुच्यते ॥ १८७ ॥

उत्तरेऽभिहितो योऽर्थः प्रमादादस्फुटीकृतः ।

तत् स्फुटार्थविकल्पार्थं निर्विकल्पार्थवादि च ॥ १८८ ॥

सर्ववस्तुसुसंपूर्णमुत्तरोत्तरमुच्यते ।

सूचकं चाभिधानाद्यं गमकं च प्रकाशकम् ॥ १८९ ॥

सङ्कीर्णं पञ्चकं सूत्रं सूत्रजातिविदो विदुः ।

असूचितं लेशयापकृष्यार्थं कुरुते स्फुटम् ॥ १९० ॥

तच्चतुर्ष्वपि संमिश्रं मिश्रसूत्रमुदाहृतम् ।

भूतस्य संग्रहं कुर्याद् भावि यत् तस्य सूचनम् ॥ १९१ ॥

पटले पटले यच्च तत् सङ्कीर्णमुदाहृतम् ।

सूत्रवाक्यमतश्चैव परिच्छेदो ह्यनन्तरः ॥ १९२ ॥

पञ्चधा नित्यसम्बन्धः प्रोक्तो वक्रा विचारिणा ।

सूत्रतः सूत्रसम्बन्धो वाचोक्तो वाच्यग स्मृतः ॥ १९३ ॥

सूचनाद् वाक्यहीनोऽपि योऽर्थंनिगदते प्रियम् ।

मनोऽभिलषितं श्रोतुं वक्तृत्वात्मानसो हि सः ॥ १९४ ॥

Sampath_eBooks

सूचितार्थसमाप्तिस्तु परिच्चेद इति स्मृतः।

तदनन्तरोक्तियुक्तिर्या सा वाचान्तविधायिनी ॥ १९५॥

एकार्थगमकं सूत्रमाहृत्योन्मीलयेद् बुधः।

वृद्धिमानकृतेर्थस्य नीचस्थामपि यद् भवेत्॥ १९६॥

अर्थविस्पष्टतां कर्त्तुं सर्वज्ञैरभिभाषितम् ।

दृष्टान्तत्वे विरुद्धं हि शिष्यसम्बोधनाय तु॥ १९७॥

स्वसिद्धान्ताविरोधेन गमकेऽर्थे कृतेऽपि हि ।

अन्वीक्ष्यादूषणरतो यः सत्यागारसंमतः ॥ १९८॥

इति भैरवस्रोतसि विद्यापीठे शिरश्वेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां ब्रह्मयामलनिर्णयश्चत्वारिंशति पटलः॥ ४०॥

एकचत्वारिंशतिः पटलः।

श्रीभैरव उवाच।

अथ कोटयष्टकोपेतमाहुर्देवं सदाशिवम्।

कपालीशाय महते वितानं विष्णुयामलम्॥ १॥

कपालीशाच्च स्वच्चन्दःस्वच्चन्दात् क्रोधभैरवः।

क्रोधाद् उच्चुष्मकः रुरुगुच्चुष्माच्चण्डभैरवः ॥ २॥

चण्डादुन्मत्तकः प्रापदुन्मत्ताद् वीरभैरवः।

वीरेशाच्चाप्यनन्तस्तुमन्थानो भास्करादपि॥ ३॥

मन्थानान्नीलकण्ठाख्यस्तस्माद् भीमोऽथ वामकः।

महाकालो गृध्रपादो विष्णुश्च समितिञ्जयः॥ ४॥

शाण्डिल्यादिमुनीन्द्रा स विष्णुर्बोधितवान् पुनः।

त्रिमुण्डीन्यष्टकोटिः स्याद् बहुरूपाच्च सप्ततिः॥ ५॥

क्रोधनी बषड्भिरुद्दिष्टा सोच्चुष्मा पञ्चकोटिगा।

चण्डा चतुर्भिरुद्दिष्टा प्रोन्मत्ता च तथैव हि॥ ६॥

कोटिभिस्तिसृभिः प्रोक्ताः संहितावीरभैरवाः।

अनन्तमतसंकीर्णाद्वाभ्यां चानन्तभास्करः ॥ ७॥

तृणकोऽनन्तविजयारभूतादिपारगाः।

भीमा वामा महाकाली गृध्रपादी च संहिता॥ ८॥

अनन्तविजयातस्तु निर्गता रूपसंज्ञया।

एकविंशत्सहस्राणि तथा कालवधात् पुरा॥ ९॥

द्वासप्ततिसहस्राणि श्रुता कृष्णेन धीमता।

विष्णूपसंहिताषड्भिः सहस्रैर्यापरा प्रिये॥ १०॥

दुर्दर्शना तु नाम्नासौ शाण्डिल्येनावधारिता ।

त्रिसहस्रेण सार्द्धेन शाण्डिल्यो मुनिसत्तमः॥ ११॥

जगदेतां मुनीन्द्राणां संहितांस्तु सुदर्शनाः।

भृगुश्वेतादिकानान्तु कपिलानां महात्मनाम्॥ १२॥

भैरवानलनिर्दग्धं दुष्कृतानन्तकर्मणाम्।

शुद्धं शक्त्यर्कसम्पर्क शुद्धध्वान्तोरुजन्मनाम् ॥ १३ ॥

तपोभासा प्रदीप्तार्चिराविर्भावितसद्मनाम् ।

योगचन्द्रामृतोद्दाम धरानिर्वापितात्मनाम् ॥ १४ ॥

इति विद्यायामले सूत्रस्थानानि ।

श्रीभैरव उवाच ।

मम वदतः शृणु पार्वति विपुलगुणाकीर्णमण्डलामेयम् ।

विद्यासुगणाकीर्णं सेनापतियामलं महागहनम् ॥ १५ ॥

तेजोधाम्नाभिहितं प्रचण्डवीरायतेन पृथुशिरसि ।

स्थूलशिरसा समदृशे समनयनेनापि विश्वभुजे ॥ १६ ॥

विश्वभुजः प्रतिपन्नो विषबलयुगलेन तत् मयाः ।

देविमतस्त्वया विशाखेन नन्दिना कुञ्जरमुखेन ॥ १७ ॥

सौभद्रवीरभद्रोग्रचण्डनाथादिकैरथ ।

तेभ्यो महेन्द्रचन्द्रार्कवायुमुनिमरुद्गणैरान्तम्- ॥ १८ ॥

गौहारस्पन्दानलकण्ठविषच्चदा शैशवं मयूरशिखां

रमणोद्भवाथ वरदा लीलोत्पलमालिकाबहुलाम् ।

स्कन्दानन्द विशाखा चालनतास्कन्दविजयिनी

विजयाश्याशेषतस्तव विपुलाः कथितास्तव संहिता देवि ॥ १९ ॥

इति स्कन्दयामलसूत्राणि ।

अथ पादाधिको लक्षो यः प्राप्तो भैरवोदयात् ।

मृत्युञ्जयात् स तेनान्तः पिङ्गान्मृत्युजितापि हि ॥ २० ॥

पिङ्गलः शङ्ककर्णाच्च हुंकारात् सोऽप्यवाप्तवान् ।

हुंकारः पिङ्गलेशश्च पिङ्गलेशो यमान्तकात् ॥ २१ ॥

यमान्तको सितदृशः कृष्णाक्षो भगभैरवात् ।

भगरुद्राः सुरानन्दस्तस्मादं देवो महोदधिः ॥ २२

संस्थितोऽन्यप्रदेशस्थो भैरवाणुप्रबोधकः ।

उमायामलनाम्नोऽस्य तन्त्रस्योत्पललोचने ॥ २३ ॥

संहिताष्टकभिन्नस्य चतुष्पीठस्य भैरवि ।

प्रागुमारौरवी गम्भीरा लंघता परा ॥ २४ ॥

मात्र्यानन्दसुरानन्द भैरवानन्दसंज्ञकाः ।

भैरवाद्या मया प्राप्ता भैरवानन्दसंहिता ॥ २५ ॥

द्वात्रिंशद्भिः सहस्रैस्तु संहृत्योन्मीलिता तव ।

त्वत्तोद्घुष्टसहस्राणि भैरवानन्दसुन्दराः ॥ २६ ॥

विसर्पिता जगत्यत्र सुरसानङ्गबोधनी ।

भव्या तु जनितानन्दा सिद्धसन्दोहलक्षणा ॥ २७

तव सुतनु विशालशालिशाख उदितो यः विषदोरगोरुवैद्यः ।

प्रतिविजितविशेषवस्तुयुक्तो गुरुसहितोऽखिलवीरतन्त्रभेदः ॥ २८ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रेचतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकाल सङ्कर्षण्यां विष्णुसूत्रनिर्णय

Sampath_eBooks

एकचत्वारिंशतिः पटलः ॥ ४१ ॥

द्विचत्वारिंशतिः पटलः ।

श्रीभैरव उवाच ।

उमायामलकाः पञ्च पञ्चभ्यो निर्गतानि तु ।

यामलेभ्यः करालाब्जलोचने तानि वच्मि ते ॥ १ ॥

वेतालयामलं देवि निर्गतं ब्रह्मयामलम् ।

ईशानयामलं तन्त्रमुद्भूतं विष्णुयामलात् ॥ २ ॥

अथर्वयामलं घोरं प्रसृतं रुद्रयामलात् ।

सरस्वतीयामलं तु च्युतं तत्स्कन्दयामलम् ॥ ३ ॥

उमायामलतः सृष्टं वितानं सोमयामलात् ।

प्रतियामलानि पञ्चाशदुक्तेभ्यो निर्गतानि तु ॥ ४ ॥

यामलेभ्यस्ततस्तेभ्यः प्रच्युतान्यमितानि तु ।

देवताख्यानि चत्वारि तथा दूतीभवानि तु ॥ ५ ॥

किङ्किणीयानि चत्वारि चत्वार्यनुचरीषु च ।

षट्संख्यावस्थितान्यत्र योगिनीयामलानि तु ॥ ६ ॥

अष्टादशैव भीमानि डाकिनीयामलानि तु ।

वीरादिदश चोक्तानि मातृणां यामलानि तु ॥ ७ ॥

यामलं युगलं नाम मन्त्रविद्यैकगोचरम् ।

ज्ञानक्रियात्मकं तच्च अन्योन्यापेक्षया स्थितम् ॥ ८ ॥

मन्त्रज्ञानक्रियाविद्यासंयोगादर्थसाधनम्।

करोति विश्वगर्थानामयुतं निष्फलं यतः॥ ९॥

अतोऽर्थयामलं सेव्यमेकचित्फलकारणात्।

वदतोऽर्थं शृणु मम क्रियासूत्रविनिर्णयम्॥ १०॥

बालेन्दुनयने पूर्णचन्द्रमण्डलजल्पने ।

अष्टानामष्टकानान्तु योऽसावुद्भवकारकः॥ ११॥

महोनिधिः स सर्वज्ञो मुद्रापीठावतारकः।

तेन व्योममयी मुद्रा स्वस्वभावैकलक्षणाः॥ १२॥

स्वप्रतिष्ठा स्वधर्मिष्ठा नित्यानन्दातिलालसा ः।

मुद्रिता शेषसम्बन्धाद् राविता तनुबन्धना॥ १३॥

मनःस्थूलामृता मुद्रा हृद्रूपानेकवर्जिता।

सा प्रपञ्चत्वमापन्ना ध्येयध्यानगलिङ्गता ः॥ १४॥

विचारिता चित्रभेदैरेकानेकस्वरूपतः।

यस्मिन् तन्त्रे कुरङ्गाक्षि हृद्भेदं तत् स्मृतं प्रिये॥ १५॥

तस्यावतारको देवो नाम्ना फेत्कारभैरवः ।

फेत्कारात् कान्तिचत्रं तु कान्ति चात्रादिविग्रहः ॥ १६॥

हेरस्तात् प्रपलम्भस्तु प्रपलम्भान्निरञ्जनः।

निरञ्जनात् ततो व्यापी व्यापिनो विग्रहेश्वरः॥ १७॥

विग्रहेषान्मया प्राप्तं मया चैव समीरितम् ।

Sampath_eBooks

स्वल्पात् स्वल्पतरं चैव त्वत्तो देवि समर्पितम् ॥ १८ ॥

देवादिमनुजान्तानां हृद्भेदं भेदवर्जितम् ।

देहिनां ये विकारास्तु चित्रा- देहविकारजाः ॥ १९ ॥

शान्तघोराविमूढैस्तु भावैः पृक्ताः प्रयत्नगाः ।

भिषिक्तचित्तदारूढहृष्टबन्धस्वरूपगाः ॥ २० ॥

तेषां वैचारिकं तन्त्रं मातृभेदं हि तन्मतम् ।

मायितं तु जगत्कृत्स्नं त्रायितं च विशेषतः ॥ २१ ॥

यस्यां मया च सा चक्रे मातृशब्देन गीयते ।

तस्या विचित्रभेदो यो मातृभेदः स उच्यते ॥ २२ ॥

हृद्भेदे गुरुमाला या सैवाद्या विधिधारकाः ।

मातृभेदाद् विनिर्याता विस्तीर्णा पञ्च संहिताः ॥ २३ ॥

अपराजिता वास्तुविद्या सर्वविम्बा करोटिनी ।

सिद्धसारार्थचित्रार्था नित्यमार्गविधायिनी ॥ २४

बीजं विन्दुं तथा बिन्दुं नादञ्च स निरोधिकम् ।

संहृत्य कुरुते कुब्जं स्वाङ्गं या सम्प्लवे सदा ॥ २५ ॥

कुब्जिका सा समाख्याता शक्तिगम्या मनोन्मनी ।

श्रूतो व सूतं ख श्रुतं हि तदभिप्रायः पञ्चाशद्वर्णलक्षणः ॥ २६ ॥

सो ह्यनन्तपदार्थानां वागुत्त्यार्थाभिधायकः ।

सदा ध्यानविहीनेऽपि ह्यस्वरूपेऽपि वस्तुनि ॥ २७ ॥

Sampath_eBooks

वागुत्त्या प्रतिपत्तिः स्यात् तद्रूपाव्यभिचारिणी ।

या यस्या वाचिका मुद्रानन्तभेदप्रतिष्ठिता ॥ २८ ॥

तत्तात्पर्यतरं तन्त्रं विज्ञेयं कुब्जिकामतम् ।

गुरवोऽस्य पुरोक्ता ये संहितानिर्णयं शृणु ॥ २९ ॥

एकाक्षरा द्व्यक्षरा च पदमाला तृतीयका ः ।

शब्दार्थमाला चमाला चतुर्थी शब्दमालार्थमालिनी ॥ ३० ॥

सप्तमी वाक्यमाला तु विद्यामालाष्टमी मता ।

कुब्जिकामतविस्तीर्णा पर्वतानिर्गतास्त्विमाः ॥ ३१ ॥

संहिता संहिता ह्यष्टौ गम्भीरा या प्रकाशिता ।

त्रिविध विधां मनोऽभिलषितार्थविधानताम् ॥ ३२ ॥

विशदभेदसंयुतमालाकुलमातृसंभवाम् ।

गदितमनङ्गशत्रुदयिते प्रतिपीठगतम् ॥ ३३ ॥

वृत्तिमधिगच्च पीठमवगत्य सुरेन्द्रनुते ।

इति भैरवस्त्रोतसि विद्यापीठे शिरश्च्छेदे श्रीजयद्रथयामले महातन्त्रे तुर्विं

शतिसाहस्त्रे प्रथमषट्के श्रीकालसङ्कर्षण्यामुमायामलादिसूत्रनिर्णयो

द्विचत्वारिंशतिः पटलः ॥ ४२ ॥

त्रयश्चत्वारिंशतिः पटलः ।

श्रीभैरव उवाच ।

अथातो भिन्नरूपन्तु पीठं मण्डलसंज्ञकम् ।

शतेन कथितं तत्वं व ख तत्व संहिताभेदरूपिणे ॥ १ ॥

संहिताभेदहीनं तन्मूलसूत्रैकगोचरम्।

वीथिकाद्वारपद्मानां नानाकारविचारकम्॥ २ ॥

तत् त्रिपीठे तु सामान्यं स्वपीठाभ्यधिकार्थदम् ।

तस्यावतारको देवः स साक्षात् पञ्चशेखरः ॥ ३ ॥

रतिशेखरतस्मात् तु तस्मात् संहारभैरवः ।

भैरवाद् डिण्डिनामा च ढण्ढो दण्डेश्वरः स्थितः ॥ ४ ॥

दण्डेश्वराच्च धौरेयो धौरेयाद् गोमतिर्महान्।

गोमतेस्त्रिकलस्त्रीकः कलाश्रीकण्ठमूर्ध्वगः ॥ ५ ॥

श्रीकण्ठाच्च मया प्राप्तं निधिपीठं सविस्तरम्।

मत्सकाशाच्च ब्रह्माद्यैः प्रतिपीठं श्रुतं प्रिये ॥ ६ ॥

मूलपीठं सुसंक्षिप्तमत्यन्तं विरलं गतम्।

यतो ब्रह्मादिभिर्ज्ञानं ततद्व्यासविभेदतः ॥ ७ ॥

ताण्डवं तु यदा मर्त्यो मातृमण्डलभैरवः।

करिष्यति श्मशानेषु कल्पान्ते घोरनायकः ॥ ८ ॥

मण्डलेशः कुलावस्थस्तदा पीठं तु मण्डलम्।

अवतारयतेऽसौ वै नानाकल्पविभेदतः ॥ ९ ॥

चतुर्विधकुलावाप्त्यै पुंसां कुशलकर्मिणाम्।

पारंपर्यक्रमेण । प्रविततमखिलं संहिताभेदभिन्नम्।

तन्त्रं वीरेन्द्रमातर्गुरुगुणसहितं सूत्रसूत्रान्तरस्थम् ॥ १० ॥

पीठेष्वष्टाष्टकेष्वप्युपरचितं निर्गमं भैरवं भ्रान्तिहीनम् ।

बुध्वामन्तो दृष्टतो मुहुरपि हृदये केतुतत्पृच्चसे यम् ॥ ११ ॥

इति भैरवस्त्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं शतिसाहस्त्रे प्रथमषट्के श्रीकालसंकर्षण्यां त्रिचत्वारिंशतिः पटलः ॥ ४३ ॥

चतुश्चत्वारिंशतिः पटलः ।

श्रीदेव्युवाच ।

ज्ञातः सर्वो महादेव मन्त्रतन्त्रान्तरक्रमः । गुरुक्रमो विशेषेण चतुष्पीठे तु भैरवे ॥ १ ॥

अष्टाष्टकं न विज्ञातं येन युक्तः सदाशिवः ।

अष्टाष्टकाधिपो देवः प्रोच्यते तन्त्रवेदिभिः ॥ २ ॥

श्रीभैरव उवाच ।

भैरवं यामलं चैव मताख्यं मङ्गलं तथा ।

चक्रं शिष्यबहुरूपं वागीशान्यष्टसंहितम् ॥ ३ ॥

स्वच्चन्दश्चण्डक्रोधाख्यावुन्मत्तोऽसितविग्रहः ।

रुरुर्झङ्कः कपालीशः प्रोच्यते भैरवाष्टकम् ॥ ४ ॥

ब्रह्मयामलमेकन्तु द्वितीयं रुद्रयामलम् ।

विष्णुयामलमन्यञ्च चतुर्थं स्कन्दयामलम् ॥ ५ ॥

गौतमीयामलाथर्ववेतालं चाष्टमाङ्ककम् ।

यामलाष्टकमेतद्धि दम्पत्यं चाविशेषगम् ॥ ६ ॥

मताष्टकं शृणु अतः सदाशिवपरिग्रहम् ।

रक्ताद्यं पेटिकाद्यञ्च भारुण्डीमतमेव च ॥ ७ ॥

हल्लामतं चतुर्थन्तु पञ्चमं पिङ्गलामतम् ।

नीलकेशीमतं षष्ठं सप्तमं शम्बरामतम् ॥ ८ ॥

उत्फुल्लमष्टमं प्रोक्तं सप्तस्रोतोविलक्षितम् ।

शताष्टकं ह्युपमतं परिशिष्टैश्च संयुतम् ॥ ९ ॥

श्रीदेव्युवाच ।

कथं तं देव देवेश यत्त्वया यामलाष्टकम् ।

तत् स्वतन्त्रन्तु किं नाथ तत्त्वेकस्माद् विभेदगम् ॥ १० ॥

एतद्धि मम निर्भ्रान्तं कुरु संसारपूजितम् ।

श्रीभैरव उवाच ।

यामलानान्तु सर्वेषामामूलं ब्रह्मयामलम् ॥ ११ ॥

कनकान्धकरुरूणां च वधादिति बलीयसम् ।

तत्त्रिभेदमनुप्राप्तं शृणुष्व ह्यबलात्मजे व वलात्मजे ॥ १२ ॥

रौरवोऽन्धकभेदश्च कनकाख्यस्तृतीयकः ।

यामले वैष्णवेयाख्ये निर्गते रुरुभेदतः ॥ १३ ॥

स्कन्धमन्धकभेदाश्च कनकाद् रुद्रयामलम् ।

यामलेभ्य उमायाश्चाथर्वादीनि श्रुतानि तु ॥ १४ ॥

तद्भेदो गदितः पूर्वं श्रूयतां मङ्गलाष्टकम् ।

मङ्गलानान्तु देवेशी पूर्वं भैरवमङ्गला ॥ १५ ॥

चन्द्रगर्भा द्वितीया तु तृतीया शान्तिमङ्गला ।

सुमङ्गला चतुर्थी च ब्रह्मी रौद्री च सा स्मृता ॥ १६ ॥

षडङ्गायतनीयाञ्च ज्ञेया सा सर्वमङ्गला ।

षष्ठी तु विजया नाम प्रोक्ता विजयमङ्गला ॥ १७ ॥

विश्वाद्या सप्तमी देवी प्रोक्ता सा चोग्रमङ्गला ।

वर्माहा चाष्टमी ज्ञेया नाम्ना सद्भावमङ्गला ॥ १८ ॥

मङ्गलाष्टकमेतद्धि शृणु चक्राष्टकं प्रिये ।

स्वरचक्रं वर्णचक्रं नाडीचक्रं तृतीयकम् ॥ १९ ॥

गुह्याख्यं कालचक्रञ्च सौरवाह्नेयसोमजम् ।

शिखाष्टकं शृणु अतो महोविधिपदस्थितम् ॥ २० ॥

शौक्री मन्दा महोच्चुष्मा भैरवी शम्बरी तथा ।

प्रपञ्चकी मातृभेदी रुद्रकाली तथाष्टमी ॥ २१ ॥

शिखाष्टकमिदं प्रोक्तं बहुरूपमतः शृणु ।

अन्धकी रुरुभेदा च शङ्खा वै शूलिनी तथा ॥ २२ ॥

कर्णामोटी च टाङ्की च ज्वालिनी मातृरोदनी ।

वागीशान्योऽथ तन्वङ्गि वक्ष्याम्यष्टौ यथा स्थिताः ॥ २३ ॥

Sampath_eBooks

सिद्धा चित्रा च हृल्लेखा भैरवी च कदम्बिका ।

हंसिनी हंसमाला च चन्द्रकोटिस्तथाष्टमी ॥ २४ ॥

एतत् सदाशिवं चक्रमष्टाष्टकविभेदितम् ।

कथितं तत्र देवेशी मन्त्रतन्त्रप्रकाशकम् ॥ २५ ॥

भूरितन्त्रोदयात् तस्य नोच्यन्ते नियता स्थितिः ।

प्रोच्यते वाथ विस्तीर्णं स्याच्चास्त्रं शृणुतो गुरुम् ॥ २६ ॥

दुर्वासाः सनको विष्णुः कपिलः काश्यपः कुरुः ।

संवर्त्तः शङ्खपालश्च भैरवाख्यावतारकाः ॥ २७ ॥

भृग्वश्वेतोनिधीशश्च विश्वामित्रोऽथ गौतमः ।

गालवो यज्ञवल्कश्च विभाण्डो यामलस्य तु ॥ २८ ॥

कूर्चालः क्रन्दनः कङ्कः केकरः काननक्षमी ।

कोटराक्षश्च संवर्त्तो मताख्यस्यावतारकाः ॥ २९ ॥

बिन्दुश्चैव सबिन्दुश्च शातातपपराशरौ ।

आपस्तम्बोऽम्बुभुग् व्यासः कात्यायन विनामगः ॥ ३० ॥

तन्त्रावतारकाये तु कथिता मङ्गलाष्टके ।

उलूकः स्थूलनाडी च हंसो हंसरवः शुकः ॥ ३१ ॥

मनुः पीतोक्षकश्चैव चक्राष्टकविभाषकाः ।

वशिष्ठो दक्ष शुक्रश्च कनकः कोकिलः शुकः ॥ ३२ ॥

विश्वभुक् कश्यपः श्वेतः शिवाख्यस्य तु भाषकाः ।

बृहस्पतिर्यमो घण्टः कङ्करः श्यामकः शिखी ॥ ३३ ॥

तथा कर्णजटाधीशो बहुरूपावतारकाः ।

हंसः सोमो लुलोमश्च विलोमो लोमकः शतः ॥ ३४ ॥

तथैव जडवाल्मीको वाग्वतीनां विभाषकाः ।

एतेऽवतारकाः प्रोक्ता दुर्वासाद्या महर्षयः ॥ ३५ ॥

एतेभ्यो नक्तरूपाणि पृच्छाष्टकविचारकाः ।

फलेष्वभिष्टुते सर्वे भाव्या भैरवमूर्तयः ॥ ३६ ॥

अन्यथा न भवेत् सिद्धिरेवमाहुर्महेश्वरः ।

कथितं तव पद्मलोचने स्फुटमष्टाष्टकलक्षणं परं ।

गुरुयुक्तमनङ्गसुन्दरि शृणु यत् प्रस्तुतमग्रतोऽधुना ॥ ३७ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां सदाशिवाष्टाष्टकनिर्णयश्चतुश्चत्वारिंशति पटलः ॥ ४४ ॥

पञ्चचत्वारिंशतिः पटलः ।

श्रीभैरव उवाच ।

गुर्वाश्रितमिदं सर्वं संसारोद्धरणादिकम् ।

शास्त्रसन्दोहमखिलमनन्तं षट्प्रकारतः ॥ १ ॥

ज्ञेयं स्रोतोविभेदेन तन्त्रेऽस्मिन् पारमेश्वरे ।

अष्टधा क्रमभेदेन तच्च चारुक्रमेण हि ॥ २ ॥

Sampath_eBooks

तस्यानुगतमेवात्र तदष्टकमुदाहृतम्।

गुरुक्रमं स्यात् प्रथमं पिण्डाख्यं स्याद् द्वितीयकम्॥ ३॥

मन्त्रक्रमं तृतीयं स्याच्चतुर्थं देवताक्रमम्।

ज्ञानक्रमं पञ्चमं स्यात् षष्ठं चर्याक्रमं विदुः॥ ४॥

भावनाक्रममात्रान्यं सप्तमं समुदाहृतम्।

विज्ञानक्रममेवान्यदष्टमं परिकीर्तितम्॥ ५॥

एतत् क्रमाष्टकं सुभ्रु गुरुः स क्रमशोऽखिलम्।

षट्स्रोतसि नियुक्तास्ते गुरवो ह्यधिकारिणः॥ ६॥

तारणेन कुलस्यैते नियुक्ताः सर्वतः क्रमात्।

तथापि तेषां यद्रूपं क्रियया तत् स्वरूपकम्॥ ७॥

वक्तव्यं तच्छृणुष्वाद्य येन भ्रान्तिर्विनश्यति।

षड्स्रोतसि महाशैव पृथग्वस्तुविनिर्णयम्॥ ८॥

बोद्धव्यं गुरुभेदेन सन्तानक्रमसंस्थितम्।

ऊर्ध्ववक्त्रः शान्तगोत्रः सृष्टिगोचरवर्जितः॥ ९॥

निराचारः परः शान्तो निरपेक्षो निराकुलः।

वस्तुविज्ञानविदितो विज्ञानाचारगोचरः॥ १०॥

समयाचारनिर्मुक्तः परमार्थावबोधकः।

जातिवर्णपदैर्हीनो अकुलः शिव उत्तमः॥ ११॥

स्वभावस्थः परः शुद्धः परमानंदभैरवः।

तत्राचारक्रमायाता गुरवो ये महेश्वराः ॥ १२ ॥

भैरवास्ते समाख्याताः क्रमविज्ञानपारगाः ।

सर्ववर्णाः सर्वभक्षः सर्वाहाराः सदोदिताः ॥ १३ ॥

एवं मूर्त्तिस्थिता ज्ञेया गुरवः पन्निलात्मज ।

पूर्ववक्रस्य वक्ष्यामि यथा सन्तानसंस्थितिः ॥ १४ ॥

पुरुषश्चेश्वरः व ख पुरुषश्चेश्वरः शक्तिरूपः श्रीसन्ततिस्तथा ।

चतुर्धा भेदभिन्नस्तु ं तु संज्ञाभेदः पृथक् पृथक् ॥ १५ ॥

प्राजापत्या महीपाला ग्रन्थः कायोन वृत्तिकः ।

चतुर्धा सन्ततिर्ज्ञेया तन्त्रेऽस्मिन् भैरवात्मके ॥ १६ ॥

गोत्रमन्त्रेश्वरे सम्यक् शोधिकाश्च चतुर्विधाः ।

चामुण्डा मुण्डमालान्या घण्टारावा चतुर्थिका ॥ १७ ॥

शुद्धं संशुद्धं बुद्धञ्च तथा पाशुपतव्रतम् ।

नग्नव्रतं मुण्डधरं परिव्राड्व्रतमुत्तमम् ॥ १८ ॥

अत्र चर्यादिकं मौद्रं प्रवक्ष्याम्यनुपूर्वशः ।

शुद्धव्रते त्रिमुण्डं स्याद् ब्रह्मविष्णुहरात्मकम् ॥ १९ ॥

पञ्च ब्रह्माद्यनुष्ठानं गायत्र्याद्यभिमन्त्रणम् ।

त्रिसन्ध्यं भस्मना स्नानं समन्त्रं चाश्रमं स्थितम् ॥ २० ॥

गुरुदेवव्रती नित्यं त्रयं नित्यं समर्चयेत् ।

भिक्षान्नमाहरित्वा तु त्रिधा संविभजेत् ततः ॥ २१ ॥

Sampath_eBooks

निवेद्य दिव्यं यद्भागं न भक्षेत् किन्तु चोत्सृजेत्।

जयाश्रयेऽथ लोकेश ग्रहणांशश्रियोगणात्॥ २२॥

प्रविभागव्रतासक्तो लूनकेशोऽङ्गनाम्वरः ।

लोकधर्मी शिवायत्तः सर्वदा चास्थिधारकः॥ २३॥

रक्ताम्बरधरः सम्यग् व्रतयोगाश्रमे रतः।

स आचार्यः पूर्वभेदे दीक्षाव्याख्यानतत्परः॥ २४॥

न सङ्करं भजेत् तत्र कृत्वाचारक्रियागमम्।

स्रोतसो दक्षिणस्याथ चर्यासन्ताननिर्णयम्॥ २५॥

प्रवक्ष्यामि समासेन तत्र यत्परिकीर्तितम्।

रौद्रगोत्रं तदाचार व्रतमार्गविनिर्णयम्॥ २६॥

सन्तानमठिकाभेदं चर्यामन्त्रजपादिकम्।

मुद्रामन्त्रार्चनं होमं चाराचारविनिर्णयम्॥ २७॥

नैराचारं महाचारं सर्वाचारविवर्जितम्।

गोचरं व्योममममृतं सर्वगं सर्वभक्षगम्॥ २८॥

सर्वेश्वरं विभुं रौद्रं सर्वागमनिषेवितम्।

सर्वोत्तमं सर्वगतं सर्वाभाससमन्वितम्॥ २९॥

सर्वागमविधेर्हीनं दक्षिणं व्योमगोचरम्।

स्वयंभुभैरवं साक्षात् सर्वभक्षं हुताशनम्॥ ३०॥

सन्तानमन्त्रं विज्ञेयं चतुर्धा शृणु तं महत्।

हंसकामलवेतालं टीटिभान्तं स्थितं पृथक् ॥ ३१ ॥

कङ्कालं नग्नमुन्मत्तभैरवान्तं घृणीशकम् ।

महावीरव्रतं घोरमन्यत्पाशुपतं च यत् ॥ ३२ ॥

असिधाराव्रतं चात्र विज्ञेयं चाष्टमं नृप ।

मठिका चात्र तै रम्भा महातैरम्बिका परा ॥ ३३ ॥

सारस्वती गह्वरा च तथा वीरवतीति च ।

किराती झर्झरी नागी दक्षिणे मठिकाष्टकम् ॥ ३४ ॥

मुद्राष्टकमतो ज्ञेयं देवाभरणकण्ठिका ।

अट्टहासा द्वितीया स्याद् घण्टिरावा तथा स्मृता ॥ ३५ ॥

खट्वाङ्गिनी तथा मुद्रा भस्मा धारा तथाष्टमी ।

ब्रह्माण्डवक्रकुहरब्रह्मपात्ररसामृतम् ॥ ३ ॥

कपाली चाथ कंकालं कन्दलं चोत्तमोत्तमम् ।

कपालमतिदीप्तोग्रशिरश्चन्द्रकरार्चितम् ॥ ३७ ॥

तस्य चांतर्गता गौरीं या जगद्बीजगह्वरा ।

अमा लक्ष्मी प्रमेया च अमाकान्ता सरस्वती ॥ ३८ ॥

सर्वामृतकलाधारं कपालं ब्रह्मतोषकम् ।

पञ्चरत्नविचित्राङ्गं पञ्चब्रह्मकलेवरम् ॥ ३९ ॥

पञ्चतत्वकलाधारं षडध्वासन सुंदरम् ।

वीरेन्द्र भैरवाधार भव संहारकारक ॥ ४० ॥

Sampath_eBooks

सर्वभूतगणैर्युक्तं महापातकनाशनम्।

कपालं चार्धकङ्कालं मुद्राराज्ञी जगत्त्रये ॥ ४१॥

कपालधारी तद्रक्षी यो वातद्वारकः स्मृतः।

योऽर्चयेद् बन्धयेद्वाथ् स भवेद् भैरवेश्वरः ॥ ४२॥

खट्वाङ्गमुद्रा वक्ष्यामि यथावन्नृपसत्तम।

खट्वाङ्गं देहकंकालं पुंप्रकृत्यावमर्दनम्॥ ४३॥

सर्वदेवकलाधारं शब्दाधारं कलानगम्।

व्योमसञ्चारविज्ञानं शशिसूर्यपरिग्रहम्॥ ४४॥

कलाकलङ्ककलिलं कलायौवनभूषितम्।

भोगापदानसंरूढं बहुभोगिगणावृतम्॥ ४५॥

विश्वकर्त्तारघटितं विश्वकर्मकरं विभुम्।

विश्वरम्भादिजननी या माया तदधिष्ठितम्॥ ४६॥

मायामयं हि खट्वाङ्गं धारयाम्यहमेव हि।

खस्थमेव खमध्यस्थं खमध्यं खगतिः खलम्॥ ४७॥

खट्वाङ्गमीदृशं प्रोक्तं भुक्तिमुक्तिप्रदायकम्।

विकटा नाम या मुद्रा तस्या निर्णयं उच्यते॥ ४८॥

विमर्दितं यया विश्वं जगद् ब्रह्माण्डमण्डलम्।

भोगैरभोगैर्विविधैः सुखदुःखैः पृथग्विधैः॥ ४९॥

लाभालाभैश्च संत्रासैः पशुपाशैः पुरोदितैः।

विकारावयवैः सर्वैः स्थिता मुद्रा करालिनी ॥ ५०

कङ्कालभैरवच्सृष्टी ब्रह्माण्डाशेषमर्दकी ।

कङ्कालिनी महाकाली विकटा वामलोचना ॥ ५१ ॥

करालाबद्धसम्बद्धा श्वासने सा विदुर्धराम् ।

घोरा तु निसृतं घोरं तेजोराशिं महाबलम् ॥ ५२ ॥

संक्षोभ्य जगदेतच्चु मुद्रां बद्ध्वा तु संहरेत् ।

बन्धमात्रा ग्रहाः सर्वे पलायन्ति दिशो दश ॥ ५३ ॥

विश्वयोनिमतो वक्ष्ये ययेदं मुद्रितं जगत् ।

विश्वाय जननी योनिः स्वयं देवी सरस्वती ॥ ५४ ॥

गर्भिणी गर्भदरणी वामा वागीश्वरी शिवा ।

नित्योत्सवा निष्प्रपञ्चा सर्वप्राणिष्ववस्थिता ॥ ५५ ॥

आनन्दामृतसंपूर्णा सर्वार्त्तिहरणी शुभा ।

अलक्ष्मी पापदलनी भोगसम्जननी स्मृता ॥ ५६ ॥

अथ पञ्चमुखी संहरेत् पाशा तस्या वक्ष्यामि निर्णयम् ।

ऊर्ध्वप्राग्दक्षवामाख्यपश्चिमाननसंस्थितैः ॥ ५७ ॥

भैरवस्याथ भैरव्या लोलीभूतास्थितैवसा ।

मुद्रा पञ्चमुखी नाम साक्षान् मायातनुत्रकम् ॥ ५८ ॥

पुष्टिसौभाग्यजननी मेधास्मृतिविवर्धनी ।

दुर्गसंतारणी दुर्गा दारिद्र्यदमनी शिवा ॥ ५९ ॥

अमृतेति समाख्याता जगदाप्यायनोद्यता ।

सुधाकामदुघा ज्ञेया यया मक्षादिकं सदा ॥ ६० ॥

सर्वं सुधारसापूर्णं स्यान्मण्डलगतं प्रिये ।

यया प्रवृद्धया सम्यक् त्रैलोक्यं तृप्यति क्षणात् ॥ ६१ ॥

यस्मान्मन्त्रगणाःसर्वे ध्वांक्षरूपाः सदैव हि ।

स्रग्गन्धधूपाभरणपानाहारादिलंपटा ः॥ ६२ ॥

तस्मादियं सदा बद्धा तृप्यते मन्त्रवर्गकम् ।

सर्वसंभारभरणाद् भैरवो विगतामयः ॥ ६३ ॥

महायागप्रियो नित्यं पूजनीयः सदा बुधैः ।

भुक्तिमुक्तिप्रदं दिव्यं कथं भक्त्या न सेव्यते ॥ ६४ ॥

यस्य देवातिदेवस्य जगत् सर्वं वशे स्थितम् ।

तमघोरं भैरवाख्यं भरणाद् भैरवं स्मृतम् ॥ ६५ ॥

तत्स्रोतसि यदा सक्तस्तदासौदक्षिणः सदा ।

सगुरुर्देवि सुमहान् प्रायश्चित्तादिकं न हि ॥ ६६ ॥

तस्यास्ति तन्त्रमर्यादा मनुजन्म यदा स्थितम् ।

अयोग्यस्य यदा ज्ञानं मन्त्रदीक्षाप्रकाशनम् ॥ ६७ ॥

मुद्रामण्डलचर्यादिक्रियाकालगुणागुणम् ।

प्रदर्शयत्यसौयस्माद् व्रतविज्ञानसन्ततिम् ॥ ६८ ॥

गृहीत्वा तत् पुनः पश्चात् वप्रभिन्नं प्रवर्तते ।

Sampath_eBooks

तदा तमाहरेत् तस्य प्रायश्चित्तं स्वयं स्मृतम् ॥ ६९ ॥

अस्या परार्द्धकुपितः शापयेद् वाथ शिष्यकम् ।

शासनीयं तदा शिष्यमशिष्यं नैव शासयेत् ॥ ७० ॥

अशुचिर्भिन्नमर्यादः सर्वावस्थो गुरुर्यदि ।

नावमान्यस्तु स यतो दैशिको वीरराड् स्वयम् ॥ ७१ ॥

स्वयम्भुर्भगवान् रुद्रः साक्षात् श्रीकण्ठनायकः ।

लोकानुग्रहकृद् वीरो मानवीं तनुमास्थितः ॥ ७२ ॥

रत्नादिकं तेन दत्तं तदा ग्राह्यं सदानघैः ।

तदवज्ञा च वादञ्च गुर्वन्तरपरिग्रहम् ॥ ७३ ॥

आज्ञां न लङ्घयेत् तस्य चायां वा न कदाचन ।

न प्रतिज्ञा गुरोरग्रे वाग्दण्डं वर्जयेत् सदा ॥ ७४ ॥

गुरोश्चालीकनिर्बन्धं रक्षणीयं प्रयत्नतः ।

मुद्राष्टकसमाचारं गुर्वाम्नायं गुरुक्रमम् ॥ ७५ ॥

दक्षिणस्रोतसो भिन्नं क्रियायोगमुदाहृतम् ।

मुद्रादिचर्याभेदश्च स्रोतस्यस्मिन् सुविस्तरः ॥ ७६ ॥

बहुत्वान्न प्रतन्येत ग्रन्थगौरवभीरुतः ।

पञ्चस्रोतसि शैवेऽत्र विस्तारः प्राक्प्राचोदेतः ॥ ७७ ॥

वामपश्चिमवक्त्राभ्यां विस्तारः प्रोच्यतेऽधुना ।

हम्समन्त्रादितुर्यञ्च शिवोऽयमजमव्ययम् ॥ ७८ ॥

Sampath_eBooks

वैकुण्ठगोत्रचरणमपरस्य गणेश्वरम्।
पञ्चसन्तानभेदानि ज्ञानान्यत्र क्रमेण हि ॥ ७९ ॥
वामे शाखाः परिज्ञेयाश्चत्वारिंशद्व्रतैर्युताः ।
मठिका दश विज्ञेयाश्चतुर्धा सन्ततिक्रमः ॥ ८० ॥
धृतराष्ट्रा ः बकाः हंसाः गोपालान्ताः प्रकीर्तिताः ।
गौरीव्रतं चण्डशुद्धिर्बैडालं नग्नपूजितम् ॥ ८१ ॥
कुचैलं मलिनं नाम बीभत्सं चापरं स्मृतम्।
किङ्किणीचीरवसनं साधकाख्यं महाव्रतम् ॥ ८२ ॥
डामरं सोमसिद्धान्तं तथा कालमुखं व्रतम्।
डम्बरं शृंखलावद्धं केशश्मश्रुविलुञ्चनम् ॥ ८३ ॥
एकदण्डैकपादाख्यं मौसलं मौसलीव्रतम्।
देव्या व्रतञ्च कङ्कालं मन्त्रिमन्त्रं व्रतोत्तमम् ॥ ८४ ॥
भीमं गुह्यं तथा मौनं करालं भीषणव्रतम्।
वेलाव्रतं तथा चर्या व्रताचारमथापरम् ॥ ८५ ॥
सुरावञ्च शिखारावं वेतालं तालकव्रतम्।
उन्मत्तमसिधाराख्यं महाकङ्कालझर्झरम् ॥ ८६ ॥
नृत्तं गीतं तथा तालं वीणाव्रतमनुत्तमम्।
हिंसाव्रतमक्षमालां पीतवासव्रतं जपम् ॥ ८७ ॥
वेलाहारं वानप्रस्थं तीक्ष्णं स्नानाग्निपूजनम्।

सत्यव्रतं तथा देव गुरुभक्तिदृढव्रतम्॥ ८८ ॥

अस्तेयत्वमदम्भित्वमहिंसाव्रतमुत्तमम ।

अकार्पण्यमहिंसाख्यं चत्वारिंशद्व्रतोत्तमम्॥ ८९ ॥

गम्भीरमठिका गौरी बगला त्रायणी मता ।

वामावर्ता शिखावर्ता जटिला त्र्यन्तराष्टमी ॥ ९० ॥

तटे चोत्तरतौ रंभा शाल्मली दशमी स्मृता ।

महामुण्डकपालाख्या खट्वाङ्गं विकटाकटा ॥ ९१ ॥

विश्वयोनिः पञ्चमुखी ह्यमृता च करङ्किणी ।

रावा सुरावा वेताली घण्टा डामरिका जटा ॥ ९२ ॥

मुण्डी दण्डी कबन्धी च पाशिनी गदिनी ध्वजी ।

खड्गपट्टिशशूलाङ्कविस्मया चामराधरा ः॥ ९३ ॥

प्रसादाभयवृत्ताख्यानङ्गमुद्रा वराङ्गना ।

सदाचारप्रयोगेण मध्यमाधमचुष्मका ॥ ९४ ॥

गुरवो गूढसर्वस्वा देवीमेलापकारिणः ।

पश्चिमे ज्योतिगम्भीरं सन्तानचरणं मठम्॥ ९५ ॥

मठिका माठरी रौद्री व रौद्रा शबरी सुमुखीगणाः ।

गणेश्वरी वरारम्भा गम्भीरा गह्वरी नगा ॥ ९६ ॥

हरहासा विलासा च गाङ्गेया मातृनन्दनी ।

त्रिपञ्चमठिका गुप्ता सुगुप्ता प्रकटोत्कटा ॥ ९७ ॥

Sampath_eBooks

चरणाश्च चतुःषष्टिः प्रतिपत्त्येकगोचराः ।

आचारानन्तर्यन्तं तेभ्यो भेदं दशोत्तरम् ॥ ९८ ॥

तदुत्तरैः समाचारमनङ्वान्न विकथ्यते ।

शैवमत्यन्तगहनं भेदैर्भिन्नं पृथक् पृथक् ॥ ९९ ॥

अष्टाविंशति ये तन्त्रास्तेषां भेदमनन्तकम् ।

विशेषश्चविशेषश्च द्वैताद्वैतविमिश्रितः ॥ १०० ॥

सक्रियं निष्क्रियं चान्यद् द्वयोर्हीनमहीनकम् ।

श्रुतं दैत्येन्द्रमरुतैःसिद्धगन्धर्वकिन्नरैः ॥ १०१ ॥

ऋषिभिर्मुनिभिर्नागैर्गुह्यकैरपि तत् स्वधा ।

ब्रह्मविष्ण्वीन्द्रवसुभिर्येन येनावधारितम् ॥ १०२ ॥

पञ्चस्रोतात्मकं शैवं तेन तेनावतारितम् ।

बहुभेदमतो ज्ञेयं शृणु षष्ठं यथास्थितम् ॥ १०३ ॥

यदा चारान्तरे लीनं कालानलपदान्तरे ।

प्रसरं शाम्भवं सम्यग् दारयित्वा तु षोडश ॥ १०४ ॥

हठाद् देव तदा ज्ञेयो हठकेशो महाबलः ।

प्रभुः सर्वस्य देवोऽसौ कुलकौलविशारदः ॥ १०५ ॥

रहस्यग्राममखिलं तस्मात् सर्वमिहोदितम् ।

मन्त्रादिमार्गभेदेन यत्किञ्चित् समुदाहृतम् ॥ १०६ ॥

तदस्मात् प्रभवेद् देवि वक्रात् पातालनायकः ।

अस्मिन् स्रोतसि चण्डोग्रसन्तानः समवस्थितः ॥ १०७ ॥

मठिका षोडश ज्ञेया नामं तासां शृणु पृथक् ।

कलाख्या चाथ वैरिञ्ची सर्वाधारा भवांतिका ॥ १०८ ॥

संकोचा तुर्यसंज्ञान्या षडश्रा वह्निकुण्डला ।

नाभी संजीवनी चान्या वज्राख्या च घटोदरी ॥ १०९ ॥

लोकाख्या लम्बिका चान्या तथा विद्या कुलेशया ।

विन्दुचित्रा शक्तिगर्भा मठिकाःषोडश स्मृताः ॥ ११० ॥

आसां वीर्यानुवादेन ये पृथक् सूरयः स्थिताः ।

तन्मुद्राधारिणः सर्वे तद्व्रतास्ते सदामृताः ॥ १११ ॥

कङ्काली घर्घरा चण्डारावा संकोचमन्थरी ।

बिडाली लाकिनी कूर्मा वक्रावर्ता शिवानना ॥ ११२ ॥

पञ्चाद्या वृत्तिदलनी पातालविजया परा ।

करङ्किणी खेचरी च मुद्रा ह्येतास्तु षोडश ॥ ११३ ॥

सर्वसिद्धिप्रदा मुख्या सन्तानेऽस्मिन् महाबले ।

व्रताः षोडश एवोक्ताः शृणु तेषां विनिर्णयम् ॥ ११४ ॥

नित्यानन्दो योगवज्रो शिरश्छेदो भयानकः ।

निराचारोऽसिधारश्च चण्डाख्यो द्वयनायकः ॥ ११५ ॥

उन्मत्तश्च कुचैलश्च मिथ्यालापी च गह्वरः ।

महाहास्यो महागेयो महागौरीव्रतः परः ॥ ११६ ॥

Sampath_eBooks

प्रशान्तचण्डौ विज्ञेयौ व्रताः षोडश नामतः।

एवं प्रभेदतो ज्ञेयाः सन्तानेऽस्मिन् सुरार्चिते॥ ११७॥

तन्नाम्नाङ्कितसन्ताने मन्त्रो ज्ञेयः सदैव हि।

सदा महामन्त्ररतैरत्र व्यक्तिः प्रकीर्तिताः॥ ११८॥

योगभूत्यो महाकान्ता विज्ञानज्ञानशासनाः।

नित्यमन्त्रवरारोहे कृतादिप्रविचारितैः॥ ११९॥

स्रोतसो भेदभिन्नस्य सन्तानानेकसंख्यया।

षट्कस्य सम्यग्विज्ञेया बह्वागमविभेदतः॥ १२०॥

एकः शिवो महामूलं निरुपाधिरनन्तकः।

विज्ञानज्ञानसंपूर्णः सर्वाकारस्तु मन्थरः॥ १२१॥

निस्तरङ्गार्णवाकारः परितृप्तः परापरः।

सुशान्तमूर्त्तिः सर्वात्मा निर्वाणेशोऽतिनिर्मलः॥ १२२॥

तस्य शक्तिः स्वकं वीर्यं चिद्धामानंदगोचरम्।

व्यक्तं व्यक्तिविभेदेन स्पन्दनानन्दसुन्दरम्॥ १२३॥

तद्धर्मधर्मिणी ज्ञेया शक्तिराद्या शिवस्य सा।

निर्मला विरजा शुद्धा सर्वप्रचुरभास्वरा॥ १२४॥

खड्गस्य धारा वह्नेर्वा दाहतापौ यथा स्थितौ।

तथा सा तस्य देवस्य वर्णव्यक्त्युन्मुखी स्थितिः॥ १२५॥

वाक्चतुष्टयसङ्क्रान्ता परमा बिन्दुभैरवी।

षोढा प्रसरते व्यक्तं विगलद्वाहवाहनी ॥ १२६ ॥

व्यक्ताव्यक्तविभेदेन शुद्धसन्ताननिर्मला ।

ततः स्रोतांसि षड् सम्यग् व्यक्तानि स्थूलभेदतः ॥ १२७ ॥

परः सूक्ष्मदृशा भाति विचारद्वारभेदतः ।

मन्त्रमुद्रा तथा वर्णौ वीर्यमण्डलचक्रके ॥ १२८ ॥

परदेहमहाराशिशक्तिविश्वस्वरूपतः ।

व्यक्तान्याधारभेदेन विधानानि जयद्रथ ॥ १२९ ॥

तत्र ये संस्थिताः सम्यग् गुरुपूर्वक्रमेण तु ।

आयातायामयोगेन सन्तानक्रमयोगतः ॥ १३० ॥

अभेदमन्त्रविज्ञेया प्रतिस्रोतोविभेदगम् ।

सम्यगाचारभेदेन एकमूलत्वयोगतः ॥ १३१ ॥

वस्तुतो भेदमात्रैव नास्ति पन्निलनन्दन ।

एकत्वाद् देहमूलत्वात् प्रसरैकप्रयोगतः ॥ १३२ ॥

व्यक्तत्वाद् भेदजाद् तस्य न भेदो विद्यते क्वचित् ।

क्रियानन्तर्ययोगोऽत्र विज्ञेयः पारमार्थिकः ॥ १३३ ॥

अथवानुक्रमेणैव गुरुणां सन्ततिक्रमः ।

सदाचारगतिस्तत्र संस्थिता ते वनगात्मजे ॥ १३४ ॥

तदा ते गुरवो लोके व्यक्तास्वक्रमभेदतः ।

एषां मूलः शिवश्चैव शक्तिरेकैव सर्वदा ॥ १३५ ॥

Sampath_eBooks

द्वयोरभेद विज्ञानादद्वयोः भेदनित्यगः व ख -शः ।

नास्ति भेदविचारोऽत्र यदा सिद्धतमः स्थितः ॥ १३६ ॥

प्रसराणामनन्तत्वात् परिसंख्या न विद्यते ।

शाखारूपास्तु विज्ञेया व्यक्तिहेतुविचित्रता ॥ १३७ ॥

अत्र षड्स्त्रोतसो भिन्ना या शक्तिः पीठसूत्रगा ः ।

सा पूर्वं विस्तरेणात्र वर्णिता नाधुनोच्यते ॥ १३८ ॥

इदानीं भेदजा तस्य स्त्रोतोभिन्नस्य साम्प्रतम् ।

रहस्ययुक्त्या वक्ष्यामि भेदसन्ततिमेति हि ॥ १३९ ॥

पूर्वापरं समाचारं बहु भेदगतं हि यत् ।

ऊर्ध्वे व ऊर्ध्वे व्योमाभिधानं स्याद् आचार ं व्यक्तिमागतम् ॥ १४० ॥

नवात्मभेदं तत्संख्या तत्त्वं मन्त्रस्थितं महत् ।

तदध्वरं तदाचारं द्वैताद्वैतविमिश्रितम् ॥ १४१ ॥

पञ्चस्त्रोतक्रियामार्गे निष्कुरुस्व व्यवस्थया ।

बोद्धव्यं क्रूरवस्थं तद् सर्वद्वैतक्रियास्पदम् ॥ १४२ ॥

सर्वदक्षिणमद्वैतं द्वैताद्वैतं च वामकम् ।

सत्त्वं रजस्तमश्चैव गुणसृष्टेर्व्यवस्थया ॥ १४३ ॥

पश्चिमं गुणपूर्वं स्यात् तत्र यत् सर्वमाश्रितम् ।

कैवल्यज्ञानसंमोहमूर्ध्ववक्रे व्यवस्थितम् ॥ १४४ ॥

अतिमार्गमनन्तत्वं हाटकेशव्यवस्थितम् ।

Sampath_eBooks

व्रतानुष्ठाननित्याद्यैः क्रियाचारक्रमेण तु ॥ १४५ ॥

तेन मुक्तिप्रदं ज्ञेयं सर्वस्य जगतः सदा ।

पापपाशविशां वाद्यं वीराचारमदान्तिकम् ॥ १४६ ॥

दक्षिणं भुक्तिमुक्तीनां पदमेव सदाद्वयम् ।

अणिमा महिमा चान्या लघिमा प्राप्तिरेव च ॥ १४७ ॥

प्राकाम्यमीशिता ज्ञेया वशित्वं चापरं स्मृतम् ।

यत्र कामावशायित्वं वामवक्त्रव्यवस्थितम् ॥ १४८ ॥

विषभूतग्रहोन्मादमातृगुह्यकरक्षसाम् ।

नाशयत्यपि वादस्तु सिद्धिर्यच्चति चाद्वयम् ॥ १४९ ॥

सक्षेत्रौषधिबलखन्यधा तु समूलिकम् ।

मन्त्रवादाप्तपर्यन्तमष्टधा वादसिद्धिकृत् ॥ १५० ॥

पश्चिमं वक्त्रमतुलं गुरुपर्वक्रमेण हि ।

सर्वसिद्धिप्रदं चोर्ध्वं क्रियाचारसमाकुलम् ॥ १५१ ॥

पातालखड्गगुटिका रोचनाञ्जनपादुका ।

वेतालमेलकान्ताश्च सिद्धयोर्हाटकेश्वरे ॥ १५२ ॥

शक्तेरूर्ध्वं समाख्यातं परधामीश्वरम् ।

सा शिखा परमा प्रोक्ता सन्तानव्यक्तिसाधनी ॥ १५३ ॥

पूर्वे सदाशिवं ज्ञेयं शिवशास्त्रविचक्षणैः ।

दक्षिणे घोरसंज्ञञ्च रुद्रत्वममलं विदुः ॥ १५४ ॥

Sampath_eBooks

गणं वामे विजानीयान्नियतं पन्निलात्मज ।

ततः परतरं ज्ञेयं पश्चिमे निर्मलं मणिम् ॥ १५५ ॥

श्रीपादं प्रभुमानन्दं योगशक्तिक्रमेण तु ।

हाटकाख्यं सदा ज्ञेयं मिश्रं वामेऽपि दक्षिणे ॥ १५६ ॥

क्वचिदन्येष्वविज्ञेयं कुलशासनतत्परैः ।

घरपल्लिक्रमं तत्र समासादुपवर्णितम् ॥ १५७ ॥

चतुर्धा शक्तिपूर्वं स्यादादितो गुरुपर्वगम् ।

शिवसंज्ञं तथा ज्ञेयं तुर्यधा पारमेश्वरम् ॥ १५८ ॥

भैरवे तु यथा ज्ञेयं रुद्रान्तं सर्वदा प्रिये ।

चतुर्धा वामगा ज्ञेया गणसंज्ञा विशेषतः ॥ १५९ ॥

षोढा तु षष्ठैः पूर्वोक्ता : एवं विंशति कीर्तिता : ।

अत्र प्रक्रमभेदेन विचार्याचारभेदतः ॥ १६० ॥

अव्यक्तक्रमभेदोऽत्र विज्ञेयः पारमेश्वरे ।

प्रक्रमेण क्वचिज्ज्ञेयं सिद्धान्तादिषु सर्वदा ॥ १६१ ॥

तन्त्रेषु सर्वदा सिद्धिं विशेषे ज्ञातिकीर्तितः ।

विद्यापीठेऽपि विज्ञेयो विधिमेतन्महार्थद ॥ १६२ ॥

एवं भेदप्रभेदोऽपि येन ज्ञातं समन्वयम् ।

सगुरुः पाशहा ज्ञेयो मायामायाविवर्जितः ॥ १६३ ॥

ऊर्ध्ववक्त्रे षोडशधा मन्त्रोच्चारक्रमः स्मृतः ।

Sampath_eBooks

मध्यनाडीक्रमेणैव प्रविभज्य शृणुष्व तत्॥ १६४ ॥

अकारश्च उकारश्च मकारश्चापि बिन्दुकम्।

चन्द्रचण्डनिरोधाख्यनादनादान्तशक्तिगा ॥ १६५ ॥

व्यापिनी समनाख्यश्च तथान्यश्चोन्मनः परः।

गुरुवक्त्रं प्रशान्ताख्यं विषुवं स्पर्शसंज्ञकम्॥ १६६ ॥

विसर्गं षोडशं ज्ञेयं शिखाभेदव्यवस्थया।

एतद् रहस्यमन्त्रोक्तं क्रियाचारगुरोःस्थितः॥ १६७ ॥

पूर्वे बिन्दुः समाख्यातश्चतुर्धा व्यक्तिभेदतः।

निवृत्ताख्यः प्रतिष्ठाख्यो विद्याख्यः शान्तिगोऽपरः॥ १६८ ॥

चन्द्रार्धमध्यगो ज्ञेयः प्रस्फुरत्किरणाकुलः ।

दशवर्णः समाख्यातः शुक्लादिक्रमभेदतः॥ १६९ ॥

पञ्चधा पतिभेदेन ग्रन्थिभेदादपि स्थितः।

ब्रह्मविष्णुस्तथा रुद्र ईश्वरश्च सदाशिवः॥ १७० ॥

पृथिव्यापस्तथा तेजो वायुराकाशमेव च।

भूताश्च पतयः प्रोक्ता ग्रन्थयः शृणु सांप्रतम्॥ १७१ ॥

हठब्रह्म तथा बिन्दुः कण्ठताल्वथ बिद्रुके।

विद्यादावर्तघोरेण भेद्यं लभ्येत तत्पदम्॥ १७२ ॥

अघोरे घोरसन्देहःषट्चक्रे क्रमपद्धतिः ।

क्रमव्युत्क्रमयोगोऽत्र त्रिनाडीपरिपेलवः ॥ १७३ ॥

Sampath_eBooks

करणावलिविश्रान्त्या विद्युदाघातयोगतः।

तद्योगमाप्नुयाद् योगी तद्वत् सान्ते सदाद्वयी॥ १७४॥

वामेऽपि पञ्चधा ज्ञेयं तस्य सम्यङ् निशामय ।

पटः प्रकाशपङ्क्तिश्च चतुरश्चात्र चतुर्थकः॥ १७५॥

अलंग्रासः पञ्चमः स्याद् वृत्तिभेदोत्र कीर्त्यते।

पटापत्रान्ययोगेन त्रिचतुर्दशधा स्मृतः॥ १७६॥

तत् प्रवाहविकासाभ्यां स्थितिव्यक्तिप्रभेदतः।

अन्तश्चक्रस्यसंयोगाच्चक्रैर्वैभिन्नसंशयः॥ १७७॥

प्रकाशः पञ्चधा ज्ञेयस्तथान्यश्चाष्टधा स्मृतः।

पश्चधा शिवशकत्याख्यभेदाद् भैरवभेदतः॥ १७८॥

तद् ब्रूहिरूपाद् विज्ञेयो महाक्रमविचक्षणैः।

वसुधा वसुयोगेन पररश्मिविराजितम् ॥ १७९॥

महाभैरवयोगेन व्यक्ततामेति सर्वदा।

आनुलोम्याच्च पञ्चानां षण्णामथसमस्तके ॥ १८०॥

व्यक्तिरुद्योगभेदेन हेलाप्रेंख्य विचारणे।

पङ्क्तिरत्र समुद्दिष्टा भूमिकाक्रमणैव हि॥ १८१॥

भूमेर्व्यक्तिस्त्रिधा प्रोक्ता कङ्कालाकारवेदनात्।

विलापाद् व्यक्तियोगाच्च भैरवाकारवृत्तितः॥ १८२॥

मायाङ्कुशप्रयोगेन सन्ताने व्यक्तिमेति हि।

अलंग्रामे पुरोक्तं स्याद् अष्टधा पञ्चधा च यत्॥ १८३॥

षोढा चतुर्दशाख्येन तन्त्रसंहार वृत्तितः।

स्फुरच्च भैरवव्यक्ता तदवष्टम्भयोगतः॥ १८४॥

तद्व्यक्तिमेति सहसां कुञ्चिकोद्घाटमन्त्रितम्।

पश्चिमे ज्ञत्वकर्तृत्वव्यक्तिचारविभेदतः॥ १८५॥

स्थितिप्रत्यासयोगेन षड्भूमिप्रविभागतः।

त्रिशून्यगतिसर्वस्य बाह्याभ्यन्तरविक्रमात्॥ १८६॥

तत्र व्यक्तिमुपायातं मध्योभयविचारतः।

यातायातौ महाघोरौ चन्द्रसूर्यविभेदतः॥ १८७॥

तत्र ज्ञेयौ सदा सम्यग् विषुवत्क्रममत्र च।

पातालवक्रे व्यस्तास्ते भूमिभेदात् पृथक् पृथक्॥ १८८॥

कालाग्निदंष्ट्राद् योगोऽत्र चन्द्रदंष्ट्राविलासकम्।

वज्रभेदक्रमं चात्र महार्गलविचारणम्॥ १८९॥

समङ्गमङ्गलं चात्र अवबोधो व्यवस्थितः।

मुण्डत्वं गण्डधानात् त्रिपञ्चप्रसवता तथा॥ १९०॥

क्रमभेदविचारेण तत् सर्वत्र व्यवस्थितम्।

गुरुपर्वक्रमायातं रहस्यं परमाद्भुतम्॥ १९१॥

स्रोतःसु षट् सुविज्ञेयं सन्तानक्रमभेदतः।

दुष्प्रापमेतद् विज्ञेयं सिद्धवीरगणस्य च॥ १९२॥

Sampath_eBooks

गुरुवक्त्राच्च लभ्येत गुरुरेवात्र कारणम् ।

सन्ताने चोपदेशे च सचराचरसंगतौ संगतौ ॥ १९३ ॥

गुरुरेव शिवः साक्षान् मानवी मूर्त्तिमास्थितः ।

उत्तारयत्यणुं सम्यगस्मात् संसारसागरात् ॥ १९४ ॥

निर्वाणविलसद्योगयोग्यत्वापादनक्षमः ।

तस्मात् स बन्धुः स पिता गतिः सा पारमेश्वरी ॥ १९५ ॥

कोऽन्योऽस्ति सदृशस्तेन जगत्यस्मिञ्चराचरे ।

तदुपायं न विद्येत येन तस्यानृणी भवेत् ॥ १९६ ॥

ब्रह्माण्डं हेमसंपूर्णं रसायनविपूरितम् ।

यद्यसौ गुरवे दद्यात् तदप्यनृणता न हि ॥ १९७ ॥

स शिवः सा भवेच्चक्तिर्देवो भैरवः स्मृतः ।

सा देवी परमा काली गुरुर्मन्त्रमहेश्वरः ॥ १९८ ॥

बिन्दुचक्रपथांतस्थो व्यक्तिचारप्रभेदतः ।

सर्वाचारी क्रमज्ञानी स गुरुर्भैरवागमे ॥ १९९ ॥

यस्य भावानभिव्यक्ता विचारगतिगोचरे ।

चण्डार्गलपदान्तस्थः स गुरुर्भैरवागमे ॥ २०० ॥

षट्स्रोतः स सदा ज्ञाता व्यक्तिचारक्रमागते ।

शास्त्राचारक्रमेणैव स गुरुर्भैरवागमे ॥ २०१ ॥

प्रतिस्त्रोतसि या व्यक्तिः सरहस्यार्थवेदकः ।

Sampath_eBooks

यस्तु मूर्त्त्यन्तरावासी स गुरुर्भैरवागमे ॥ २०२ ॥

यस्य तृणसमं वित्तं चित्तं शैलेन्द्रसन्निभम् ।

सर्वारम्भपरित्यागी स गुरुर्भैरवागमे ॥ २०३ ॥

यस्य वक्त्रा चले चित्ते चतुर्दन्ते भयावहे ।

सदा वसतिरेवान्तःस गुरुर्भैरवागमे ॥ २०४ ॥

यस्य भूतान्तरस्थायि ग्राह्यभावरतो मनः ।

ग्राहकस्थः सदा सम्यक् स गुरुर्भैरवागमे ॥ २०५ ॥

यस्यान्तरे सदा बाह्ये मध्ये वृतिषु भूमिषु ।

निश्चलत्वं स्थिरत्वं च स गुरुर्भैरवागमे ॥ २०६ ॥

यस्य सर्वविकल्पान्तं स्फुरत्समुद्भवः ।

निर्विकल्पतया सम्यक् स गुरुर्भैरवागमे ॥ २०७ ॥

यस्य चक्रस्थितिर्व्यक्ता लयालयविभेदतः ।

महालयव्यवस्थानात् स गुरुर्भैरवागमे ॥ २०८ ॥

पञ्चपञ्चार्थविद् वीरः पञ्चपञ्चार्थपारगः ।

पञ्चोदयी पञ्चरामी स गुरुर्भैरवागमे ॥ २०९ ॥

पञ्चान्तिमः पञ्चवपुः पञ्चाचारविराजितः ।

पञ्चार्थविद् गुहावासी स गुरुर्भैरवागमे ॥ २१० ॥

पञ्चधारी पञ्चहास्यः सदापञ्चोत्कटो हि यः ।

यं यं मुद्राधरो नित्यं स गुरुर्भैरवागमे ॥ २११ ॥

षट्चक्री सत्वरारुढः षट्स्रोतः षड् विलापकः ।

षड्गर्भः षड्वपुर्भोक्ता स गुरुर्भैरवागमे ॥ २१२ ॥

षट्चक्रवित्तदन्तस्थो षड्व्योमाचारसंस्थितः ।

षड्जलेशो कलाव्यापी स गुरुर्भैरवागमे ॥ २१३ ॥

षट्स्रोतविच्चषट्पादवित् षोढा पूरणात्मकः ।

षडाश्रमान्तरस्थो यः स गुरुर्भैरवागमे ॥ २१४ ॥

सप्तसप्तिलयान्तस्थः सप्तसप्तिविचारकः ।

सप्तरन्ध्रगतिर्व्यापी स गुरुर्भैरवागमे ॥ २१५ ॥

सप्तार्चिर्मध्यसंस्थायी सप्ताचिर्गतिरोधकः ।

सप्तवाहगमारूढः स गुरुर्भैरवागमे ॥ २१६ ॥

सप्तसिन्धुवहे मार्गे सप्तसङ्घट्टसुन्दरे ।

संस्थितिर्यस्य नियतं स गुरुर्भैरवागमे ॥ २१७ ॥

अष्टापदैर्वाष्टगमी सत्ता चाष्टसु सर्वदा ।

अष्टाष्टकगतिर्व्यापी स गुरुर्भैरवागमे ॥ २१८ ॥

अष्टानामष्टधा रूढाः पदव्यक्तिक्रमेण यः ।

अष्टधा स्फुरते साधु ः स गुरुर्भैरवागमे ॥ २१९ ॥

नवचक्रवरान्तस्थो नवनाभः सुनाभिगः ।

नवानवतिगर्भास्यः स गुरुर्भैरवागमे ॥ २२० ॥

नवद्वारां नवान्तस्थो नवसंचारनिर्भरः ।

नवतत्त्वेश्वरो यो वै स गुरुर्भैरवागमे ॥ २२१ ॥

नवान्तगो नवारूढो नवरत्नकृतश्रमी ।

नववीरकृताटोपो स गुरुर्भैरवागमे ॥ २२२ ॥

दशधा दशसन्धानविचित्ररचनोल्वणः ।

दशभूमिपदान्तस्थः स गुरुर्भैरवागमे ॥ २२३ ॥

दशकौलेश्वरो धीमान् दशवित्कुलभैरवः ।

दशाश्वमेधमध्यस्थ ः स गुरुर्भैरवागमे ॥ २२४ ॥

एकादशकुलेशानो रुद्रैकादशविग्रही ।

एकादशान्तविद् वीरः स गुरुर्भैरवागमे ॥ २२५ ॥

एकादशेन्द्रियजयी दशैकप्रसरस्थितः ।

एकादशाखण्डिताङ्गः स गुरुर्भैरवागमे ॥ २२६ ॥

द्वादशान्ते द्वादशधा प्रतिस्थानविभेदतः ।

द्वादशस्वरचक्रेशः स गुरुर्भैरवागमे ॥ २२७ ॥

द्वादशात्मा विचारेण द्वादशग्रन्थिगोचरे ।

द्वादशार्क क्रमान्तस्थः स गुरुर्भैरवागमे ॥ २२८ ॥

त्रयोदशगुहावासी त्रयोदशसु चर्चितः ।

त्रयोदशान्तरज्ञो यः स गुरुर्भैरवागमे ॥ २२९ ॥

त्रयोदशविधा यस्य द्विधा नास्ति त्रयोदश ।

तदतीतस्तदन्तस्थः गुरुर्भैरवागमे ॥ २३० ॥

Sampath_eBooks

चतुर्दशपदान्तस्थश्चतुर्दशविराजितः ।

चतुर्दशविहीनो यः स गुरुर्भैरवागमे ॥ २३१ ॥

यच्चतुर्दशभङ्गिस्थं तन्मध्यप्रविकासकः ।

चतुर्दशात्मविज्ञानी स गुरुर्भैरवागमे ॥ २३२ ॥

यः पञ्चदशसंस्थायी त्रिधा पञ्चदशात्मकः ।

दशपञ्चतिथिर्भोक्ता स गुरुर्भैरवागमे ॥ २३३ ॥

षोडशाधारचक्रेशः षोडशस्वरपालकः ।

षोडशान्तकलाधारी स गुरुर्भैरवागमे ॥ २३४ ॥

सप्तादशान्तरालीनः सप्तादशपदोज्झितः ।

सप्तादशान्तगो यस्तु स गुरुर्भैरवागमे ॥ २३५ ॥

एकाकी ह्येकविन्नित्यं यश्चैकपदनायकः ।

एकाक्षरैकचक्रस्थः स गुरुर्भैरवागमे ॥ २३६ ॥

द्वन्द्वयुद्धी द्वन्द्वचारी द्वयोरन्तर्गतः सदा ।

द्विपदोज्झितमार्गस्थः स गुरुर्भैरवागमे ॥ २३७ ॥

त्रिस्थानवित् त्रिलक्षस्थत्रिव्योमान्तरचारकः ।

त्रिनाडीचक्रकुण्डस्थः स गुरुर्भैरवागमे ॥ २३८ ॥

चतुर्धा क्रमविस्फारश्चतुर्धा सन्ततिः सदा ।

चतुर्धा क्रोधचण्डो यः स गुरुर्भैरवागमे ॥ २३९ ॥

अवधूतो निराचारः सर्वाचारान्तरस्थितः ।

आचारसन्ततेर्ज्ञानी स आचार्यः प्रकीर्तितः ॥ २४० ॥

षोढामार्गविभेदेन व्यवहारश्च शाङ्करः ।

तन्मार्गदैशिको यस्तु सनित्यं दैशिकः स्मृतः ॥ २४१ ॥

गुरुरेकस्त्रिधा पूज्यो यथादेवस्तु भैरवः ।

स बन्धुः स प्रभुः स्वामी स दाता स च पालकः ॥ २४२ ॥

स उद्धर्त्ता भवागाधादपाराच्चातिदुस्तरात् ।

स ब्रह्मा स च वै विष्णुः स रुद्रः स च ईश्वरः ॥ २४३ ॥

स देवदेवो विज्ञेयः सादाख्यः परमेश्वरः ।

स भैरवः सुषुम्नोऽसौ स शिवः परमाक्षरः ॥ २४४ ॥

सशक्तिः स भवेत् काली स च कङ्कालपालकः ।

एवं गुरुः सदाचारी दीक्षाव्याख्यानकृत् स्मृतः ॥ २४५ ॥

पुरोधोवत् सदा व्याख्याकर्तव्याचारसंयुतः ।

श्रीदेव्युवाच ।

आचारक्रमसंस्थानां यथासंस्थानभेदतः ॥ २४६ ॥

अवतारक्रमेणैव कथमाचारसंस्थितिः ।

ज्येष्ठानुक्रमयोगेन तथाख्याहि महेश्वर ॥ २४७ ॥

श्रीभैरव उवाच ।

कृतव्याकृतमेवं हि श्रोता यश्चुम्बकेश्वरः ।

गोत्रसंवाहनं कृत्वा प्रणिपत्य पुनः पुनः ॥ २४८ ॥

Sampath_eBooks

व्याख्व्यालेख्यं सकुसुमं मार्ज्यान्तः स्थाणुमाचरात्।

स्नानादिवह्निकर्मान्तः कर्मणा स च आददेत् ॥ २४९॥

भ्रातृभिः पुत्रकैः सार्द्धं स्वस्तिकानामिकैर्गुरुः ।

बुभोज सुप्रसन्नस्तु यथासंभवभोजनम्॥ २५०॥

ज्येष्ठानुक्रमतः स्वाप्य क्षयन्ती वैदिकादिका ।

अधिकारविभेदेन पङ्क्तिभेदोऽत्र कीर्तितः ॥ २५१॥

चतुर्वर्णविभेदेन वामतन्त्रमिदं यतः।

चतुर्णां वर्णिनां देवि लिङ्गं साधारणं स्मृतम्॥ २५२॥

द्विरूपमपि तन्त्रेऽस्मिल्लोकसंवृत्तिहेतवे।

येनापवादमायान्ति गुरूणां गुरुगौरवम्॥ २५३॥

तत्कर्मणा प्रकर्तव्यं प्राणैः कण्ठगतैरपि।

गुरुप्राधानिकं शैवं सदाचारो यदा न सः॥ २५४॥

तदा लाघवमायाति शिवस्तज्ज्ञानमेव च।

तयोर्लाघवकर्ता यस्तन्निन्दाफलमाप्नुयात् ॥ २५५॥

तेन चापि निरुद्धस्य भोगमोक्षौ सुदुर्लभौ।

नैकस्य चुम्बकस्योक्तं चतुर्णामपि सुन्दरि॥ २५६॥

फलैषिणां हि सामान्यं शास्त्रोक्तप्रतिपालनम्।

विद्याविनयसम्पन्ना लोकवृत्तान्तपालकाः॥ २५७॥

शास्त्राभ्युन्नतिकर्तारो यान्ति परां गतिम्।

गुप्तवृत्तास्तु योगिन्यो गुप्तरश्मिः सदाशिवः॥ २५८॥

गुप्तवीर्यानुसङ्घातो गुप्तमौषधिजम्बलम् ।

गुप्तं तत् परमं तत्वं गुप्तास्ताः सर्वसिद्धयः॥ २५९॥

यद्यदत्र प्रधानन्तु तत्सर्वं गुप्तगोचरम्।

साप्यसाधनभावेन फलं यत्र प्रतिष्ठितम्॥ २६०॥

मुखाग्नौ तत्र ये प्रोक्ता क्रियाज्ञानञ्च चुम्बकैः।

साधनं फलयुग्मस्य तन्त्रे भैरवभाषिते॥ २६१॥

गुप्तवृत्तो गुरुर्गुप्तसंप्रदायश्च शम्बरः।

गुप्ता क्रिया च निर्व्याजं साधनं साध्यवस्तुनः ॥ २६२॥

न क्रिया भावमायाति साध्येऽर्थे प्रकटा क्रिया।

रजसेव वा त्रिकाणां रसवद् वा हितात्मनाम्॥ २६३॥

अगुप्तसंप्रदायं यज्ज्ञानं लोके विजृम्भते ।

सामान्यविषयं तद्धि योगिनीनां विशेषगम्॥ २६४॥

तच्चापि गुप्तसद्भावगुप्तवृत्तप्रभावतः।

वैशेषिकेण रूपेन चरन्त्यत्र महाबलाः॥ २६५॥

साधको गुप्तवृत्तस्तु न लोकेनाभिभूयते।

तस्यानभिभवाच्चापि प्रपद्यंतीश्वराजनाः॥ २६६॥

तेभ्योऽर्थसम्भवस्तस्माद् विमलायाति संभवः।

तत्प्रीणितो गुणान्वीरश्चिनोति विविधैः सुखैः॥ २६७॥

Sampath_eBooks

तस्मादध्वस्तदृष्टेषु संवृत्तं साधकात्मनाम्।
लोके जुगुप्सितं साधु तद्बाधान्निश्चितं फलम्॥ २६८॥
सर्वगुप्तिः सनागानां व सनाग्रानां फलार्थमुपयुज्यते।
ज्ञानगुप्तिविरक्तानां संप्रदायस्य च प्रिये॥ २६९॥
स्वस्वार्थैकपरो लिङ्गी भोगतृष्णापरोऽच्युतः।
इतरोऽभिलाषसंपर्कात् परार्थैकफलो मतः॥ २७०॥
भोगोपादानमुदिष्टं मलं मोक्षस्य तत्क्षयः।
अभिलाषानुमानेन स च सिद्धोऽत्र शासने॥ २७१॥
मायैषासन्न एवात्र भोगसम्पादिका मता।
भोगिनां मुक्तरागाणां मुक्तरागाच्च मुक्तये॥ २७२॥
न लिङ्गे रागयुक्तानां प्रशस्तं वामलिङ्गिनाम्।
मयापि हि परित्यक्तं त्वल्लाभे वृत्तिशङ्कया॥ २७३॥
तस्माद् व्रतं यथा वामात् प्रार्थ्य यच्चति चुम्बकः।
व्रतिने समर्पयेत् तद्वद् विभुर्योगे कृते सति॥ २७४॥
पदार्णाणुकलातत्त्वशक्तिभिर्वा प्रतिष्ठयेत्।
कृते तु भैरवे यागे चुम्बको जटिनां जटी॥ २७५॥
शुद्धतत्त्वाश्रितो योगं योगान्ते निस्पृहो नरः।
न स रागीति वक्तव्यो योग्यत्वादुत्तरे परे॥ २७६॥
उद्भवाभिभवस्थानप्राप्त्यानंतरयोगतः।

Sampath_eBooks

एतदेवान्तरं तत्र यत्क्रीडोपशमात्मकम् ॥ २७७ ॥

इत्येवं गुप्तवृत्तस्तु लोकशास्त्रार्थनिश्चयी ।

दैशिको भावनानन्दः क्रियावाचोऽश्नुते फलम् ॥ २७८ ॥

परापरं महामार्गे परस्यापि प्रयच्छति ।

ततो भुक्तोऽन्तरे दिव्ये पर्यङ्के स्तरणान्विते ॥ २७९ ॥

सुप्रसारितदेहस्तु विनिद्रो दिवसे सदा ।

चक्रवर्त्तिविलासाढ्यः कलाकौतुकदर्शनैः ॥ २८० ॥

किञ्चित् कालं गमित्वा तु दानशीलः सदैव हि ।

दीनान्धकृपणेभ्यस्तु बन्दितेभ्यो विशेषतः ॥ २८१ ॥

येन येन हि सत्त्वानामुपकारः प्रजायते ।

तेन तेन हि कर्तव्यो दिव्यमानेन वस्तुना ॥ २८२ ॥

अन्वेष्यं वित्तमेवैकं पात्राद्यं न महात्मना ।

न वर्षां वीक्षते मेघो नापि तारापतिर्महीम् ॥ २८३ ॥

पुराणनाटकाख्यादिगोष्ठीमण्डलसंस्थितः ।

दिनशेषं क्षिपेन्मन्त्री शेषं च सदसि स्थितः ॥ २८४ ॥

स्थास्त्वागङ्नुकलोकस्य गन्तुकलोकस्य स ह्यथर्वकृतादरः ।

स करोतु तमिश्रान्ते सन्ध्यावन्दनके कृते ॥ २८५ ॥

विक्षिप्तैकतमोऽह्नस्तु संपूज्य गुरुपादुके ।

लिङ्गविद्यारतस्तेन प्रणमेत् स्थाणुमादरात् ॥ २८६ ॥

Sampath_eBooks

पादाभ्यङ्गे कृते गन्धैर्लिप्ताङ्गश्चन्दनेन वा।

मृदुनी लघुनी श्लक्ष्णे वाससी विनिवेश्य च॥ २८७॥

कर्पूरपारिकामिश्रताम्बूलापूरितानन: ।

यामस्यार्द्धथयामे वा गते यायाद् रतिगृहम्॥ २८८॥

चित्रवस्त्रवितानाढये दिव्यधूप सुधूपिते ।

चन्द्रमण्डलसंकाशे तल्पे तत्र स्वपेद् गुरुः॥ २८९॥

स्नेहसद्भावविनयैः कुलेन च विशुद्धया।

जायया तु सुरूपिण्या समेतः सगृही यदि॥ २९०॥

सामान्यविषयाः सर्वे संभोगे गृहलिङ्गिनोः।

वर्जयित्वा तु संपातं हरिद्रामिषयोषिताम्॥ २९१॥

मधुगृञ्जनपूर्णानि शिष्टसिद्धानि यानि च।

सेव्यान्या यत् सुसर्वाणी वर्ज्या यत् स्वपिकामिनी॥ २९२॥

ब्रह्मचर्यप्रधानस्तु लिङ्गी सर्वत्र कीर्तितः।

तत्प्रवीणोऽन्यविषयान् सेवन्नपि न बाध्यते॥ २९३॥

कामतन्त्रप्रविष्टेन क्रमेणावर्जितः प्रियः।

कामक्रीडाविधानज्ञः कामिनीकामलालसः ॥ २९४॥

कामयेद् दत्तशर्मा तु चुम्बनालिङ्गनादिभिः।

नाचित्तां नामुखग्रस्तां संनिद्रां दापिनां शुकाम्॥ २९५॥

कामयेज्ज्ञातकामोऽपि कामिनीं काम्यकामुकः।

Sampath_eBooks

न चाप्राप्यरता त्याज्या कामयेन्नरताप्तये ॥ २९६ ॥

न चाक्लिन्नभगा नारी भजनीया विपश्चिता ।

यथा यथा प्रक्षरते नितम्बमालिङ्गनालेखनचुम्बनाद्यैः ॥ २९७ ॥

तथा तथा तृप्यति काम्यमाना कान्तारतेर्बन्धविशारदैव ।

अङ्गेषु अङ्गान्यपि नक्षिपन्ती वक्रे च वक्रं सुतरां स्थपन्ती ॥ २९८ ॥

प्रस्फालयन्ती व नितम्बमुच्चैरनेन कान्ता दयितं विनोति ।

रतेन यस्या मुकुलन्ति नेत्रे न स्पन्दते हृन्न च गात्रकम्पः ॥ २९९ ॥

निष्वेदिनौ चेन्दुरूची कपोलावनिच्चकामारहितां भजेत ।

आस्वादते या रतनिर्वृतापि स्वाद्रुप्रियस्याधरपल्लवेन्दुम् ॥ ३०० ॥

प्रोच्चुम्बनालिङ्गनराशिभूया सानुरागा रतमार्गयोग्या ः ।

श्वासशीला सततं विचिन्ता निद्रालसाह्वैव च कोपयुक्ता ः ॥ ३०१ ॥

स्वार्थैकनिष्ठानुगता तु नित्यं कान्ता रते दुःखकरी नराणाम् ।

दृशि स्थिते प्रेयसि व प्रेषसि चित्तजन्मा प्रवर्द्धमानो हृदि कम्पपूर्वा ॥ ३०२ ॥

नाविष्करोद्य च गता विलासान्यस्याः प्रिया सा न हि सानुरागा ।

सर्वार्थैसिद्धिर्भवति प्रभुत्वादेकां रतिं वर्ज्य रते बलानाम् ॥ ३०३ ॥

तस्मान्महत्वं स्वभुतां विहाय निर्वाणलाभाय कुरुष्व सर्वम् ।

सततमनङ्गमनङ्गे सेवन्नपि निर्वृतिं कुरुते ॥ ३०४ ॥

गौरि समोऽपि नरो यो निष्क्रमति हृदः स वनितानाम् ।

Sampath_eBooks

निर्वाणैकपराणां मृदुगुणहृतचेतसां सदा पुंसाम् ॥ ३०५ ॥

न चलन्ति च व वत सीत्काराद् दयितागुप्तात्मरागाणाम् ।

रागिण्यनुरागपराः नु सन्ति विरागाय विरागिण्ययास्तरागा ये ॥

३०६ ॥

प्रेयसि मदनपराभवरहितास्ते कालोके ।

न वदन्ति च तदा दोषं पुरतो येऽन्यस्य सदपि गुणविभवम् ॥ ३०७ ॥

असदपि ये चाप्यूचुस्तेषां रतिनिश्चलं प्रेम ।

भूर्यपि समक्षविभवं मन्यन्ते योषितो न सदुपकारम् ॥ ३०८ ॥

तृणतनुतनोः परोक्षे यथा हि अकृतकदृढस्नेहम् ।

अनुरज्यति गुणयोगाद् दोषवियोगाच्च सोत्तमा नारी ॥ ३०९ ॥

इतरा समञ्जसगतिर्दोषगुणाभ्यां वशं याति ।

ईर्ष्यान्तः खलु कोपो ह्यन्तर्गमनाच्च ह्रीपरित्यागः ॥ ३१० ॥

दानातिशयाल्लोभः परिभवनं चातिसंपर्कात् ।

उदयत्यकामुकानां प्रसङ्गतो योषितामवश्यं भवश्ये हि न ॥ ३११ ॥

तदुदयभयतस्तस्माद् ईर्ष्याद्यं खलु परित्याज्यम् ।

सकलकलागुणनिलयो दयितां यो रमति विदितविटवृत्तः ॥ ३१२ ॥

भावितविनोदभावः स काममुखमश्नुते ।

कामी एवं निषेवितरतिः स्वयं स्वपेत् सुखनिद्रया ॥ ३१३ ॥

प्रातरुत्थाय वीरेन्द्रः प्रागुक्तन्तु समाचरेत् ।

Sampath_eBooks

सर्वं व्याख्यावसानन्तु यदि स्वाध्यायनोदितम् ॥ ३१४ ॥

अनध्यायेषु देवेशि देशनाग्रन्थवाचनम् ।

द्विगुणं वाह्निकं कार्यं स्नाप्यो लिङ्गीऽथ वा हरः ॥ ३१५ ॥

देवमुद्दिश्य वा कार्यो विहारः श्रमहेतवे ।

क्रिया वा देशिकेन्द्रेण व्याख्येया पञ्जिका गता ॥ ३१६ ॥

प्रक्रियाभावनां वाथ योगं वाथ समभ्यसेत् ।

त्रयाणां संमतादीनां ब्रूयाद् यः पञ्जिकाक्रमम् ॥ ३१७ ॥

स तद्व्याप्तिमवाप्नोति यद्वा व्युत्क्रमकारकः ।

स्वकार्यभयलोभेन स्नेहाच्चैवोपरोततः ॥ ३१८ ॥

निषिद्धिमाचरेद्यस्तु प्रायश्चित्ती भवत्यसौ ।

उक्तं वृत्तं गुरुजनगतादेशमालेख्यतन्त्रम् ॥ ३१९ ॥

तन्त्रे तन्त्रे सुवचनवशात् कीर्तितं यन्मयासीत् ।

तत् संक्षिप्तं विशदमखिलं प्रोदितं ते च राजन् ।

भूयो भ्रान्तं यदिह भवतः प्रश्नतो वच्मि तद्धि ॥ ३२० ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्रे प्रथमषट्के श्रीकालसंकर्षण्यां चुम्बकचर्या पञ्चचत्वारिंशतिः पटलः ॥ ४५ ॥

षड्चत्वारिंशतिः पटलः ।

श्रीदेव्युवाच ।

मूर्द्धव्यालशिरोरत्नदीप्तध्वस्तशिरस्तमः ।

वालेन्दुरश्मिसंस्पर्शप्रवृद्धध्वनिधारकः ॥ १ ॥

केषु देव न सीदन्ति धीपानाः समवस्थिताः ।

दोषाञ्जिताः सुसिध्यन्ते कथमेतद् ब्रवीहि मे ॥ २ ॥

श्रीभैरव उवाच ।

अष्टमी कौमुदीभूता षोडश्येका च या तिथिः ।

तां स्वधीय ं क्षयं यान्ति कृष्णनाभ्यब्जजोऽपि हि ॥ ३ ॥

विधिग्रहाम्बिकां भोज्य शब्दयोरप्यथैव च ।

मध्याष्टकाक्षयतिथावापत्सु रविचन्द्रयोः ॥ ४ ॥

नित्यानां ध्यानसंस्थानमेतत् ते समुदाहृतम् ।

नैमित्तिकादिका ह्यन्ये प्रोच्यन्ते तेऽवधारय ॥ ५ ॥

मण्डलीकमहीपाल गुरुसाधकसंप्लवे ।

दशपञ्च तदर्धञ्च नाध्येयं दिनसंख्यया ॥ ६ ॥

स्वगुरोरव्यये जाते सांवत्सरे क्रतौ ।

व्याख्यादिकं प्रशस्तं तु न व ना त्याज्यो गौरवोदितः ॥ ७ ॥

स्नानदानतपःप्राप्तावुक्तं पञ्चत्वसंश्रुतौ ।

प्रजातपूजके स्नात्वा पृष्ठशोच्या किरेद् गुरुः ॥ ८ ॥

प्रदीपनदितोल्काया दर्शने सन्मते मृते ।

सरत्केकलहे शान्ते गर्जिते कालवर्षिते ॥ ९ ॥

प्लवङ्गप्लवहे व्याख्या तत्कालान्ते प्रशंसिता ।

तत्कालिका स्मृता ह्येता तावत्कालमतः शृणु ॥ १० ॥

गोदिकाश्यादिभिश्चिन्ने व्याख्यामध्ये तु पुस्तकम् ।

संपूज्याप्याकृतिः कार्या स्नात्वा चान्त्यादिकेऽपि च ॥ ११ ॥

अनाध्यायास्तथान्ये च तावत्कालाः् काला स्मृताः प्रिये ।

तद्विज्ञाय प्रकर्तव्यं शास्त्रोक्तं न विलङ्घयेत् ॥ १२ ॥

तत्र तल्लङ्घनाल्लोके नाभीष्टं प्राप्यते क्वचित् ।

अशिष्टकर्मणोन्मत्ते प्रायश्चित्तिः प्रशस्यते ॥ १३ ॥

विमलीकरणापात्र विशेषात् क्रूरयामले ।

अनिरोधाद् विमुच्यन्ते प्रायश्चित्तेन दीक्षिताः ॥ १४ ॥

ज्ञानयोगरतानान्तु प्रायश्चित्तन्तु तात्विकम् ।

तेन तन्निर्मलाविष्टौ प्रायश्चित्तं विरुद्धयते ॥ १५ ॥

विश्वभावविमुक्तानां वस्तुभेदावकल्पिनाम् ।

प्रकृतिर्व्यज्यते स्वस्था सुस्थातानामयोगिनाम् ॥ १६ ॥

सप्रपञ्चाशया येऽत्र ये द्विरूपक्रियामताः ।

ते मलालेपमायान्ति प्रायश्चित्तं हि तत्क्षयः ॥ १७ ॥

अभिधानविमुक्तं यद्यत् संकल्पविवर्जितम् ।

कर्मभिस्तत्क्षतं कर्म व कर्म वन्ध्याकुसुमवद् भवेत् ॥ १८ ॥

तस्माद् गुप्तमगुप्तं वा यत् कृतं कर्म दीक्षितैः ।

Sampath_eBooks

तदुद्दिश्य प्रकर्तव्यं प्रायश्चित्तमथेतरम् ॥ १९ ॥

यियासवः परां काष्ठां संवृत्ता ये न संस्थिताः ।

तेषां पर्य्यनियोगोऽयं प्रायश्चित्तात्मकं नहि ॥ २० ॥

बुभुक्षवो भुजागारान् मुक्ता युक्ता विवेकिनः ।

लुप्ताचारानुरुध्यन्ते प्रायश्चित्तविवर्जिताः ॥ २१ ॥

प्राप्तैषिणामुद्धवं तु पदमुक्तं हितैषिणा ।

प्रायश्चित्तं यथा देवि भैरवेन तथा शृणु ॥ २२ ॥

गुरुनिन्दादिकास्त्रीणि सोपवासायुतेन तु ।

अकामादर्जिता दोषाः शुद्ध्यन्ते मूलविद्यया ॥ २३ ॥

कामतो दशधा शुद्ध्यते योगदर्शनात् ।

जयार्थं प्राणहर्ता यो गुरोर्मर्मप्रकाशकः ॥ २४ ॥

त्याज्योऽसौ वीरतन्त्रेषु तस्य शुद्धिर्न कीर्तिता ः ।

अकामतः कृते नग्नो शेषवस्तुविवर्जितः ॥ २५ ॥

अपापस्थानगं देवी प्राणत्यागैकलालसः ।

यावज्जीवमनुष्ठानाज्जन्मषोडशकेन तु ॥ २६ ॥

योगिनीकुलसामान्यः स भविष्यति पापकृत् ।

निन्दको वीरभोग्यानामयुतेन विशुद्ध्यति ॥ २७ ॥

संयमात् सप्तजप्तेन विद्याप्ति हृदयेन वा ।

विवेच्य सर्वतस्तज्ज्ञैर्मुख्यमध्यमकन्यसैः ॥ २८ ॥

दोषस्तेन विनाशाय लक्षायुतशतं समम्।
वर्णजातितपोज्ञानवृत्तान्यालोच्य यत्नतः ॥ २९ ॥
सममुख्यकनीयोऽसौ दोषाः कल्प्या विपश्चिता ।
कन्यास्त्रीसमयस्थानां पत्युर्गंतुर्वधत्रयं ॥ ३० ॥
तेनन् यः कल्मषीभूतस्तद्विशुद्धिं शृणु प्रिये।
प्रसादात् सम्मतं हत्वा प्रयुक्ता शुद्धिमिच्चति ॥ ३१ ॥
सकामः कोटिजापेन कृच्छ्रादिकृतनिश्चयान्।
कामतोऽकामतो वापि द्विगुणं पुत्रकात्यये ॥ ३२ ॥
पुत्रकाद् द्विगुणो दण्डः साधके कामतो हते।
प्रागुक्तो देशिकेन्द्रस्य कामतो नानयोर्मतः ॥ ३३ ॥
कन्याहाकोटिजापेन स्त्रीहन्ता च न शुद्ध्यति।
यावज्जीवं महाकल्पः कपालोदरभोजनः ॥ ३४ ॥
चान्द्रायणाष्टकं कृत्वा कृच्छ्राणां यत्कृतं शतम्।
सर्वे तस्य परित्यागाद् दूषायी सर्वदैव हि ॥ ३५ ॥
यः कामान् कन्यकां हन्यात् स्त्रियं वानपराधिनीम् ।
प्रायश्चित्तं न तस्योक्तं तन्त्रं योगेशिपूजितम् ॥ ३६ ॥
शक्तितन्त्राणि सर्वाणि शक्त्यङ्गानि यशस्विनि।
निष्फलानि च तानि स्युः शक्तिरूपविघातिनाम् ॥ ३७ ॥
मूलोन्मूलितसमा यो दोषाः कन्यावधादिकाः।

भूयः श्रेयसि संयुक्ते प्राचीप्रोदितसंस्थया ॥ ३८ ॥

हत्वा च लिङ्गिनं शैवं पञ्चमन्त्रमहातनुम्।

लक्षायुतेन शुद्ध्यन्ते कामतोऽकामतोऽपि हि ॥ ३९ ॥

अलातिकरशिष्यन्तु हत्वा शङ्खविभूषितम्।

हत्वा येन विशुद्धिः स्याद् विमलेऽपि तदर्धतः ॥ ४० ॥

निपात्य दण्डधर्तारं सौख्ययोगरतं मुनिः।

अयुतेन विशुद्धिस्तुं प्रमाणार्द्धेन तस्य तु ॥ ४१ ॥

विप्रवच्चाक्यसंशुद्धिः शाक्यवज्जैनयोर्द्वयोः ।

अमरस्वर्गुरुः स्वात्यामकामात् कलुषीकृतः ॥ ४२ ॥

शुद्ध्यत्ययुतजापेन मूलोर्घायागमस्थितः।

कामतो द्विगुणाच्चुद्धिर्गुरुदोषं विहाय तु ॥ ४३ ॥

वीरकान्तारतिर्द्वन्द्वी शुद्ध्यन्त्ययुतखण्डतः।

जटाभस्माङ्गिनी क्षौमी तदर्धेन विशुद्ध्यति ॥ ४४ ॥

महद् ब्रतधरापाश्व लिङ्गान्या अपि विप्लुति।

वन्दिते साध्यमार्गस्थे सहस्राद् विमलीभवेत् ॥ ४५ ॥

अकृताधिहारकेयः सोऽधिकाराद् विशुद्ध्यति।

साधको विकृतित्यक्तः पुनर्योगेन शुध्यति ॥ ४६ ॥

अह्नच्चेदे सहस्रेण चिन्नसूत्रे शतेन तु।

नष्टदग्धेऽयुते जप्ते पटे तूरे युतायुतम् ॥ ४७ ॥

Sampath_eBooks

नित्याग्निहोमे शतको नैमित्ते च सहस्रकः ।
काम्येप्ययुतहोमस्तु साधकानामदोषकृत् ॥ ४८ ॥
गुप्ताङ्गदर्शनाच्चुद्धिः हृदयस्य शतं भवेत् ।
आचाराणां च सर्वेषां त्रिस्वरूपं विभाव्य तु ॥ ४९ ॥
एकद्वित्रिगुणं शुद्ध्यै हृदयस्य शतं जपेत् ।
पातकं च विदित्वा तु तथा चैवोपपातकम् ॥ ५० ॥
महापातकसंज्ञञ्च त्रिविधं चेन्निरोधकम् ।
अयुतार्धात् तदर्धाच्च तस्यार्द्धाच्च विशुद्ध्यति ॥ ५१ ॥
एवं हि सर्वदोषाणां विदित्वा गुरुलाघवम् ।
सामान्यार्द्धं विशेषाणां शतमुक्तं सहस्रकम् ॥ ५२ ॥
गुरुदत्तं प्रकर्तव्यमथवा तु गरीयसा ।
तयोरदर्शने स्वल्पमात्मानो दैशिको यदि ॥ ५३ ॥
गुरुवृन्देन दातव्यं यन्महत् प्रविचार्यते ।
प्रायश्चित्तं ततः कार्यं निरोधस्यापनुत्तये ॥ ५४ ॥
गुरुवाचो यदा यातं दोषादोषा विकल्पतः ।
तत् तथैव प्रकर्तव्यं तद्वाक्यं न विलङ्घयेत् ॥ ५५ ॥
गुरुवाचादितुष्टोऽपि शुद्ध्यते मन्त्रसंस्कृतः ।
वाचैव विमलस्या तु जातरूपमिवाग्निना ॥ ५६ ॥
प्रायश्चित्तानि सर्वाणि कार्या कर्माणि यानिं च ।

गुरुदत्तानि तानीह दीक्षितानां फलैषिणाम् ॥ ५७ ॥

समस्तसमयक्षतिप्रबलदोषनिर्णाशकः ।

शशाङ्क शकलार्चितप्रवरवीरसन्दर्शकः ॥ ५८ ॥

विशुद्धविधिरुत्तमप्रकटितोरुसञ्जल्पकः ।

शृणुष्वनुगतां प्रिये गुरुजनस्य चर्यामलाम् ॥ ५९ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्याम् अनध्यायप्रायश्चित्तादिनि

र्णयः षट्चत्वारिंशतिः पटलः ॥ ४६ ॥

सप्तचत्वारिंशतिः पटलः ।

श्रीभैरव उवाच ।

चुम्बकोक्ताशेषगुणसंपन्नः संपन्नः साधको भवेत् ।

स मन्त्राराधकः प्रोक्तः काम्यकर्मणि निश्चितः ॥ १ ॥

तेनावश्यं जपः काम्यः कर्तव्यो नित्यकर्मणः ।

जपस्यानन्तरं देवि शतकस्याह्वसंस्थया ॥ २ ॥

गुरुमन्त्रान्तरं यायान्नासूनां संशयेऽपि हि ।

नान्यमन्त्रपदोच्चारी नान्यानुचरभोजकः ॥ ३ ॥

नान्यसंपर्ककृन्मौनी पौरश्चरणके विधौ ।

नान्यज्ञानाभिगामी च स्वशक्तिन्तु विहाय वै ॥ ४ ॥

रक्षा रक्षितुकामस्तु शक्तिरक्षैकनिश्चितः ।

Sampath_eBooks

प्रियंवदा सुशीला च भक्तियुक्ताभिगामिनी ॥ ५ ॥

निरुग् यो निर्विलासाढ्या वामाचारानुभाविता ।

शान्तचित्ता निरुद्विग्ना सुप्रसन्ना सुरूपिणी ॥ ६ ॥

सुविनीता गुरोर्भक्ता भर्त्तुः शुश्रूषणे रता ।

न कामलोलुपात्यन्तनात्रपा नातिनिर्घृणा ॥ ७ ॥

सोत्साहा सुप्रतिष्ठा च स्वल्पजल्प्याप्यभीतका ।

चातुर्वर्णभवादीनां साधकेच्छाविधायिनी ॥ ८ ॥

दूतीसफलसंप्राप्त्यै प्रशस्ता मन्त्रवादिनाम् ।

उक्तलक्षणसंयुक्ता सहयाज्ञानुमोदिता ॥ ९ ॥

सिद्ध्ये साधकेन्द्राणां सहायपदकाङ्क्षिणाम् ।

देवीव्रतधरो मन्त्री नित्यनेपथ्यकादिषु ॥ १० ॥

उन्मत्तकोऽथशृङ्गारी चापव्रतधरोऽथवा ।

गीतालापविलासाढ्यो नानावर्णोपरञ्जितः ॥ ११ ॥

विचित्राम्बरमालाढ्यो मालाहस्ताद्यनेकधृक् ।

ग्रामचत्वररथ्यासु प्रभ्रमेत् त्वरितः सदा ॥ १२ ॥

गायन् हसन् पठन् रोदन् नृत्तन् वाथ स्वहर्षितः ।

विण्मूत्रारोपितकरस्तदिष्टककरः सदा ॥ १३ ॥

समारञ्जितवक्रश्च रक्तसूत्राङ्गनाशधृक् ।

विषाणावषवच्चन्नप्रकोष्ठो दन्तकर्णिकः ॥ १४ ॥

Sampath_eBooks

स्वभावस्थश्चरन्मौनी क्वचिद्भावं समाश्रयेत्।

भाव्यभावमनोदीप्तो लक्षलीनः क्वचित् स्थिरः॥ १५॥

क्वचिद् विद्याधरोच्चारी क्वचिच्छून्यं समाश्रितः।

क्वचित् प्रशान्तगो योगी क्वचित् संध्याचले स्थितः॥ १६॥

क्वचिन्नादे क्वचिद् व्योम्नि क्वचिच्चापि निरोधिनि।

क्वचिद् बिन्दौ क्वचित् खड्गे क्वचिद् बीजे व्यवस्थितः॥ १७॥

अनुलोमविलोमेन चारमार्गे प्रतिष्ठितः।

साधयेदचिरात् सिद्धिं ज्ञानव्रतधरो मुनिः॥ १८

क्रियाव्रतानि तन्त्रेऽस्मिन् स्वरुच्या मन्त्रवादिभिः।

सेवावसानचीर्णानि समासन्नफलानि तु॥ १९॥

व्रतद्वये स्थिता : येऽत्र ते सिद्ध्यन्त्यविचारतः ।

निर्वाणामलभोगाभ्यामध्यानध्यानलक्षणे॥ २०॥

स्थितस्त्वेकतमे यागे नवानां प्राग् विचारिते।

सोत्साहः सन् सहायस्तु एकोवाषोऽम्बिकाव्रती ॥ २१॥

प्रतिष्ठ्य भैरवं लिङ्गं मन्त्रैर्भैरवभाषितैः।

ज्येष्ठं वा मध्यमं वापि कन्यसं वा त्रिरूपिकम्॥ २२॥

प्रासादेष्वमना स्थाने क्रियया भैरवोक्तया।

इष्टान्नं तत्र विन्यस्य गुप्तं कृत्वा तु तत् प्रिये॥ २३॥

प्राची प्रोक्तं विधानेन कृत्वा क्षेत्रपरिग्रहम्।

तस्मिन् कृतोदक्रियया शीघ्रं सिद्ध्यति साधकः ॥ २४ ॥

श्रीजयद्रथ उवाच ।

कालकन्धरकामाङ्गफल्गुस्तृप्ताक्षिपावकः ।

विलोलवलयव्यालशिरोमणिविभासितः ॥ २५ ॥

कान्ताकपोललावण्यप्रतिबिम्बितविग्रहः ।

दंष्ट्रेन्दुचन्द्रिकाजालजितमूर्द्धेन्दुपावक ॥ २६ ॥

आकल्पव्यालनेत्राग्निशिखास्फुरितदृग्घवे ।

उमाभूषणमाणिक्यकरसंपर्कपाटल ॥ २७ ॥

स्थाने कपर्दिन्सर्वेश शितिकण्ठबलाबल ।

नीलकण्ठविशालाक्ष वह्निदृङ् नीललोहित ः॥ २८ ॥

उमापते पशुपते शिपिविष्ट वृषध्वज ।

दीप्तवासा ः विरूपाक्ष शूलपाणे पिनाकधृक् ॥ २९॥

उग्रपिङ्ग भवानन्तगिरिजन्मा हृदि प्रिये ।

बहुरूप महारूप नन्दिमित्रगणाधिप ॥ ३० ॥

पाण्डुराङ्ग भजव्याजिन् खट्वाङ्गिन् प्रमथेश्वर ।

दुर्वासा मृष्टदोर्दण्ड गिरिशामितविक्रम ॥ ३१ ॥

अजैकपादहिर्बुध्न गूढधन्वन् दिगायुध ।

क्षपिताशेषसन्तापशुचिरत्नमहोदधे ॥ ३२ ॥

ममानुकम्पया नाथ दीनानाथाय भीरवे ।

प्रासादलिङ्गवेदीनां लक्षणं संप्रकाशय ॥ ३३ ॥

श्रीभैरव उवाच ।

एकादिनवहस्तान्तलिङ्गमिष्टं नरात्मनाम् ।

परतः स्वप्रचाराणां तद् विषाश्च प्रशस्यते ॥ ३४ ॥

शेषन्तु दैशिकेन्द्राणां लोकानुग्रहहेतवे ।

लिङ्गमानेन प्रासादस्तन्मानाल्लिङ्गमेव च ॥ ३५ ॥

शास्त्रोक्तलक्षणेनैव तन्नियोगं समाचरेत् ।

लिङ्गतो द्विगुणो गर्भो गर्भाच्च द्विगुणं बहिः ॥ ३६ ॥

बहिस्तो द्विगुणोत्सेधः शस्तः प्रासादलक्षणे ।

पूर्वापूर्वविभागेन विषुवस्य प्रशस्यते ॥ ३७ ॥

द्वारगृहस्य तु देवानां प्राक्पश्चिमसमाश्रये ।

विषुवस्थस्य कर्तव्यं द्वारं वै दक्षिणोत्तरम् ॥ ३८ ॥

प्रासादो भैरवीयोयः शस्तोऽसौ दक्षिणामुखः

मातृमण्डलगेहानि सव्यासव्यमुखानि तु ॥ ३९ ॥

प्रासादस्योभयस्थानि प्रशस्तानि विपर्ययात् ।

त्रिस्वरूपाणि त्रीण्यत्र लिङ्गान्युक्तानि सूरिभिः ॥ ४० ॥

स च ज्येष्ठकनिष्ठाभ्यां तेषां लक्षणमुच्यते ।

त्रिविधं तस्य विज्ञेयं वत्स भागविशेषतः ॥ ४१

उत्सेधो यत्प्रमाणस्तु तत् त्रिभागेन विस्तरः ।

Sampath_eBooks

सर्वत्र समलिङ्गस्य चतुरस्रः प्रशस्यते ॥ ४२ ॥

चतुरस्रमीश्वरं स्थानमष्टास्रं गुह्यकापते ।

वृत्तन्तु भैरवस्थानं तत्र चत्रं निवर्तयेत् ॥ ४३ ॥

वृत्तस्याष्टमभागन्तु दृक्रिभ्योर्ध्वोर्ध्वतः क्षिपेत् ।

भागत्रयेऽपि लिङ्गस्त तत्र सूत्राणि पातयेत् ॥ ४४ ॥

दत्तांशमूर्ध्वकर्णे तु दत्वाधोगतलीलया ।

मस्तकाङ्गं समं कृत्वा कर्णाङ्कान् कामयेद् बुधः ॥ ४५ ॥

सूत्रं द्वितीयकर्णाङ्कं कर्णाङ्क दिव्यच्चत्रप्रसिद्धये ।

वेदभूतषडंशैर्वा चत्राकृत्तिविधायिनी ॥ ४६ ॥

सर्वेषामेव लिङ्गानां क्रियोक्ता पूर्वसूरिभिः ।

एतत् सर्वसमं लिङ्गं भागायतमथोच्यते ॥ ४७ ॥

आयामं चाष्टभागान्तं त्यक्त्वा भागत्रयं बुधः ।

पञ्चभिर्विस्तरं दत्वा वेदीं कुर्याद् यथा पुरा ॥ ४८ ॥

शेषन्तु लक्षणं सर्वग्राह्यं सर्वसमोदितम् ।

नह्यर्धकमिदं प्रोक्तं शृणु सम्यक् कृशायतम् ॥ ४९ ॥

यदायतत्वं लिङ्गस्य तत् तुरीयान्शविस्तरम् ।

विवर्त्य पूर्ववत् कुर्याच्चतुरस्राधिकं विधिम् ॥ ५० ॥

तृतीयं कथितं ह्येतल्लिङ्गं सुरगणार्चितम् ।

साधारणमथैतेषामन्तच्चत्रं प्रकाश्यते ॥ ५१ ॥

प्रजाभागं चतुर्विंशद्भागं कुर्यात् समं बुधः ।

सूत्रेषु वैषुवे चित्रं कुर्याद् भागद्वयेन तु ॥ ५२ ॥

उच्छ्रयास्यतृतीये तु भागाधस्तात् प्रतिष्ठिते ।

भागत्रयं परित्यज्य रेखां तिर्यक् समालिखेत् ॥ ५३ ॥

अष्टगात्रत्रिभागं वै द्विभागेन समं भवेत् ।

हेमसूच्याङ्कमेतद्धि पश्चादङ्केन चोत्किरेत् ॥ ५४ ॥

क्षौद्रेण पूरयेत् तद्धि मूर्ध्निपुष्पकृतां ददेत् ।

स्नापयेच्च ततोम्भोभिः शिल्पिदोषविमुक्तये ॥ ५५ ॥

स्नातं लिङ्गं षडङ्गानामधिकार्युपजायते ।

परापरतनुं ध्यात्वा ततो लिङ्गे तु भैरवम् ॥ ५६ ॥

विशेषस्नानसंयोगः कार्योऽनुक्रमसंस्थितः ।

गन्धाम्बुनाज्यमधुना दध्ना च पयसा ततः ॥ ५७ ॥

सुघटैः स्वच्चतोयेन रूपिणीभिश्चतसृभिः ।

स्नापयेत ततो मन्त्री मङ्गलानां विवृद्धये ॥ ५८ ॥

निर्मंत्सनादिकं कृत्वा स्नानं गन्धादिपूजितम् ।

रक्तवासोयुगच्छन्नं हृदयेन सुधूपितम् ॥ ५९ ॥

पिण्डिकाकर्मकर्तव्यं माला मूलेन मन्त्रिता ।

लिङ्गशेषाश्मसञ्जाता सा प्रशस्ता प्रकीर्तिता ॥ ६० ॥

तृतीयांशेन लिङ्गस्य षाड्गुण्येन समन्विताम् ।

पिण्डिकान्तस्थभागेन मेखलां परिकल्पयेत्॥ ६१ ॥

तदन्तश्च त्रिभागेन खातं सर्वत्र कीर्तितम्।

प्रमाणादधिकं कार्यं प्रणालं दक्षिणे स्थितम्॥ ६२ ॥

परिवेष्टन् तृतीयेन भागेन परितिष्ठति।

विप्रान् साष्टाङ्गतो बाह्ये कार्यमभ्यधिकं शुभम्॥ ६३ ॥

ह्रस्वाह्रस्वविभागेन निष्कृतो पिप्पलस्य तु।

लिङ्गशेषदृगङ्गानां नवगर्भान्विता शिला॥ ६४ ॥

ब्राह्मी रत्नयुता कार्या पीठस्याधाररूपिणी।

गर्भाधिकैर्विशुद्धन्तु तत् स्थितं चाग्रमण्डपे॥ ६५ ॥

कथायादिषु संस्थानं पञ्चगव्यादिभिस्तथा।

हृदयेन तु लिङ्गस्य सर्वकर्माणि कारयेत्॥ ६६ ॥

दिगस्त्रैस्तोरणन्यासः पताकानां च शस्यते।

वैभीतयवतो दद्यात् पीतं ध्वजसमन्वितम्॥ ६७ ॥

पिचुमर्दभवं याभिर्नववर्णपताकिकम्।

मुक्ताभासि पताकाढ्यं करंजं मकरध्वजे॥ ६८ ॥

रक्ता रुग्भुजसंयुक्तं महावार्षं धनेश्वरे।

द्वारपालान् पुरा पूज्य सन्निधीकृत्य तिष्ठता ॥ ६९ ॥

दिक्पालांश्च प्रपूज्यादौ मण्दपान्तश्च वेदिकाम्।

ससितां खट्वयोपेतां सतुल्यां सोपधानया॥ ७० ॥

खट्वान्ते सोपधानं तु शस्तमास्तरणं नवम्।

दक्षमूर्ध्वोत्तरायं तु लिङ्गं तत्रोपवेशयेत्॥ ७१॥

पलाशकुशवस्त्रेषु क्षेत्रस्थेष्वथवा शुभम्।

हृदयेन ततस्तस्मिन् नाशनं परिकल्पयेत्॥ ७२॥

विन्यसेत् तत्र रूपं तु तत्र तन्मूर्त्तिविद्यया।

सकलाङ्गसमोपेतं हृदयेनोपचर्य तु॥ ७३॥

पाद्यादिधूपपर्यन्तैरर्घमुद्रावसानिकैः।

एवं निवेशितं लिङ्गमाच्छाद्यं पाण्डुराम्बरैः॥ ७४॥

ततः सुगन्धपुष्पाद्यैः सम्यक् पूजां प्रकल्पयेत्।

धूपदीपं निवेद्यं तैर्दत्तार्घो दिग् बलिं क्षिपेत्॥ ७५॥

हृदयेन पुरादिष्टं कर्म दिक्ष्वासु सर्वतः।

अधिवासजनं कर्म दृष्टादृष्टविधानतः॥ ७६॥

कुण्डे वह्निविधिं कुर्यात् सुगुप्ते सर्वमङ्गले।

अन्यस्मिन् वातमग्निन्तु शेषं कुण्डेषु निक्षिपेत्॥ ७७॥

लिङ्गं वा भैरवीयं यत् तस्य भिन्ना न योनयः।

येऽन्यभेदाः किं बहुभिः कुण्डमेकं प्रशस्यते॥ ७८॥

एकयोनिः परा काष्ठा धाम्नां भवतोदिता।

तस्यां क्रिया विलीयन्ते क्रियान्ते सर्वयोगिनाम्॥ ७९॥

यस्मात् ततोऽतिविस्तीर्णं संक्षिप्तं च समं मतम्।

हिरण्यरेतसी शान्तं षडङ्गमथ भैरवी ॥ ८० ॥

इष्टा पूर्वविधानेन तनुर्मार्ज्यादितः क्रमात् ।

मूर्त्तिविद्याशतं हुत्वा चतुरस्त्रं कुशेन तु ॥ ८१ ॥

कथित्वा मध्यमं भागं स्पृश्योदो गगनेन तु ।

अङ्गिनः शतहोमान्ते पूजाभागन्तु संस्पृशेत् ॥ ८२ ॥

मूलमन्त्रशतं हुत्वा मूर्ध्नः पादावसानकम् ।

सन्नतेन कुशाग्रेण स्पृशेद् वा परतत्वगः ॥ ८३ ॥

वामहस्तसमाक्रान्तं जप्तव्यं शतमेव च ।

भागे भागे तु चैकं वै शतं सर्वस्य शस्यते ॥ ८४ ॥

एवं सुमङ्गले काले लग्नोपचयसङ्कुले ।

निशि रुद्रोदये रौद्रं लिङ्गं स्थाप्यं महात्मना ॥ ८५ ॥

लिङ्गमूर्त्तिर्महाघोरा घोरनायकनाशनी ।

घोराणुभिर्घोरकाले स्थाप्य तेन घोरहा ॥ ८६ ॥

प्रासादब्रह्मसंसाध्यं तन्मध्ये यवमात्रकम् ।

प्रचाल्य तत्र लिङ्गन्तु स्थापयेत् साध्यसिद्धये ॥ ८७ ॥

द्विषद् वैषां प्रतिष्ठ्यादौ हृदयेन भवादिना ।

वीरालं तदधो दद्याद् गर्तेषु शमनीं बुधः ॥ ८८ ॥

हरितालशिलादीनि धातूनि विनिवेश्य तु ।

सिद्धपुष्पं तथा तारं गोकर्णीं बुध्नतो न्यसेत् ॥ ८९ ॥

सहदेवा ं न्यसेद् वाथ प्रोक्ता नामप्यभावतः ।

हृदा सर्वस्य विन्यासो यस्य मन्त्रो न चोदितः ॥ ९० ॥

साधारणी च मुद्रा तु या या प्राक् प्रचोदिता ।

आसने शवपर्यन्ते मूर्त्तिभूतं तु विद्यया ॥ ९१ ॥

विन्यस्य भैरवं लिङ्गं निरुद्धं सन्निधीकृतम् ।

पाद्याद्यर्घक्रियाद्यास्ते विद्या देहावसानतः ॥ ९२ ॥

अखण्डमण्डलं व्योम सिद्ध्युपादानलक्षणम् ।

ततः शून्यसमायोगसम्प्रदायाच्च भैरवम् ॥ ९३ ॥

पूरकं वासमुन्मूल्य शक्त्यान्ते यत्नतो गुरुः ।

उपलब्धा न या लिङ्गप्रतिमां प्रति तिष्ठयेत् ॥ ९४ ॥

न्यासत्रयोपयोगेन दंष्ट्रिण्या मुद्रयापि च ।

लिङ्गभैरवतां याति संस्यातं ख संक्ष्यान्तं भैरवाम्बुभिः ॥ ९५ ॥

स्नानद्रव्यं न हिंसेत यल्लिङ्गस्याङ्गिकं भवेत् ।

स्वीकारेणैव यद् दत्तं वर्ज्यं नैवेद्यजं चरम् ॥ ९६ ॥

मा उमेश गणादीनां सुराणां प्रतिमाश्च याः ।

मालामूलेन ताः सर्वाः स्थापिताः सिद्धिदाः स्मृताः ॥ ९७ ॥

द्वैतात् स्वां बिन्दुविज्ञानान्मिश्रां नादात्मिकां तथा ।

शाक्ताश्चाद्वयतां यान्ति चुम्बकेच्चावशान्न तु ॥ ९८ ॥

न द्वैतं नाद्वयं किञ्चिन्नमिश्रं परमार्थतः ।

Sampath_eBooks

शम्भुना चित्तभेदो यः प्राणिनामनुवर्त्तितः ॥ ९९ ॥

द्वाराष्टांशपरित्यागात् सोंऽशस्त्र्यंशे कृते बुधैः ।

भागाभ्यां प्रतिमा कार्या पीठं भागेन कारयेत् ॥ १०० ॥

स्नानामलां कृतां चैव पिण्डिकां मूर्त्तिविद्यया ।

संस्थाप्य साधकेन्द्रस्तु तत्स्थं भोगं प्रपूजयेत् ॥ १०१ ॥

लिङ्गवेदीसमायोगप्रतिष्ठासास्वशक्तितः ।

कृता व्यासससमासाभ्यां साधारणफलप्रदा ॥ १०२ ॥

सम्प्रदायसमानत्वाल्लघीयसि गरीयसी ।

एवं प्रतिष्ठिते लिङ्गे चुम्बकादीन् प्रपूजयेत् ॥ १०३ ॥

आत्मचित्तानुसारेण भोज्यं कृत्वा विशेषतः

दक्षिणां विविधां दत्वा श्रान्तलोकं क्षमाप्य तु ॥ १०४ ॥

तत्र विन्यस्य साध्याणुं लिङ्गे स्वायम्भुवेऽप्यथ ।

गुप्तगर्भे विरोधेन निर्वहेन्मन्त्रसेवनम् ॥ १०५ ॥

निर्गूढः सिद्धिमाप्नोति निर्व्याजं भैरवागमे ।

लिङ्गाद्दतेन चासन्नं फलमन्यद्धि क्साम्प्रतम् ॥ १०६ ॥

निर्गमः क्षपितैरासनन्यस्मादाश्रया नराः ।

व्यक्ताव्यक्तमुखं शम्भुं लिङ्गमूर्तिं विहाय तु ॥ १०७ ॥

दृष्टादृष्टफलावाप्तिचिन्ता येषां हि देहिनाम् ।

रत्नाश्मधातु लिङ्गानां तेषां शस्तः परिग्रहः ॥ १०८ ॥

Sampath_eBooks

एवं हि चित्रसिद्धीनां साध्यानां साधनानि तु।

यान्युक्तानि महेशेन तैस्ते षाध्यास्तु साधकैः॥ १०९॥

सामान्येन विरक्तैस्तु विशेषेष्वपि निस्पृहैः।

प्राप्यते भैरवं धाम विशेषेण महाद्भुतम् ॥ ११०॥

गुरुमन्त्रेषु भक्तानां स्वाधिकारः क्रियावताम्।

न तद् दुरापं विश्वे तु यत् स्यान्मोघमशालिनाम्॥ १११॥

सुरतरुमञ्जरीकर्णपूरशोभितवक्रमण्डले।

मन्मथरतिविलासतनुविकासितनीलोत्पलेक्षणे॥ ११२॥

गुरुजनयोग्यवस्तुनि च य सकलास्तव चोदिताःप्रिये।

चोम्मक ख च्चोष्मक वर्जितं तदपि शृणुष्व समासयोगतः॥ ११३॥

इति भैरवस्त्रोतसि विद्यापीठे - शिरश्चेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसाहस्त्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां लिङ्गप्रासादनिर्णयविधिः सप्तचत्वारिंशतिमः पटलः॥ ४७॥

अष्टचत्वारिंशतिः पटलः।

श्रीभैरव उवाच ।

निर्णीता पूर्वसेवानां चर्या चरणशालिनाम्।

अन्योन्यं योगिनीवीराणां शृणु संभाषणादिकम् ॥ १॥

स्नात एव कृतन्यासो दीप्तास्त्रो च दिङ्मुनिः ।

हृन्मखं पूज्य विधिना स्थूलैर्वर्णात्मकैर्गुणैः॥ २॥

अंतरंगच्युतो योगी बहिरङ्गपरायाणः ।

अथ वस्तुस्थितिस्थं यन्निराचारत्वमादरात्॥ ३॥

वर्धमानं हि तद् यागमिष्ट्वा पूज्या तु पेषणी।

कञ्जिनी स्थानमागत्य पूज्य तां साधकेश्वरः ॥ ४॥

कुंभमायोमयं पूज्य सेहारीं चुल्लिमायजेत् ।

समीज्य मौसलीं मन्त्रीं कण्डनीं देहलीं ततः॥ ५॥

अथवा देहलीं नाभौ कण्डनीं हृदि मौसलीम्।

कण्ठे वक्रे च चुल्लीं तु सेहारीं भ्रूयुगान्तरे॥ ६॥

लम्विके लम्विकान्ते तु कुसुमायोमयं यजेत्।

कञ्जिनी द्वादशान्तर्गा पेषणी सचराचरे॥ ७॥

तस्याः परे निराचारं वर्द्धमानमुपासयेत् ।

ऊकारो देहलीप्रोक्तो हकारः कण्डनी स्मृता॥ ८॥

अकारो मौसली ज्ञेया चुल्ली खण्डेन्दुरिष्यते।

बिन्दुं सेहारिकां विद्धि जलं कुम्भं निरोधिकाम्॥ ९॥

आकर्ण्यं कण्ठिनीनादः शक्तिरूह्या च पेषणी व पीषणी।

वस्तुमात्रं हि तद् ब्रह्म वर्द्धमानस्वभावगम्॥ १०॥

श्रीदेव्युवच।

भावानामपि यागानां नामान्येतानि सुव्रत।

गुणैःपरिभाषया वा यदि तद् ब्रूहि मे हर॥ ११॥

श्रीभैरव उवाच ।

यत् तद् देवगतं लिङ्गं प्राणशक्त्यापकर्षितम् ।

अधोर्ध्वं चारयोगेन चरते सर्वजन्तुषु ॥ १२ ॥

तस्य देहे लयो यस्तु विधिवत् तस्य द्वयङ्गुलम् ।

अङ्गुलं देहली तत्र तत्तलं देहलीतलम् ॥ १३ ॥

स्वभावभूतां शक्तिं तु सलवद् देहलीतलात् ।

व्यायतस्वगुणान्तस्य मौसली नाम चोदितम् ॥ १४ ॥

यत्स्थाने सहते सो हि येषु चाशु वलते प्रिये ।

कण्डने तत् स्थितं यस्मात् कण्डनी प्रोच्यते ततः ॥ १५ ॥

अन्तरालीकृतं वक्रं प्राणाप्रानविवर्जितम् ।

चुल्ल्येव भवते यस्मात् तच्च चुल्लिस्ततो मता ॥ १६ ॥

देहाद् विरेचिता प्राणात् तत्स्थं सेहारिका यथा ।

भ्रूमध्ये संहरे ज्योतिरतः सेहारिकोच्यते ॥ १७ ॥

घण्टिका सकपाला तु कुम्भः कुम्भमुखं च यत् ।

तत् कपालबिलं प्रोक्तं तेन तत् परमामृतम् ॥ १८ ॥

विशेदुदकवत् तेन पूर्णतोऽम्बुघटः स्मृतः ।

कङ्कपालमिति प्रोक्तं तज्जनित्वा स्वगोचरे ॥ १९ ॥

संस्थितः सेव्यते यस्मात् तस्मात् सा कञ्जिनीक्रतुः ।

मलादिकं तु यत् पश्यं तत् सन्ध्याचलसंस्थिता ॥ २० ॥

पेषयेच्चारशक्तिस्तु यतोतो पेषणी स्मृता।

देहेनाधारभूतेन नादेनाधिपिना सदा॥ २१॥

पेषयेदात्मचैतन्यं यस्मात् तस्माच्च पेषणी।

बन्धते तत् परिज्ञानाग्नि तमानाचितांचितिः॥ २२॥

वर्द्धामानस्त्वसौ प्रोक्तो मानवृद्धिकराद् गुणात्।

मानं सर्वज्ञता पुंसां रव पुसां सर्वकर्तृत्वसंयुता ः॥ २३॥

तां वर्धापयते यस्माद् अतोऽसौ वर्धमानकः।

मानन्तु सक्रिया सार्द्धं त्रिरभ्यधिकता तु या॥ २४॥

सानतस्मिन् यतः प्रोक्तावतोऽसौ वर्धमानकः।

मानस्यान्तर्गतां भोगां वर्धापयति लीलया॥ २५॥

सेवितः साधकैर्यागः प्रोक्तोऽतो वर्धमानकः।

अप्रमेयभवोच्चेदो वृत्तिर्व्योमकृतस्थितिः॥ २६॥

पेषणी न व त ह्यतीतो यो बोधोऽसौ वर्धमानकः।

य एवं तत्त्वतो वेत्ति नवयागविनिर्णयम्॥ २७॥

निशि संचारयोग्योऽसौ लभते दिव्यमेलकम्।

मेलके चापि चर्चाद्यं लब्ध्वा सिद्ध्यति साधकः॥ २८॥

नवयागपरिज्ञानी क्लिश्यते तत्क्रियोऽपि हि।

जपहोमव्रतोपेतस्तपोनिष्ठव्रतोऽपि हि॥ २९॥

एवं सर्वविदुर्गाशु शरीरः साधकेश्वरः।

संयोगे न्यस्य वीरस्य वीरं जालानुतत्वतः ॥ ३० ॥

संलापे तन्त्रसंसिद्धैरालापैःसप्रियं मुदा।

योऽन्वहं क्षेममुद्दिष्टं प्रतिक्षेमहतैः स्मृतम्॥ ३१ ॥

हः हे ही क्वगतं ब्रूयात् फ फे कुत्र प्रयास्यसि।

विच्चेच भावितस्तस्मिन् कस्य पुत्रोऽपि ह्वीमतम्॥ ३२ ॥

कं व्रतं तेन प्लुः प्रोक्तं ब्लुः प्रदत्तं चकेन वै ।

ड्लुः कस्मिं स्वस्थितो मार्गे वुक्लोक्तानि च भाषया॥ ३३ ॥

प्रतिसञ्चार्युवाच।

दुर्गाटव्याः समायाता तद्वत् सत्या निवेदितः।

अधुना प्रस्तुतं यानं भीमेश्वरदिदृक्षया ॥ ३४ ॥

भावितो ख भविता वर्धमानं च पेषण्यां जन्म मेऽनघ।

देहली तु व्रतं मुख्यं तद् दत्तं तद्विदा मम॥ ३५॥

उदक्तंभं यवा गत्वा दृष्टा सा काञ्जिनी मया।

साधक उवाच।

कः सखा यस्तु ते वत्स नित्यं हि पथि गच्चतः॥ ३६॥

किञ्चायुधं वा स्थाने श्रान्तो विश्रमसे क्षणम्।

ऊष्मा वा कुत्र ते ब्रूहि भैरवी योषितं यदि॥ ३७॥

प्रतिसञ्चार्युवच।

स्नेहिकारिक शाखोहमश्रान्ते स्थानकत्रयम्।

संत्यज्यतामधिष्ठेशं क्लममूह्य घटाम्बुनः ॥ ३८ ॥
पानादप्यवितृष्णस्तु कञ्जिनीस्थः पिवाम्मयम् ।
ततस्त्रिस्थाश्रमत्यागे संस्थितो देहलीतले ॥ ३९ ॥
कृत्वा तु देहलीं लङ्घ्य पेषणीदर्शनात्मकः ।
प्रविशामि सुविस्तीर्णं वर्धमानं गृहोरम् ॥ ४० ॥
तत्र तद्देहसंस्पर्शमुखानन्दप्रचोदितः ।
सह तेन क्षणं स्थित्वा पिष्ट्वा पथ्यमनन्तकम् ॥ ४१ ॥
पेषण्यो तद् ग्रहं त्यक्त्वा निष्क्रान्तोल्लङ्घ्य देहलीम् ।
तत्तलाद् विनिर्वृत्तोऽहं सत्वरो मुसलायुधः ॥ ४२ ॥
सुरालयानि संपश्यन्नायतो क्षोदमण्डपम् ।
लम्बिनी मूलकण्ठाभ्यां क्षोद्य क्षोभ्यानि यानि तु ॥ ४३ ॥
दुष्कृतादीन्यतस्तस्मिन् भवामि विगतक्लमः ।
क्षोदनीलङ्घनेऽप्युक्तो यागोऽसौ वर्धमानकः ॥ ४४ ॥
आस्वादात् तस्य तच्चन्दं प्रागुक्तमुपजायते ।
बलीयसि महोच्चुष्मा यासौ चुल्लीव्यवस्थिता ः॥ ४५ ॥
अत ऊष्मार्थिना सेव्यो नित्यं चुल्ल्यात्मकः क्रतुः ।
सञ्चार्युवाच ।
साधु साधु महावीर भैरवाप्तविशारद ॥ ४६ ॥
अन्वितोऽसि न सन्देहो ज्ञातस्त्वं यागनिश्चयात् ।

के यागाः केऽत्रकाले तु भक्तसिद्धिप्रदायकाः ॥ ४७ ॥

का सिद्धिः सेवनैस्तैस्तु वद मे वसितं यदि ।

स्मितहास्यस्ततःप्राह सवचः प्रतिसाधकः ॥ ४८ ॥

देहली मौसली चैव कण्डनी या च संस्मृता ।

निशि यागत्रयं ह्येतद् विद्यासिद्धिप्रदायकम् ॥ ४९ ॥

पेषणीचुल्लिकायागौ सन्ध्योपास्यौ सदैव हि ।

विद्यामन्त्रोक्तसिद्धीनां तावुत्पत्तिकरौ मतौ ॥ ५० ॥

मध्यन्दिने समिष्टव्यो यागः सेहारिकात्मकः ।

विद्यातत्वस्थसिद्धीनां मानवानां प्रसिद्धये ॥ ५१ ॥

मध्यन्दिनोर्ध्वयामस्थ उदकुम्भाध्वरोर्चितः ।

मुद्रामण्डलमेवोक्तं सिद्धिसंपादकृद्भवेत् ॥ ५२ ॥

वासरस्यानुवीरांशे प्रेष्टव्यः कञ्जिनीमखः ।

गुह्यकेशपदावास्त्यै काश्यपीनां च सिद्धये ॥ ५३ ॥

यतो दृक् सा त्रिसन्ध्या वा न तस्मिन् शततो दयात् ।

अतः सर्वार्थकृद् वीरो योगोऽसौ वर्धमानकः ॥ ५४ ॥

कालावयवहीनोऽसावुपादानाङ्गवर्जितः ।

यद् ध्यानं प्रोच्यते तन्त्रे तन्न वस्तूपचारतः ॥ ५५ ॥

तद्भावभावितानान्तु तन्नियोगेन सुव्रत ।

अवधानवशात् पुंसां सर्वं सर्वात्मकं भवेत् ॥ ५६

एवं संपादितप्रश्नं साधकैस्तैर्मुनिश्वरम् ।

यागस्थानेषु देहे तु पिपृच्छुरिदमुक्तवान् ॥ ५७ ॥

देवतादूतितदूतियोगिनीमातृकिङ्करात् दूतियोगिनीमातृकिङ्करान ।

अनुचारा ः गणा येऽन्ये भुविस्था भूतिदायकाः ॥ ५८ ॥

सन्निधानास्तु के कस्मिन्स्ते योगे तत्प्रदर्शनम् ।

स्वदेहे लेशतो ब्रूहि येन प्रश्नं वदाम्यहम् ॥ ५९ ॥

प्रतिसाधक उवाच ।

व्योम्नि वामकरभ्रान्त्या यदि तेऽहं समन्वितः ।

प्रतीतो भोः महावीर तद्गृह्णामि शिखात्रुटिम् ॥ ६० ॥

शिखां संस्पृश्य मुण्डोर्ध्वे चिद्रो हस्ते निधापितः ।

भ्रूमध्ये पश्य मे हस्तं वक्रे च सकपोलके ॥ ६१ ॥

कण्ठे पश्य हृदिस्थं च पश्य नाभिं च सुव्रत ।

योगाष्टकसमाधानमाकाशान्ते प्रदर्शितम् ॥ ६२ ॥

वर्धमानमये तच्च शिखाग्रं पीषणीमतम् ।

सा शक्तिर्देवदेवस्य देवताधारलक्षणा ॥ ६३ ॥

तदर्धो द्व्यङ्गुलं प्रोक्ता देहली दूतिकालया ।

सोव्यक्तो व्यक्तता ज्ञेया कञ्जिनी तु दशाङ्गुलम् ॥ ६४ ॥

अनुदूत्यरणिः सा तु योगिनी योगतो भवेत् ।

उदकुम्भात्मकोयोगो मूर्ध्नो घण्टावसानकः ॥ ६५ ॥

Sampath_eBooks

भ्रूबिन्दौ मातृवर्गस्तु यागे सेहारिकात्मके ।

खिन्नतृष्णसुखाकारवक्रे चुल्लाध्वरे स्थिताः ॥ ६६ ॥

किङ्कराश्चारुसंज्ञाद्याश्चारमौसलजे क्रतौ ।

तन्निपाताश्रयो यागः काण्डन्याख्यस्तु विश्रुतः ॥ ६७ ॥

सगणानामधिष्ठानं वीरेशेन प्रकल्पितम् ।

अनेन क्रमयोगेन सञ्चारे ये समन्विताः ॥ ६८ ॥

वन्दनाद्यर्घपूजाभिः कण्ठग्रहणपूर्वकैः ।

आलापैर्भाष्यगान्योन्यमेकगर्भक्रियात्मकैः ॥ ६९ ॥

भ्रमन्तस्ते महासिद्धिमाप्नुवन्त्यविचारतः ।

आगमोक्तविलोमेन सिद्धसञ्चरचारिणः ॥ ७० ॥

मन्त्रच्छिद्रादिदोषाणां भाजःस्युः सविनायकाः ।

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं शतिसहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां चुष्मालक्षणमहावीरसंभाषणं अष्टचत्वारिंशतिमः पटलः ॥ ४८ ॥

उनपञ्चाशत्तमः पटलः ।

श्रीभैरव उवाच ।

भैरवस्तु मृगव्याधेः पुञ्जता सा तु भैरवी ।

विविक्तोसुस्तथा विद्या तारा मुद्रागणा मता ॥ १ ॥

मण्डलं कन्दरं ज्ञेयं मातरो रोरुशब्दगाः ।

योगिन्यः प्रोदिता गावः गोरूपाण्यपराणि तु ॥ २ ॥
शाकिनीवर्गपूर्वाणि कुलान्युक्तानि सूरिभिः ।
घोषोऽह्नो मृगिनी रात्रिर्निराभूः पिङ्गलं जलम् ॥ ३ ॥
सर्वभक्षी हुताशश्च वीरो वायुरिहोच्यते ।
रोचनं गमनं रक्तं घनसारं महाबलम् ॥ ४ ॥
मांसमुक्तं तथास्थीनि धातुशब्देन सूरिभिः ।
कीकषञ्च कपालन्तु विश्वं खट्वाङ्गमुच्यते ॥ ५ ॥
त्रयीमार्गं त्रिशूलं च रुच्यान्याभरणानि च ।
ग्रन्थान्येव च पुष्पाणि धूपो ज्ञेयः सुरप्रिये ॥ ६ ॥
गत्वा धृतिकराः प्रोक्ता धूपो बेतालघातकः ।
भूतानाञ्च बलिः प्रोक्तः पावनश्च भविष्यति ॥ ७ ॥
वरं धाता च नैवेद्यं सामान्यं च निवेदनम् ।
निर्माल्यं चाप्यभोज्यं तु वितानं याग उच्यते ॥ ८ ॥
यागाङ्गानि बलान्यत्र घण्टाद्या हरणी मता ।
डमरूको महानादो घण्टा संवरणी तथा ॥ ९ ॥
वोक्काणको गुणी प्रोक्तः प्रपञ्चः पञ्चकः स्मृतः ।
स्ववन्धुः प्रोच्यते भ्राता स्वसा वा भगिनी स्मृता ॥ १० ॥
भिक्षापात्रं सुरचितं पुष्पपात्रं महामुखम् ।
लंपाकं चाप्यलाबुं वै प्रायश्चाप्यतिथिर्मतः ॥ ११ ॥

Sampath_eBooks

कटकं मण्डलं विद्धि व विद्धिः केयूरं चार्द्धमण्डलम्।

पुष्करञ्च व रु पुष्परञ्च श्मशानं तु वत्स्यं चैव चतुष्पथम्॥ १२॥

रमणी च स्मृता दूती रागों नो रुचिरो भवेत्।

समर्थो देशिकः प्रोक्तो ब्रह्मगर्भश्च साधकः॥ १३॥

पुत्रको भूतशर्मा च सा विशर्मा च पूर्वतः।

महेश्वरकुलालञ्च कुलमन्वय उच्यते॥ १४॥

शूलप्रोतं स्मृतं चत्रमुद्बन्धो देवमूर्ति च।

सुस्थितं चैव संज्ञेयं कबन्धं शस्त्रसूचितम् ॥ १५॥

संचारिणौ च चरणौ हस्तौ चाश्वपकारिणौ ।

तुन्दञ्च जठरं प्रोक्तं सर्वाङ्गं घनमिष्यते॥ १६॥

काननं च स्मृतं वक्रं शिरः केशरुहं मतम्।

सांदिकौ श्रवणौ ज्ञेयौ नासिका मोदिनी स्मृता॥ १७॥

दारिका दशना ज्ञेया ज्योतिष्केन यते स्मृते।

पद्मनालं स्मृतः कण्ठस्तल्प्यं वक्षस्तथोच्यते ॥ १८॥

हृदयं जीवगमनं मण्डलांकौ पयोधरौ।

गुह्यं रतिधरं ज्ञेयं रतिश्चैव कुंकुदकम् ॥ १९॥

शङ्करश्च स्मृता शेष सर्वकर्त्ता च तद्बलम्।

पुण्यानि यवसादीनि सर्वदेहोद्भवानि च॥ २०॥

मृतं पुष्पितमित्याहुः स्थिरं बुद्धं प्रकीर्तितम्।

आगतं वर्त्तितं विद्धि वीतं संबरितं विदुः ॥ २१ ॥
लक्षितं भक्षितं चैव भक्षितं लक्षितं तथा ।
प्रतिष्ठितं स्थितं ज्ञेयं गतमुत्पतितं विदुः ॥ २२ ॥
निष्पन्नं बन्धुरं ज्ञेयमनिष्पन्नमबन्धुरम् ।
पीतन्तु स्मरितं विद्धि वार्तं विस्मरितं मतम् ॥ २३ ॥
संवाहितं प्रनष्टञ्च चिन्नं भङ्गीकृतं तथा ।
पाटितं भाजितं प्रोक्तं विमुक्तञ्च विशृङ्खलम् ॥ २४ ॥
संसर्गो मेलकः प्रोक्तो लपितं प्रोक्तमुच्यते ।
लघुं वन्ध्यं सहल्लञ्च बृहज्जीर्णमुदाहृतम् ॥ २५ ॥
सङ्कटं पटलं विद्धि असङ्कटमनातुरम् ।
गीतं तु रुदितं ज्ञेयं रुदितं गीतमुच्यते ॥ २६ ॥
हास्यं कोलाहलोल्लोलो ह्यष्टहासः सदाचितिः ।
स्त्रीरन्तिको नरो नाद ऊर्ध्वान्तं यजनालयम् ॥ २७ ॥
कृत्तिका च स्मृता सन्ध्या सन्ध्यामन्दाकुली रविः ।
रिचिकश्चन्द्रमानी उमालयः परिकीर्तितः ॥ २८ ॥
व्यवहार्हत्वमी प्रोक्ताः च्चुष्मकास्ते समासतः ।
अन्योन्यं साधकेन्द्राणां सहस्त्रानुचरः प्रिये ॥ २९ ॥
यदात्मकास्तथान्येषु भाषाभूतक्रियात्मजः ।
निजार्थापादका ज्ञेया वे तत्रैव च सर्वतः ॥ ३० ॥

Sampath_eBooks

गुरुजनफलसाधनं यद् विहितमिदं तदशेषकन्दरार्यैः ।

शृणु तदपि विशुद्धबोधसाध्ये समयिनि चक्रमवर्तनाविशेषम् ॥ ३१ ॥

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के चतुर्विंशतिसाहस्रे प्रथम षट्के श्रीकालसङ्कर्ष

ण्यां नियतव्यवहारचुष्मा एकोनपञ्चाशत्तमः पटलः ॥ ४९ ॥

पञ्चाशत्तमः पटलः ।

श्रीभैरव उवाच ।

समयाद् दैशिकाद् योक्तास्तथा चाराश्च ये मया ।

समस्तास्तेऽनुपाल्या वै पुत्रकेणोत्तरेण च ॥ १ ॥

योगाभ्यासो ं नु सेवा वा काम्या प्रोक्तावधारणम् ।

उपास्यमथवा लिङ्गं गुरुणा पुत्रकेन तु ॥ २ ॥

वन्दतोऽस्य पुनर्वन्द्या नित्यं हि गुरुसेवनम् ।

नतगो न हितस्तस्य यावत् तस्याः समीहितम् ॥ ३ ॥

गुरुकर्मविरोधेन पूजाद्यं तस्य शस्यते ।

पुत्रकस्यापि युक्ते यं वृत्तिर्गुरुपरिग्रहम् ॥ ४ ॥

शेषं प्रचोदितं तस्य यदि प्राणितिनो गुरुः ।

अशेषाचारलुप्तोऽपि समयघ्नोऽपि यो भवेत् ॥ ५ ॥

सोऽपि स्वपदमायाति गुरुसेवावशात् प्रिये ।

सर्वमेव हि संपूर्णमपि यत् कुत्सितं कृतम् ॥ ६ ॥

गुरुराश्रयभक्त्या तु भवत्यत्र सुनिश्चितः ।

भवोदन्वति व भवोदंन्वति मज्ज्ञाने याति भूतमकण्टकम् ॥ ७ ॥

त्यजन्ति गुरुपन्थानं ये ते कृच्छ्रे पतन्तिहि ।

कस्यचित् केनचिल्लोके कथंचिद् भवति क्षयः ॥ ८ ॥

सर्वस्य कर्मणो मुक्त्वा सदसद्गौरवं हि यत् ।

यस्तु तस्माद्युपासीत प्रयत्नेन गुरुं बुधः ॥ ९ ॥

निर्व्याजं भोगमोक्षाभ्यां न ह्यन्यत् सुखसाधनम् ।

विपत्तौ प्रेतशुद्धिस्तु जठरक्लेशवर्जिताम् ॥ १० ॥

विदध्य भैरवाग्निञ्च संस्कुर्याच्च चतुष्टयम् ।

केचिदन्त्येष्टियोगञ्च साधकं ते वदन्ति हि ॥ ११ ॥

समयाद्यनुपत्त्यर्थं केचित् संस्कारमेति हि ।

मन्त्रसंस्कृतदेहानां वामवन्हौ विसर्जनम् ॥ १२ ॥

शस्तमत्र किमन्त्येष्ट्या भोगपुण्यं यतोऽनुद्दक् ।

साधके वा सहायत्वं युक्तं ताभ्यामलोलुपे ॥ १३ ॥

तत्साध्यसाधने निष्ठा का नित्या अशठाशयात् ।

यच्चन्ति सुखसन्तानमुभाभ्यामुभयात्मकम् ॥ १४ ॥

उभावपि हि वीरेन्द्रौ न्द्रा क्रियया समुपासितौ ।

मन्मतादिसुखदान्तगतानामुक्तमेतदधिकारचतुर्णाम् ।

वृत्तमुन्नतिकरं सुसाधनं तत्र सर्वगुणभाजि सुतन्त्रे ॥ १५ ॥

Sampath_eBooks

इति भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विं

शतिसाहस्रे प्रथमषट्के श्रीकालसङ्कर्षण्यां साधकादिचातुर्वर्ण्यवृत्तवर्णनं

पञ्चाशत्तमः पटलः ॥ ५० ॥

एकपञ्चाशत्तमः पटलः ॥

श्रीदेव्युवाच ।

ज्ञानेनानन्तवीर्येण मनस्तोषितवानसि ।

व्यापारशेषयुक्तेन ममाव्याजेन शङ्कर ॥ १ ॥

तमोघनाघनालीनां प्रचण्डज्ञानमारुत ।

श्रुताश्चाप्यज्ञनेनानात्र असकृद् योगकेसरी ॥ २ ॥

प्रचण्डभवमार्तण्डसैंहिकेन तनुक्रिया ।

चर्याश्चानन्तदुःखानां भिषग्रूपावधारिताः ॥ ३ ॥

यच्च किञ्चिज्जगत्यत्र प्राणिनामुपकारकम् व ख पाणिकारिकम् ।

तत् सर्वं विदितं नाथ प्रसन्ने त्वयि शङ्कर ॥ ४ ॥

किन्त्वेकवचनं नाथ प्रष्टव्यं विद्यते मम ।

या सा पूर्वं त्वयाख्याता विद्या सप्तादशाक्षरी ॥ ५ ॥

यागविस्तरतः सा तु नेष्टा मन्दधियां भवेत् ।

तस्मात् समाससाध्यानां स्फुटोद्धारार्थविस्तरा ॥ ६ ॥

ब्रूहि मेऽन्धकदेहासृक्स्रुतहृद्याम्बुपानक ।

श्रीभैरव उवाच ।

अजीवकटसंयोगात् पञ्चस्था न निपातितः ॥ ७ ॥

षधठरित्रिकं तस्मात् स्वगेयादुन्नतो जपेत् ।

चं हामहर ईमञ्च मन्त्रं सप्तदशाक्षरम् ॥ ८ ॥

विपरीतप्रयोगेन विधिना तु समुद्धरेत् ।

भुक्तिमुक्तिप्रदं प्रोक्तं सर्वदैव हि जापितम् ॥ ९ ॥

एकवीरा महाविद्या मन्त्रं वै चिन्तयेत् सकृत् ।

प्राणायामेन विधिना न्यास एवंकृतो भवेत् ॥ १० ॥

नानया सदृशी विद्या त्रिषु लोकेषु विद्यते ।

यदा लक्षत्रयं जप्ता संप्राप्तसमयेन तु ॥ ११ ॥

तदा सर्वाणि कर्माणि साधयेन्नात्र संशयः ।

श्रीदेव्युवाच ।

प्राणायामो विधिः प्रोक्तो न्यासादीनां त्वया हर ॥ १२ ॥

समयाः न प्रविज्ञाताः संक्षिप्यातुरलक्षणम् ।

श्रीभैरव उवाच ।

प्राणविद्यासमुच्चारैरायामः परिकीर्तितः ॥ १३ ॥

वराङ्गाद्यावत्पादान्तं प्राणपूरकयोगतः ।

प्राणायामविधानेन न्यासोऽयं स्वघनादिकः ॥ १४ ॥

न्यासस्थानेषु सर्वेषु प्रयुक्तः फलदो भवेत् ।

पाद्यादिनोपचारेण दृष्टमार्गेण मन्त्रिणा ॥ १५ ॥

Sampath_eBooks

अथवातिसमासेन विद्यया ह्येकवीरया ।

शरणक्रिया व शरणंक्रिया विधानानि शृणु देव्यमलानि तु ॥ १६ ॥

पञ्चशाखाः सकृत् स्पृष्ट्वा स्पृशेदपघनं सकृत् ।

सप्तजप्तोऽञ्जलिः पुष्पपात्रान्तस्थोऽर्घकृन्मतः ॥ १७ ॥

स एव स्थण्डिले क्षिप्त्वा आसनत्वविधायकः ।

उच्चाराभ्यधिकः सो हि कायकृन्न बहिः पुरः ॥ १८ ॥

स एव हि समाख्यातो विद्यादेहपरत्वया ।

सन्ध्यावृतो यो दशभिः सर्वा चैवोपचारिका ॥ १९ ॥

चरकायौ सकृत् स्पृष्ट्वा त्रिविधोऽर्घः कृतः प्रिये ।

आसनाद्यत्रिरुच्चारात् सर्वमेव क्रियावहम् ॥ २० ॥

सकृदुच्चारणाद्वाथ यागस्थानेषु सर्वतः ।

क्रियावहं साधकानां यागसिद्धिः फलैषिणाम् ॥ २१ ॥

जपध्यानरतानान्तु साधकानां क्रियावताम् ।

विद्येयं साधयेद् यत् तान् तदत्र विषमं न हि ॥ २२ ॥

प्रथमे तु ससंपूर्णां द्वितीयेऽन्त्याक्षरोज्झिताम् ।

द्वाभ्यां चैव तृतीये तु चतुर्थे च त्रिभिस्तथा ॥ २३ ॥

चतुर्थे पञ्चमे षष्ठे पञ्चभिः परिवर्जिताः ।

सप्तमे षड्भिरेवं तु सप्तभिश्चाष्टमेऽथवा ॥ २४ ॥

अष्टभिर्नवमेनैव दशमे दशभिस्तथा ।

एकादशे द्वादशे च दशैकार्णविवर्जितम् ॥ २५ ॥
व्यक्तं द्वादशभिर्वर्णैरन्तिमैस्तु त्रयोदशैः ।
चतुर्दशे तु त्रिदशैस्तथा पञ्चदशेऽपि च ॥ २६ ॥
चतुर्दशभिर्वर्णानामूच्चारैर्वर्णकैर्जपेत् ।
षोडशे पञ्चदशभिः षोडशभिः सप्तदशैः ॥ २७ ॥
उच्चारोऽष्टादशाख्यो यं यः सर्ववर्णैः परिच्युते ।
स्वाभाविकीं जपेद् विद्यां यागे वै वर्धमानके ॥ २८ ॥
पेषिण्यामुन्मनीं प्रेयां काञ्चिन्यां च मनोन्मनीम् ।
मनोमयीं कुम्भमुखे वर्द्धन्यां शब्दरूपिणीम् ॥ २९ ॥
सूक्ष्मां बिन्दुस्वरूपाञ्च चुल्लीयागे जपेत् सदा ।
द्विरभ्यासस्वरूपाञ्च मौसलीं सवने जपेत् ॥ ३० ॥
सूर्याग्नि सोमसंपृक्त लाभामुलूखले ।
तद्गतां कुरुरूपाञ्च देहलीयागगां यजेत् ॥ ३१ ॥
जपप्रोच्चारणेनात्र यागानां सन्निधानता
सृष्टाभिधानगाक्षाणां मौलिकायाश्च चालनम् ॥ ३२ ॥
नवयागगता विद्या मध्यान्मेया उपासिता ।
स वीरो वीरवीर्यस्य भाजनं स्यादयत्नतः ॥ ३३ ॥
अन्तरङ्गविहीनानां बहियागैकनिश्चयात् ।
नासन्नफलदं किन्तु न चाविघ्नं प्रजायते ॥ ३४ ॥

Sampath_eBooks

किं तस्य बहुभिः क्लेशैर्जपव्रतक्रियात्मकैः।

स्वाम्यात्मा येन चरितो नवयागविनिर्णयः॥ ३५॥

तस्मात् सर्वप्रयत्नेन सिद्धिकामस्तु साधकः।

नवयागविधानेन विद्याभेदं समभ्यसेत्॥ ३६॥

नासौ सुदुर्लभा सिद्धिर्यानया सिद्ध्यते न हि।

अद्व्यावस्थिता सिद्धिर्द्विर्भावत्व विमुक्तये ॥ ३७॥

प्रशान्तरूपिणीं देवीं चुल्लीयागे महेश्वरि।

कर्मणां सुप्रसन्नानां भक्ता सिद्धिकरी भवेत्॥ ३८॥

मिश्राणामुदकुम्भस्था क्रूराणां मुसलस्थिता।

अथ किं बहुनोक्तेन वासनाबलतः प्रिये॥ ३९॥

सर्वं यागेषु संस्थिता साधयेज्जपात्।

सत्यंशङ्कालवे ताभिर्योगयन्त्र विवर्जिताः॥ ४०॥

साधयेत् सर्वकर्माणि भावाशयवशेन तु।

अथातो योगमाणिक्यं वीर्यं वच्मि तमोहरम्॥ ४१॥

स्वल्पक्लमफलं वच्मि साधकानां प्रसिद्धये।

विश्वादिकां विलोमेन शक्त्यन्ता च न लौकिकी ॥ ४२॥

कर्मणो विन्यसेद् विद्यां पूर्ववत् पाञ्चभौतिके।

विधेयाशु च तां न्यस्य सव्यकाष्ठामुखस्थितः॥ ४३॥

कृतालंकरणो मन्त्री हृदा संप्रोक्षते सकृत्।

स्थण्डिले सप्तजप्तन्तु फलयोनिं विनिक्षिपेत्॥ ४४॥

महोत्पलावसानं तदासनं परिकीर्तितम्।

तत्रानुलोमतो विद्यां पुरभूतां निवेशयेत्॥ ४५॥

तदूर्ध्वे पुष्पसंपूर्णं सप्तजप्ताञ्जलिं क्षिपेत्।

भैरवोपपदव्याप्तं विद्यया विपरीतया॥ ४६॥

प्रोक्तोपचारनिर्णीतो भैरवाय गणेश्वरः ।

कालसङ्कर्षणो भीमो योगसिद्धिप्रदायकः ॥ ४७॥

तस्योत्सङ्गगतां देवीं कालसङ्कर्षणीमुमाम् ।

आवाहयेद् यथापूर्वमनुलोमपदक्रमात्॥ ४८॥

पूर्वाकारगतां देवीं सर्वकामप्रसाधिकाम्।

ह्रींकारादि उकारान्तैर्विद्याद्यैः पञ्चभिर्गुणैः॥ ४९॥

पूजयेत् तत् पुरोद्दिष्टं परं मिथुनपञ्चकम्।

पारावते पञ्चपत्रे वीरपीठविमर्दकम्॥ ५०॥

तदन्ते द्वादशारं यन्नलिनं केसराकुलम्।

मिथुनानि तु पूज्यानि दश द्वे चैव तत्र तु॥ ५१॥

विद्यादिभूतबीजानामवसाने सुवर्णकैः।

यः व यो फडन्तक्रमेणैव द्वादशारं प्रपूजयेत्॥ ५२॥

अक्षयेन तु बीजेन त्रिपर्वा योजितो गणः।

प्रपूज्य तु महायोगे यदि चित्तं समुत्सहेत्॥ ५३॥

Sampath_eBooks

आदियामलमेतद्धि सर्वकर्मविधिक्रमम् व सर्वक्रम- ।

द्रव्यमुद्राक्षमालानां पूर्वोक्तैः साधनैः प्रिये ॥ ५४ ॥

अनायासेन साधूनां सर्वसिद्धिफलावहम् ।

त्रयाणामपि सिद्धीनां जगत्यत्र वरानने ॥ ५५ ॥

न तद् दुरापं वीराणां यदस्मान्नेष्यते मखात् ।

लक्षत्रयेण मुख्या तु द्वाभ्यां चैव तु मालिनी ॥ ५६ ॥

नियुतेनाधमानां तु योगेऽस्मिन् मूलयामले ।

न चास्मात् सारभूतेऽन्यस्तन्त्रेऽस्मिन् गुह्यकार्चिते ॥ ५७ ॥

येऽत्यन्तकल्मषग्रस्ता येऽन्येऽस्मिन् मुद्रिताः प्रिये ।

तन्त्रेऽस्मिन् ते हि सिद्ध्यन्ति मुक्त्वा रावणसैन्धवौ ॥ ५८ ॥

देहसिद्धावयोग्यौ तु न तु निर्वाणवस्तुनि ।

जयद्रथ उवाच ।

पिण्डसिद्धिरसानान्तु स प्रपञ्चायते हर ॥ ५९ ॥

अतस्तुभ्यं प्रसादेन निर्वृतिं येषु पुष्कलाम् ।

अन्ते प्राणपरित्यागः सुखेन च महेश्वर ॥ ६० ॥

स्वयमेव तृषार्त्ता हि तच्चिष्याणां सुमेधसाम् ।

सकारुण्यमिदं श्रुत्वा वद सैन्धवभाषितम् ॥ ६१ ॥

कृपयाक्षिप्तसंमोहः परार्था च द्विरागया ।

वत्स तेन महारौद्रों यन्मोहो मयि संस्थितः ॥ ६२ ॥

Sampath_eBooks

गतायुस्तेन सुव्यक्तशिवत्त्वस्त्वं विष्यति ।

श्रुत्वैतदीश्वराद् वाक्यं परमानन्दकारकम् ॥ ६३ ॥

उत्थाय नृपशार्दूल प्रणम्याष्टाङ्गकं हरम् ।

गौतमीं च पुनर्नत्वा भूयसा परमां जपन् ॥ ६४ ॥

प्राहेशः परितुष्टोऽस्मि सर्वाकारेण वस्तुना ।

ज्ञानपादादिना देव चर्यापादविरागिणा ॥ ६५ ॥

विमलवारिसरित्प्लवधारिणा शशिकलाङ्कितशेखरशोभिना ।

दशनकान्तिविवर्धितकान्तिना हतसमस्तजगद्दृप्तमूर्तिना ॥ ६६ ॥

कनककुण्डलराजितवक्त्रया विकसितामलपङ्कजनेत्रया ।

विहितधामवपुःशतकान्तया ॥ ६७ ॥

सुगतिमेकसुशर्मविशारिणा ।

भवमहाधिमहो जपरूपिणा मलभुजङ्गमहामिषभक्षणा ॥ ६८ ॥

विविधदुष्कृतदारुविदारिणा मृतकधामपरामृतकारिणा ।

दनुमहीधरनिर्झरवारिणा मुदितमातृगणोन्नतिभाजिना ॥ ६९ ॥

नयनवह्निशिखापरितापिना उडुपरिश्रुतदिव्यमहाम्भसां ।

निकरजीवितकन्दलहुंकृतैरतिभयङ्करभैरवरूपिणा ॥ ७० ॥

विविधकन्दफलतृणचारिणा सकलमातृदितिप्रविजृम्भिणा ।

विषमकालगवाम्यतिवस्तुना अमितवीर्यबलेन विषाणिना ॥ ७१ ॥

जगति कारुणिकेन महात्मना कृतमनन्तगुणं मनसीप्सितम् ।

सकलजन्तुजनस्य विशेषतः सकरुणेन महेशसमत्वया ॥ ७२॥

अवाप्तसर्वसन्देहो दिव्यज्ञानतमोमयः ।

प्रसन्नेनासमाक्षेण हैमवत्या च नित्यशः॥ ७३॥

रत्यानन्दितसर्वाङ्गधृतरोमाञ्चकञ्चुकः ।

प्रणम्य दण्डवत् पादौ भूयो भूय उमेशयोः॥ ७४॥

प्रलब्धवरदानश्च ताभ्यां पृथ्वीश्वरो गतः।

चुम्बकत्वमनु प्राप्य सर्वाधिकृतसप्तमः॥ ७५॥

सोऽनुग्रहपरे लोके संगृह्य त्रिदशैः शतैः।

कल्पमेकन्तु द्वार्द्धेन शतेनान्यं निराकुलम्॥ ७६॥

मुनीनां मानुषाणाञ्च प्रभोऽस्मात् तन्त्रसागरात्।

जयद्रथे ंगते क्षोणीं ी प्रोवाचेत्थमुमा पुनः॥ ७७॥

कियती सूत्रसंख्यास्य चोदितास्य च यो हरः ।

धारको वाग्रतः कोऽस्य किं फलं वा श्रुतेऽस्य तु॥ ७८॥

पूजितस्य च वीरेश कल्पस्यातिबलस्य तु।

श्रीभैरव उवाच।

सहस्रयुगलेनात्र विद्यापादः प्रतिष्ठितः॥ ७९॥

क्रियापादस्तथैवं हि योगाख्यं पञ्चभिः शतैः।

चर्यापादसहस्रेण सार्द्धेन गदितः स्फुटः॥ ८०॥

धारकः प्रथमं चास्य द्वापरे तु जयद्रथः।

Sampath_eBooks

योगिनीगर्भसंभूतो गणोऽयं भृङ्गिना पुरा ॥ ८१ ॥

गन्धमादननामा तु शप्तो रूष्टेन पार्वति ।

श्रीदेव्युवाच ।

किं कोपकारणं नाथ निर्जलस्य सुरार्चित ॥ ८२ ॥

चालितो येन वीरेश गणोऽयं गणमण्डलात् ।

श्रीभैरव उवाच ।

विरूपं मांसहीनञ्च करालं दीर्घकन्धरम् ॥ ८३ ॥

दृष्ट्वा तु रूपं सहसा हसितं तेन गर्वितम् ।

ततो रुषा प्रपूर्णेन भृङ्गिना रजसा कुलम् ॥ ८४ ॥

मृत्युर्भूयोजनं मर्त्यं यास्यसीत्युदितं वचः ।

तत स्तुतोऽतिभीतेन तेन भृङ्गिनुतेन च ॥ ८५ ॥

ततस्तेन प्रसन्नेन सत्कृतो मण्डलाधिपः ।

प्रोक्तश्च कुलजागर्भे तव जन्म भविष्यति ॥ ८६ ॥

तस्मिंश्च शाङ्करं ज्ञानं वामाचारपरायणम् ।

वामायाः संप्रसादेन वामेश्वरमुखोद्गतम् ॥ ८७ ॥

वामेऽथ पूजितं वामं वामेशीनां गृहे शुभम् ।

वामवीर्यचराणान्तु सुप्रतिष्ठं भविष्यति ॥ ८८ ॥

कलौ युगे महाघोरे दुष्टप्राणिगणाकुले

दक्षादयो महावीरा योगिनीकुलसंस्थिताः ॥ ८९ ॥

शाम्यन्ति शुद्धदेहेभ्यो वीरेभ्यो जपहोमतः ।

योगिनीगर्भसंभूता ये वीराः कुलमाश्रिताः ॥ ९० ॥

तस्यावतारकाः मर्त्ये तेभ्योऽन्ये युद्धमूर्त्तयः ।

देवतातन्त्रमेतद्धि योगिनीगणसेवितम् ॥ ९१ ॥

नाभाग्यैर्लभ्यते मन्त्रैस्त्र्यम्बकेच्छाविवर्जितैः ।

त्वमिच्छसि महाभागे त्वया संचोदिता यतः ॥ ९२ ॥

अतः प्राप्यमिदं ज्ञानं तेन पन्निलसूनुना ।

भगमुख्यमनुष्ठानादह्नायैवामृतप्रदम् ॥ ९३ ॥

स्वाश्रितं सर्ववस्तूनां प्रबोधाय विपर्ययात् ।

पूजितं परया भक्त्या हयमेधफलावहम् ॥ ९४ ॥

किं तस्य बहुभिः कल्पैः प्रतिकल्पक्रियेक्षकैः ।

यस्यायं सर्वविद्याधृक् षट्सहस्रे प्रतिष्ठितः ॥ ९५ ॥

कल्पप्रश्नपदाभासवाक्यं वच्मि प्रभालय ।

उदेति दर्शिताशेषपदार्थैः सप्तधातुकैः ॥ ९६ ॥

योऽसावीशः स्वभावात् सुवितनतभवः पूरिताशेषविश्वो ।

योऽत्पन्नो निष्प्रपञ्चो निजबलनिलयो दर्शितैः साधकैस्तैः ॥ ९७ ॥

स्थानिस्वन्तर्गतश्चाप्यविहितविभवः सुस्थितो दुःस्थितश्च ।

प्रोक्तो यो वापि दुर्गैरजनि महसि गाः स्थूलसूक्ष्माः ॥ ९८ ॥

पीठानां या च संस्था विमलमहासि यो भैरवानां विभागः ।

Sampath_eBooks

ये धर्माः पुद्गलानां परगुणविहिताश्चेश्वराये ह्यनन्ताः ॥ ९९ ॥

भावा ये प्रत्ययाख्यास्त्रिगुणयुगलगास्तंत्रपूर्वश्च ।

प्रोक्तो दृश्यार्थयोग्यो निगदितमखिलं तच्च वीरागमस्थम् ॥ १०० ॥

यदि मृगयसि बीजं बीजमेवात्र साधुः

ननु यतसि पदार्थास्तेऽत्र क्षेत्र सुष्ठु प्रतीताः ।

अभिलषसि सुतत्त्वं यत्नहीनं तदत्र

मनुफलमविचार्यं वाञ्चसेत्रैव तच्च ॥ १०१ ॥

स्वर्लोकेशाधिपतिवदनाम्भोरुहास्वादबिन्दुं

वीरस्येच्चाजवनवशतः प्रच्युतं विश्वखाते ।

पीतं भूभृद्वलयमधुपेनातिलिप्सा हृतेन

यत्तत् पीत्वा जगति स नरो निर्वृताः ॥ १०२ ॥

कैर्न कामैः वीरा येऽध्वन्यमेयाः स्वनियताः पालयन्ते जगन्ति ।

योगिन्यो याश्च द्वित्रिकुलमधिगता मातरः शान्तघोराः ॥ १०३ ॥

मत्पूर्वा ये च देवा गुणनिधिविगताः पङ्क्यो या गुरूणाम् ।

सेवन्ते तेऽत्र तन्त्रे गुरुमधिकगुणं शेषविद्यार्थविद्भ्यः ॥ १०४ ॥

न तदस्ति न तद् भुतं न तद् भावि फलैषिणाम् ।

यदत्राभिहितंनैव यत् स्याद् वा नात्र सेवते ॥ १०५ ॥

तस्याद्य सफलं कर्तुं तत् संप्रार्थ्यं चतुर्विधम् ।

सालोचयति शम्भूक्तं कल्पमेतत् सुविस्तरम् ॥ १०६ ॥

Sampath_eBooks

प्रतिपदमिह तूर्यैरर्थतो ग्रन्थतश्च

मणिमिव हृदयानां धार्य ः शुद्धस्वभावम्।

सदमलपदयुक्तं कल्पमेनं महार्थम्

तदवपुषि नराणां कोऽन्धकार्यों निवार्यः॥ १०७॥

नानातन्त्रमणीन्द्रकौस्तुभमिमं वामागमार्थोदयं

भानुर्भानुमतां सुरेष्विव हरिः श्रीकण्ठवच्चूलिनाम्।

कल्पं सुप्रवरं मुनीन्द्रतनयावीरक्रमेणागतं

यो वेत्यान्त्यजजन्मजोऽपि स गुरुः सर्वार्थकृत् प्राणिनाम्॥ १०८॥

पादच्छाया न हि गुरुतरोराश्रिता शीतला यैस्ते विश्वेऽस्मिन् भवतरणि

णना तीक्ष्णपादेन तप्ता ः।

मायारण्ये महति मरुजे तोयहीने तृषार्त्ता ः

यास्यन्त्युच्चैः कृपणमतयो विप्लवं संप्लवंच॥ १०९॥

मुद्रायूपाणुवाजी निधिरषचरणो दिव्यविद्यासुपीठं।

नानाद्रव्योच्चकेतुर्निजविभवमहायोगधूर्होमरश्मिः॥ ११०॥

कुत्रासौ योगवाहो नयति मनुहरिः खं निरालम्बमार्गम्।

विद्याविचुम्बकेन्द्रारुणरथकृद्दते सर्वविज्ञानपूर्णान्॥ १११॥।

तस्मात् सर्वप्रयत्नेन गुरुमन्विष्य यत्नतः।

उभयार्थे प्रवृत्तो यः शिरश्छेदे स उच्यते॥ ११२॥

मातृकावर्णमुख्यैस्तु पटलैर्मणिभिर्यथा।

Sampath_eBooks

तमोहरैस्तत्र विश्वं प्रदीप्यति सुभास्वरम्॥ ११३॥

इति प्राचीनता उपज पुस्तकाः स्वकोय भारती भवनार्थंत्रोमद्राल गुरु हेमराजविद्वद्वरेण शारदारमण शर्म द्वारा विलिख्य १९८२ वै क्रमे सम्पादितम् भैरवस्रोतसि विद्यापीठे शिरश्छेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसा प्रथमषट्के श्रीकालसङ्कर्षण्यां विद्या सम्प्रदाय -षट्कमाहात्म्यादिवर्णनं एकपञ्चाशतमः पटलः॥ ५१॥

समाप्तं श्रीजयद्रथयामले प्रथमषट्कमिति शुभम्। खट्वाम्वुशी कर्च्चन्नं चन्द्रलेखाविभूषितम्। यो बिभर्त्ति जटाधारं नमस्तस्मै पिनाकिने॥

संवत ८४३ कार्त्तिकशुक्ल पूर्णमाशी आदि णवारथ्व कुह्नुथ्व संफुलि श्रीलक्ष्णी राये याते विलस्वे निष्णे हनुमन्तनेनियो

मूद्रा लक्षणपत्र २५६ जम्मा पत्र ३९४॥

Sampath_eBooks

प्रतिपदमिह तूर्यैरर्थतो ग्रन्थतश्च

मणिमिव हृदयानां धार्य ः शुद्धस्वभावम्।

सदमलपदयुक्तं कल्पमेनं महार्थम्

तदवपुषि नराणां कोऽन्धकार्यो निवार्यः॥ १०७॥

नानातन्त्रमणीन्द्रकौस्तुभमिमं वामागमार्थोदयं

भानुर्भानुमतां सुरेष्विव हरिः श्रीकण्ठवच्चूलिनाम्।

कल्पं सुप्रवरं मुनीन्द्रतनयावीरक्रमेणागतं

यो वेत्यान्त्यजजन्मजोऽपि स गुरुः सर्वार्थकृत् प्राणिनाम्॥ १०८॥

पादच्छाया न हि गुरुतरोराश्रिता शीतला यैस्ते विश्वेऽस्मिन् भवतरणि

णना तीक्ष्णपादेन तप्ता ः।

मायारण्ये महति मरुजे तोयहीने तृषार्त्ता ः

यास्यन्त्युच्चैः कृपणमतयो विप्लवं संप्लवंच॥ १०९॥

मुद्रायूपाणुवाजी निधिरषचरणो दिव्यविद्यासुपीठं।

नानाद्रव्योच्चकेतुर्निजविभवमहायोगधूर्होमरश्मिः॥ ११०॥

कुत्रासौ योगवाहो नयति मनुहरिः खं निरालम्बमार्गम्।

विद्याविच्चुम्बकेन्द्रारुणरथकृद्दते सर्वविज्ञानपूर्णान्॥ १११॥।

तस्मात् सर्वप्रयत्नेन गुरुमन्विष्य यत्नतः।

उभयार्थे प्रवृत्तो यः शिरश्छेदे स उच्यते॥ ११२॥

मातृकावर्णमुख्यैस्तु पटलैर्मणिभिर्यथा।

Sampath_eBooks

तमोहरैस्तत्र विश्वं प्रदीप्यति सुभास्वरम्॥ ११३॥

इति प्राचीनता उपज पुस्तकाः स्वकोय भारती भवनार्थंत्रोमद्राल गुरु हेमराजविद्वद्वरेण शारदारमण शर्म द्वारा विलिख्य १९८२ वै क्रमे सम्पादितम् भैरवस्रोतसि विद्यापीठे शिरश्चेदे श्रीजयद्रथयामले महातन्त्रे चतुर्विंशतिसा प्रथमषट्के श्रीकालसङ्कर्षण्यां विद्या सम्प्रदाय -षट्कमाहात्म्यादिवर्णनं एकपञ्चाशतमः पटलः॥ ५१॥

समाप्तं श्रीजयद्रथयामले प्रथमषट्कमिति शुभम्। खट्वाम्बुशी कर्च्चन्नं चन्द्रलेखाविभूषितम्। यो बिभर्त्ति जटाधारं नमस्तस्मै पिनाकिने॥

संवत ८४३ कार्त्तिकशुक्ल पूर्णमाशी आदि णवारथ्व कुह्वुथ्व संफुलि श्रीलक्ष्णी राये याते विलस्वे निष्णे हनुमन्तनेनियो

मूद्रा लक्षणपत्र २५६ जम्मा पत्र ३९४॥